तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

# केन्द्रीयविद्यालयसंगठनम्, एरणाकुलं संभागः

**KENDRIYA VIDYALAYA SANGATHAN, ERNAKULAM REGION**

# पाथेयम्

## अध्ययनसामग्री 2022 – 23

### कक्षा – दशमी

**STUDY MATERIAL 2022 - 23**

**CLASS - X**



विषयः | SUBJECT

## संस्कृतम् | SANSKRIT

# मार्गदर्शकाः



श्री आर् सेन्थिल् कुमार्
उपायुक्तः



श्रीमती दीप्ति नायर्
सहायिकायुक्ता



श्री सन्तोष् कुमार् एन्
सहायकायुक्तः



श्री अजय कुमार्
सहायकायुक्तः



श्री कुमार मोहन् जी
प्राचार्यः

# नेपथ्ये


**निदेशिका** — श्रीमती दीप्ति नायर्<br>सहायिकायुक्ता

**समायोजकः** — श्री कुमार मोहन् जी<br>प्राचार्यः

**मुख्यसम्पादकः** — श्री षिबु कुमार् के

**सम्पादकसमितिः** —
डा. ए जी मणिकण्ठन्
डा. मनोज् बी
श्रीमती दुर्गा लक्ष्मी एन् सी

**सदस्याः**

श्री टी वी माधवन्
श्रीमती वी के रेणुका
डा. सुरेष् वी के
डा. के एस् मैथ्यूस्
श्रीमती के पी सुजाता
श्रीमती सन्ध्या सुकुमार्
श्रीमती रेणु धाकड
श्री अरविंद कुमार मीना
श्रीमती रक्षा त्रिवेदी
श्री के सदानन्दन्
श्रीमती उषा पी
श्री सजीवन् सी पी
श्रीमती सन्ध्या पी के
श्रीमती शीला देवी जी
श्रीमती दुर्गा लक्ष्मी एन् सी
श्रीमती शबनम
डा. शरण्या वी
कुमारी गायत्री एम् एस्

मुखचित्रम् – श्री विनायक् सी बी

आर सेन्दिल कुमार
उपायुक्त
R Senthil Kumar
Deputy Commissioner



केन्द्रीय विद्यालय संगठन
क्षेत्रीयकार्यालय, एरणाकुलम
Kendriya Vidyalaya Sangathan
Regional Office, Ernakulam
Kochi – 682020
Phone – 0484-2205111
Website: www.ernakadam.kys.gov.in
Email: deernakalantregional.com

F.31/Acad/KVS(EKM) Date: 14/09/2022

## MESSAGE FROM DEPUTY COMMISSIONER

*It gives me immense pleasure to publish the Sanskrit study material for class X. I am sure that the support material will definitely be of great help to the class X students of all Kendriya Vidyalayas of our region.*

*This Students' Support Material has been prepared to improve their academic performance. This is a product of the combined efforts of a team of dedicated and experienced teachers with expertise in their subjects. This material is designed to supplement the NCERT text book*

*The Support Material contains all the important aspects required by the students. Care has been taken to include the latest syllabus, summary of all the chapters, Grammar parts and Sample question papers. It covers all essential components that are required for quick and effective revision of the subject*

*I would like to express my sincere gratitude to the in-charge Principal and all the teachers who have persistently striven for the preparation of this study material. Their selfless contribution in making this project successful is commendable.*

*"An ounce of practice is worth tons of knowledge", students will make use of this material meticulously to reap the best out of this effort.*

*With Best Wishes*

*(R Senthil Kumar)*
*Deputy Commissioner*

विद्या प्रशस्यते लोकैः विद्या सर्वत्र गौरवा।
विद्यया लभते सर्वं विद्वान् सर्वत्र पूज्यते।।

KVS RO Ernakulam, working as a torch bearer in the field of education has tried its level best to instill creativity and competency among students. It has always been cultivating unique methodology and approachable activities to make the teaching learning process most useful and effective, keeping in mind the wider panorama of School education and it's responsibilities. As per KVS RO Ernakulam directions, a luminous and constructive study material for the advancement of the students is prepared, which includes precious data. This time the task of preparing Sanskrit Study Material for class X is assigned to KV AFS Akkulam. The material is prepared diligently and ensured that it is faultless, by the accomplished and meticulous Sanskrit faculties of the Region. We have attempted our best to make this study material very valuable and handy for the students and to keep it highly effective.

I would like to extend my wholehearted gratitude to Shri. R Senthil Kumar, Deputy Commissioner KVS RO Ernakulam for bestowing this responsibility to us, Mrs. Deepthi Nair, Asst. Commissioner for her support and inputs and to all the teachers of this endeavour for their valuable contributions to bring this material as a master piece .

Thanking you

Kumara Mohan G
Principal
KV AFS Akkulam

# पुरोवाक्

महता सन्तोषेण प्रस्तूयते इदं 'पाथेयम्' नामिका दशमकक्षायाः संस्कृत-छात्राणां कृते अध्ययनसामग्री । केन्द्रीय विद्यालय संगठनस्य एरणाकुलं संभागेन समानीयते इयमध्ययनसामग्री । एषा सामग्री तु सत्रान्तपरीक्षायाः अभ्यासार्थं निर्मिता । पौनःपुन्येन कृताभ्यासाः एव छात्राः परीक्षायां सात्मविश्वासं उत्तरलेखने समर्थाः भवेयुः । इयमध्ययनसामग्री छात्राणामभ्यासाय उपकारप्रदो भविष्यतीति पूर्णोऽस्ति विश्वासः । तेन च छात्राः परीक्षायाम् उत्तमानङ्कान् प्राप्तुं समर्थाः भविष्यन्ति । विजयपथि इदं पाथेयवत् महदुपकरिष्यतीति विश्वासेनैव अस्य 'पाथेयम्' इति नाम कल्पितम् । केन्द्रीय माध्यमिक शिक्षा बोर्ड द्वारा प्रस्तुतं नवीनं पाठ्यक्रमं आधारीकृत्य एव अस्याः निर्माणं विहितम् । प्रत्येकं पाठ्यबिन्दूनां विवरणं प्रदाय छात्राणां सरलावगमनाय उदाहरणानि अभ्यासार्थं तत्संबद्धाः प्रश्नाः च दत्ताः । पाठ्यपद्धतौ अन्तर्भूतेभ्यः सर्वेभ्यः पाठेभ्यः परीक्षायां संभाव्यमानाः प्रश्नाः अपि अत्र विस्तृताः । आशास्महे यद् इयमध्ययनसामग्री छात्रेभ्यः तथा शिक्षकवृन्देभ्यश्च उपकारप्रदा भविष्यति । सर्वविधान् मार्गनिर्देशान् दत्तवते एरणाकुलं संभागस्य उपायुक्ताय श्रीमते आर् सेन्दिल् कुमार् वर्याय, अध्ययनसामग्रीनिर्माणसमित्याः निदेशिकायै सहायिकायुक्तायै श्रीमत्यै दीप्ति नायर् वर्यायै, समायोजकाय प्राचार्याय श्रीमते कुमार मोहनन् वर्याय, मुखचित्रस्य रचयित्रे श्रीमते विनायक् सी बी (Livesanskrit) वर्याय तथास्याः निर्माणे सहयोगं कृतवद्भ्यः सर्वेभ्यः च सुहृद्भ्यः हृत्स्पृष्टमकैतवं कार्तज्ञ्यं व्याहरामः ।



षिबु कुमारः के
स्नातक संस्कृतशिक्षकः
केन्द्रीयविद्यालयः आक्कुलम्

# अनुक्रमणिका


| क्र.सं. | विषय: | निर्माता | पृष्ठसंख्या |
|---|---|---|---|
| | **अपठित-अवबोधनम्** | | **08 - 19** |
| 1 | अपठित: गद्यांश: | श्रीमती उषा पी, के.वि. अडूर, प्रथम पाली | 09 - 19 |
| | **रचनात्मकं लेखनम्** | | **19 - 47** |
| 2 | पत्रलेखनम् | डॉ मनोज् बी, के.वि एस ए पी, पेरूरकड़ा | 19 - 34 |
| 3 | चित्राधारितं वर्णनम् | डॉ. के एस मैथ्यूस्, के.वि. रामवर्मपुरम् | 35 - 42 |
| 4 | संस्कृतभाषायाम् अनुवाद: | श्री. सदानन्दन् के , के.वि. मलप्पुरम् | 43 - 47 |
| | **अनुप्रयुक्तव्याकरणम्** | | **48 - 131** |
| 5 | सन्धिकार्यम् | डॉ. ए जी मणि कण्ठन्, के.वि. पुरनाट्टुकरा<br>श्रीमती वी के रेणुका, के.वि. पुरनाट्टुकरा | 49 - 63 |
| 6 | समास: | डॉ मनोज बी, के.वि एस ए पी, पेरूरकड़ा | 64 - 82 |
| 7 | प्रत्यया: | डॉ. के एस मैथ्यूस, के.वि. रामवर्मपुरम् | 83 - 99 |
| 8 | वाच्यपरिवर्तनम् | श्री टी वी माधवन् , के.वि सी आर पी एफ पेरिङ्गोम | 100 - 107 |
| 9 | समयलेखनम् | श्री टी वी माधवन् , के.वि सी आर पी एफ पेरिङ्गोम | 108 - 113 |
| 10 | अव्ययपदानि | श्रीमती दुर्गा लक्ष्मी एन् सी, के वि कञ्जिक्कोड् | 114 - 124 |
| 11 | अशुद्धिसंशोधनम् | श्रीमती रक्षा त्रिवेदी, के वि पट्टम्, द्वितीयपाली | 125 - 131 |
| | **पठित-अवबोधनम्** | | **132 - 104** |
| 12 | प्रथम: पाठ: - शुचिपर्यावरणम् | श्रीमती उषा पी, के.वि. अडूर, प्रथम पाली | 133 - 150 |
| 13 | द्वितीय: पाठ: - बुद्धिर्बलवती सदा | डॉ सुरेश् वी के , के.वि. नं 1, कोषिक्कोड् | 151 - 158 |
| 14 | चतुर्थ: पाठ: - शिशिलालनम् | श्रीमती सन्ध्या सुकुमार्, के.वि. नं 1, कोषिक्कोड् | 159 - 169 |
| 15 | पञ्चम: पाठ: - जननी तुल्यवत्सला | श्रीमती सन्ध्या पी के, के वि ओट्टपालम् | 170 - 176 |
| 16 | षष्ठ: पाठ: - सुभाषितानि | श्रीमती दुर्गा लक्ष्मी एन् सी, के वि कञ्जिक्कोड् | 177 - 186 |
| 17 | सप्तम: पाठ: - सौहार्दं प्रकृते: शोभा | श्रीमती शीला देवी जी, के.वि. नं 1 कोच्चिन् | 187 - 208 |
| 18 | अष्टम: पाठ: - विचित्र: साक्षी | श्री टी वी माधवन् , के.वि सी आर पी एफ पेरिङ्गोम | 209 - 220 |
| 19 | नवम: पाठ: - सूक्तय: | डॉ. ए जी मणि कण्ठन्, के.वि. पुरनाट्टुकरा | 221 - 229 |
| 20 | द्वादश: पाठ: - अन्योक्तय: | श्री अरविन्द कुमार् मीना, के वि इडुक्की | 230 - 237 |
| 21 | प्रश्ननिर्माणम् | श्रीमती सुजाता के पी , के.वि एरणाकुलम् | 238 - 248 |
| 22 | अन्वय: भावार्थ: च | डॉ मनोज् बी, के.वि एस ए पी, पेरूरकड़ा | 249 - 270 |
| 23 | घटनाक्रमानुसारं लेखनम् | डॉ सुरेश् वी के , के.वि. नं 1, कोषिक्कोड् | 271 - 276 |
| 24 | प्रसङ्गानुकूलम् अर्थचयनम् | श्री हेम चंद, के वि कोल्लम् | 277 - 291 |
| | **आदर्शप्रश्नपत्राणि** | | **292 - 361** |
| 25 | आदर्शप्रश्नपत्रम् 1 | कुमारी गायत्री एम् एस्, के वि एन् ए डी आलुवा | 293 - 302 |
| 26 | आदर्शप्रश्नपत्रम् 2 | श्रीमती रेणु धाकड, के वि चेन्नीर्क्करा | 303 - 313 |
| 27 | आदर्शप्रश्नपत्रम् 3 | डा शरण्या वी, के वि कड्डुरुत्ति | 314 - 324 |
| 28 | आदर्शप्रश्नपत्रम् 4 | श्रीमती शबनम्, के वि एषिमला | 325 - 336 |
| 29 | आदर्शप्रश्नपत्रम् 5 | श्री सजीवन् सी पी, के वि तलश्शेरी | 337 - 346 |
| 30 | आदर्शप्रश्नपत्राणाम् उत्तरकुञ्चिका: | | 347 - 360 |



# खण्डः - क
# अपठितावबोधनम्

अपठितावबोधने 80 -100 शब्दपरिमित: एक: अपठित: गद्यांश: दीयते । तं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृते लेखनीयानि । परीक्षाया: प्रश्नप्रकारा: अधो दीयन्ते ।

1) एकपदेन उत्तरत । ( प्रश्नस्य उत्तरं गद्यांशात् चित्वा एकपदेन लेखनीयम् )

2) पूर्णवाक्येन उत्तरत । ( प्रश्नस्य उत्तरं गद्यांशात् चित्वा पूर्णवाक्येन लेखनीयम् )

3) गद्यांशस्य उचितं शीर्षकं लिखत । (गद्यांशस्य प्रतिपाद्यविषयम् अनुसृत्य शीर्षकं (Title) लेखनीयम् ।)

4) अनुच्छेदाधारितं भाषिककार्यम् ।

क) वाक्ये कर्तृ-क्रियापदचयनम्

ख) कर्तृ-क्रिया-अन्विति: ।

ग) विशेषण-विशेष्य-पदचयनम्

घ) पर्याय/ विलोमपदचयनम्

**एकपदेन-पूर्णवाक्येन च शुद्धोत्तरलेखनाय ध्यातव्या: विषया: -**

1. प्रश्नवाचकपदं किम् इति प्रथमं चिन्तयन्तु ।
2. प्रश्नस्य अन्यपदानि अनुच्छेदस्य कस्मिन् वाक्ये सन्ति इति अवगच्छन्तु । तस्मिन् वाक्ये प्रश्नवाचकपदस्य लिङ्ग-विभक्ति-वचनानूसारं यत् पदम् अस्ति तदेव उत्तरम् भवति ।
3. प्रश्नवाचकपदानाम् आधारेण प्रश्नानाम् उत्तराणि लिङ्ग-विभक्ति-वचनानुसारं लिखन्तु ।

**शीर्षकलेखनम्**

1. शीर्षके एकपदम् वा पदद्वयं वा पदत्रयं वा एव भवतु ।
2. शीर्षके अनुच्छेदस्य विषयाधारितम् "प्रथमा- विभक्ति पदम्" / षष्ठीविभक्तिपदेन सह प्रथमा विभक्तिपदं वा लिखत । यथा :-

**प्रथमाविभक्ति पदम्** :- भारतम् / पर्यटनम् / व्यायाम: / सदाचार: / दिनचर्या आदय: ।

**षष्ठीविभक्तिपदेन सह प्रथमाविभक्तिपदम्** :- पर्यावरणस्य रक्षा / बुद्धे: बलम् / भारतस्य संस्कृति: / कालिदासस्य रचना इत्यादय: ।

**यथानिर्देशम् उत्तरत - (भाषिककार्यम्)**

अस्मिन् वाक्ये कर्तृपदम् किम् / क्रियापदम् किम् ?

अस्मिन् वाक्ये / अनयो: पदयो: विशेषणपदं किम् / विशेष्यपदम् किम्?

अस्मिन् अनुच्छेदे ...... इति पदस्य समानार्थकपदं किम् / विलोमपदं किम् ? इत्येवं विधा: प्रश्ना: एव भवन्ति अत्र ।

## अभ्यासार्थम् अनुच्छेदा:

### अनुच्छेद: - 1

**अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।**

दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरम् आसीत् । तस्य समीपे एकः महान् वटवृक्ष: आसीत् । तत्र चित्रग्रीव: नामकः कपोतराजः सकुटुम्बः निवसति स्म । एकदा जालतण्डुलहस्त: एकः व्याध: तत्र आगच्छत् । वृक्षस्य अध: जालं प्रासारयत् । उपरि च तण्डुलान् अक्षिपत् । तत: दूरं गत्वा निभृत: स्थित: । तत: कपोतशावका: तण्डुलान् दृष्टवन्त: । तान् भक्षयितुम् उद्यता: कपोतशावका: जाले एव बद्धाः अभवन् । ते सर्वे जालात् बहि: आगन्तुं जालस्य भेदनाय परिश्रमम् अकुर्वन् । तदा चित्रग्रीव: तान् अवदत् - "अहो न भेदितव्यम् । यूयं सर्वे मिलित्वा पाशं नीत्वा उत्पतत ।" तदा सपाशजाला: कपोताः उदपतन् । तस्य वनस्य एकस्मिन् भूभागे चित्रग्रीवस्य सुहृद् हिरण्यक: अवसत् । चित्रग्रीव: कपोतै: सह तस्य बिलसमीपे अवातरत् । हिरण्यक: पाशम् अकृन्तत् । एवं ते कपोताः पुनः मुक्ता: ।

**1) एकपदेन उत्तरत ।**

i) नगरस्य नम किम् ? **( केवलं प्रश्नद्वयम् )**

ii) कपोतराजस्य नाम किम् ?

iii) चित्रग्रीवस्य सुहृद् क: आसीत् ?

**2) पूर्णवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् )**

i) चित्रग्रीव: तान् किम् अवदत् ?

ii) क: पाशम् अकृन्तत् ?

iii) के तण्डुलान् दृष्टवन्त: ?

**3) अस्य अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

**4) यथानिर्देशम् उत्तरत । ( केवलं प्रश्नत्रयम् )**

i) 'तान् भक्षयितुम् उद्यता: कपोतशावका: जाले एव बद्धाः अभवन्' अस्मिन् वाक्ये 'अभवन्' इति क्रियापदस्य कर्तृपदं किम् ?

क) कपोतशावका: ख) जले ग) बद्धाः घ) भक्षयितुम्

ii) 'एकदा जालतण्डुलहस्त: एकः व्याध: तत्र आगतः' अस्मिन् वाक्ये 'जालतण्डुलहस्त:' इति पदस्य विशेष्यपदं किम् ?

क) एकः ख) व्याध: ग) तत्र घ) आगतः

iii) 'निषादः' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

क) कपोताः     ख) सकुदुम्बः     ग) मिलित्वा     घ) व्याधः

iv) 'उपरि' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

क) एकदा     ख) अधः     ग) दृष्टवा     घ) मुक्ताः

**<u>अनुच्छेदः - 2</u>**

**अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।**

एकस्मिन् वृक्षे हंसकाकौ निवासं कृतवन्तौ । हंसकाकौ मित्रे आस्ताम् । काकः हंसस्य सौन्दर्येण अतीव असूयालुः आसीत् । हंसः परोपकारी दयालुः शान्तः धर्मिष्ठः सदा प्रसन्नः नीतिमान् च आसीत्। एकदा ग्रीष्मे परिश्रान्तः कश्चन पथिकः धनुर्बाणं समीपे निधाय प्रसुप्तः । क्षणान्तरे तस्य मुखात् वृक्षच्छाया अपगता । पथिकस्य मुखम् आतपेन तप्तम् अवलोक्य वृक्षस्थितेन हंसेन पक्षौ प्रसारितौ । लब्धनिद्रासुखेन पथिकेन मुखम् उद्घाटितम् । काकः सर्वं दृष्टवा वृक्षे अतिष्ठत् । परसुखम् असहिष्णुः काकः तस्य मुखे पूरीषोत्सर्गं कृत्वा पलायितः । पथिकेन उपरि निरीक्षितम् । सः हंसम् अपश्यत् । पूरीषोत्सर्गं हंसः एव कृतवान् इति मत्वा पथिकः बाणेन धर्मिष्ठं हंसम् अमारयत् । सत्यम् एव उक्तम् - ' त्यज दुर्जनसंसर्गम् ' इति ।

**1 ) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् )**

i) कौ मित्रे आस्ताम् ?

ii) कः असूयालुः आसीत् ?

iii) पथिकः समीपे किं निधाय प्रसुप्तः ?

**2) पूर्णवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् )**

i) हंसः कीदृशः आसीत् ?

ii) परसुखम् असहिष्णुः काकः किं कृत्वा पलायितः ?

iii) किम् अवलोक्य वृक्षस्थितेन हंसेन पक्षौ प्रसारितौ ?

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

**4) यथानिर्देशम् उत्तरत । ( केवलं प्रश्नत्रयम् )**

i) 'हंसस्य सौन्दर्येण काकः अतीव असूयालुः आसीत्' अस्मिन् वाक्ये 'आसीत् ' इति क्रियापदस्य कर्तृपदं किम् ?

क) सौन्दर्येण     ख) काकः     ग) अतीव     घ) असूयालुः

ii) 'पथिक: बाणेन धर्मिष्ठं हंसम् अमारयत्' अस्मिन् वाक्ये 'हंसम्' इति पदस्य विशेषणपदं किम् ?

क) पथिक: ख) बाणेन ग) धर्मिष्ठम् घ) अमारयत्

iii) 'सहिष्णु:' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

क) परिश्रान्त: ख) अवलोक्य ग) असहिष्णु: घ) उद्घाटितम्

iv) 'द्रुमे' इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

क) वृक्षे ख) पक्षौ ग) ग्रीष्मे घ) आतपेन

**<u>अनुच्छेद: - 3</u>**

**अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।**

एकस्मिन् नगरे भिक्षुकद्वयं वसति स्म । तयो: एक: मूक: अन्य: च बधिर: । तौ प्रतिदिनं मार्गस्य पार्श्वे उपविश्य भिक्षाटनं कुरुत: स्म । एकस्मिन् दिने अनेके जना: तेन मार्गेण सञ्चारं कुवन्ति स्म । तेषु बहव: बधिराय भिक्षाम् अयच्छन् । मूक: एतत् न असहत । कुपित: भूत्वा स: तम् धनिकम् उक्तवान् "भो: महोदय! तस्मै किमपि मा ददातु । यत: स: बधिर: नास्ति" इति । एतत् श्रुत्वा बधिर: अपि क्रुद्ध: अभवत् । तयो: मध्ये महान् कलह: अभवत् । कलहमग्नौ तौ एतत् विस्मृतवन्तौ यत् ताभ्याम् मूक-बधिरौ इव अभिनय: कृत: इति । तत्र सम्मिलिता: सर्वे जना: जानन्ति स्म यत् तौ वास्तविकरूपेण न मूकबधिरौ, अपि तु दृढकायौ युवकौ, किन्तु अलसौ इति । अत: ते सर्वे कोपेन तौ ताडयित्वा तत: प्रेषितवन्त: ।

**1) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् )**

i) तौ प्रतिदिनं मार्गपार्श्वे उपविश्य किं कुरुत: स्म ?

ii) तयो: मध्ये महान् क: अभवत् ?

iii) बहव: कस्मै भिक्षाम् अयच्छन् ?

**2) पूर्णवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् )**

i) तत्र सम्मिलिता: सर्वे जना: किं जानन्ति स्म ?

ii) कलहमग्नौ तौ किं विस्मृतवन्तौ ?

iii) कुपित: मूक: तं धनिकं किम् उक्तवान् ?

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

**4) यथानिर्देशम् उत्तरत। ( केवलं प्रश्नत्रयम् )**

i) ‘ कुपित: भूत्वा स: तम् धनिकम् उक्तवान् ’ अस्मिन् वाक्ये ‘उक्तवान् ’ इति क्रियापदस्य कर्तृपदं किम् ?

क) कुपित: ख) भूत्वा ग) स: घ) तम्

ii)‘न मूकबधिरौ, अपि तु दृढकायौ युवकौ’ अस्मिन् वाक्ये ‘युवकौ’ इति पदस्य विशेषणपदं किम् ?

क) मूकबधिरौ ख) अपि ग) तु घ) दृढकायौ

iii) ‘प्रयत्नशीलौ’ इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

क) अभिनय: ख) दृढकायौ ग) अलसौ घ) कलहमग्नौ

iv) ‘निकटे’ इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

क) उपविश्य ख) अलसौ ग) क्रुद्ध: घ) पार्श्वे

**अनुच्छेद: - 4**

**अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।**

‘संहति: कार्यसाधिका’ इति वचनं जगति प्रसिद्धमस्ति। एकेन पुरुषेण किमपि महत्कार्यं न साध्यते। यत् किमपि साधयितुं नराणां संघ: परमावश्यक:। सर्वे जानन्ति यत् नैक: तन्तु: किमपि कर्तुं समर्थ:। परन्तु तै: रचिता रज्जु: हस्तिनं बद्धुमपि समर्था भवति। इत्थमेव एकेन तण्डुलेन नहि ओदनं पच्यते। गृहेषु मातर: पितर: भ्रातर: च एकीभूय गृहभारं वहन्त: सुखमनुभवन्ति। एवमेव मनुष्याणां समाजोऽपि देशं जातिञ्च उन्नतिपथं नेतुं समर्थ: भवति। यस्मिन् राष्ट्रे सर्वे मानवा:, सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्टं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति। एकताया: प्रभावेण भारतीया: स्वदेशम् आंगलहस्तात् मोचयितुं समर्था: अभवन्। अत: सदा सर्वै: मानवै: संघे स्थित्वा स्वशक्ते: सञ्चय: कर्तव्य:। अधुनाऽपि यदि वयं संघीभूय स्थास्याम: तर्हि अवश्यमेव शत्रुसैनिकान् जेतुं समर्था: भविष्याम:।

**1) एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् )**

i) यत् किमपि साधयितुं केषां संघ: परमावश्यक: ?

ii) किं वचनं प्रसिद्धमस्ति ?

iii) रज्जु: कं बद्धुमपि समर्था भवति ?

**2) पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नद्वयम् )**

i) कस्या: प्रभावेण भारतीया: स्वदेशम् आंगलहस्तात् मोचयितुं समर्था: अभवन् ?

ii) राष्ट्रं कथं समुज्ज्वलं भवति ?

iii) वयं कथं शत्रुसैनिकान् जेतुं समर्थ: भविष्याम: ?

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।**

**4) यथानिर्देशम् उत्तरत ( केवलं प्रश्नत्रयम् )**

i) 'सर्वे जानन्ति यत् नैक: तन्तु: किमपि कर्तुं समर्थ:' अस्मिन् वाक्ये 'जानन्ति' इति क्रियापदस्य कर्तृपदं किम् ?

क) सर्वे  ख) तन्तु:  ग) यत्  घ) नैक:

ii) 'एकेन पुरुषेण किमपि महत्कार्यं न साध्यते' अस्मिन् वाक्ये 'पुरुषेण' इति पदस्य विशेषणपदं किम् ?

क) एकेन  ख) किमपि  ग) महत्कार्यं  घ) सिध्यति

iii) 'गृहीत्वा' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

क) मोचयितुम्  ख) समुज्ज्वलम्  ग) एकीभूय  घ) परित्यज्य

iv) 'मनुष्यै:' इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

क) महाबलम्  ख) ओदनम्  ग) मानवै:  घ) नेतुम्

**<u>अनुच्छेद: - 5</u>**

**अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।**

प्रातः काले ब्राह्ममुहूर्ते उत्थाय जनाः भ्रमणस्य आनन्दं लभन्ते। अतिमनोहरी प्रातः वेला नित्यं स्वयम् एव आगच्छति। प्रातः काले मनः एकाग्रं भवति। शुद्धवायु: सर्वत्र वहति। रात्रे: नि:शब्दता समाप्यते। पक्षिणां मधुररव: सर्वत्र श्रूयते। उष:काले प्राच्यां दिशि लालिमा प्रस्फुटति। प्रकृति: स्वमोहकं रूपं दर्शयति। सरोवरेषु कमलानि विकसन्ति। तत्र भ्रमरा: गुञ्जन्ति। प्रातः काले उत्थाय भ्रमणं वयोवृद्धानां कृते समुचित: व्यायामः भवति। प्रातः भ्रमणेन मनसि सुसङ्कल्पा: आयान्ति। मनः एकाग्रं भवति। अतः अस्माभिः प्रतिदिनं स्वच्छवायौ बहि: गत्वा प्रातः भ्रमणं करणीयम्।

**1) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् )**

i) प्रातः काले किम् एकाग्रं भवति ?

ii) प्रातः भ्रमणे मनसि के आयान्ति ?

iii) प्रकृति: कीदृशं रूपं दर्शयति ?

**2) पूर्णवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् )**

i) कदा जनाः भ्रमणस्य आनन्दं लभन्ते ?

ii) प्रातः काले उत्थाय भ्रमणं केषां कृते समुचित: व्यायामः भवति ?

iii) प्रतिदिनं स्वच्छवायौ बहि: गत्वा किं नित्यं करणीयम् ?

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

**4) यथानिर्देशम् उत्तरत । ( केवलं प्रश्नत्रयम् )**

i) 'शुद्धवायु: सर्वत्र वहति' अस्मिन् वाक्ये 'वहति' इति क्रियापदस्य कर्तृपदं किम् ?

क) प्रातः ख) शुद्धवायु: ग) सर्वत्र घ) वहति

ii) 'अतिमनोहरी प्रातःवेला नित्यं स्वयम् एव आगच्छति' अस्मिन् वाक्ये 'प्रातः वेला' इति पदस्य विशेषणपदं किम् ?

क) अतिमनोहरी ख) नित्यम् ग) स्वयम् घ) आगच्छति

iii) 'दिनस्य' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

क) उत्थाय ख) दिशि ग) वहत्ति घ) रात्रे:

iv) 'खगाः' इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

क) लालिमा ख) एकाग्रम् ग) पक्षिण: घ) सर्वत्र

**<u>अनुच्छेद: - 6</u>**

**अधोलिखतम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत ।**

एकदा एकस्य मूषकस्य मण्डूकेन सह मैत्री अभवत् । उभौ परस्परं वार्तालापं कृत्वा रत्रौ समयं नयत: स्म । एकस्मिन् दिवसे ताभ्यां विचारितं यदत्र आवयो: भोजनमपि सुलभं नास्ति । अन्यत्र गत्वा जीविकोपार्जनं कुर्व: इति अवधार्य उभौ प्राचलताम् । मार्गे मण्डूकोऽवदत् - यदि दृढेन सूत्रेण आवयो: शरीरे बद्धे स्याताम् , तदा वियोगो न भविष्यति । सर्वत्र सहैव गमिष्याव: । मूषकेण मण्डूकस्य वच: अभिनन्दितम् । इदानीं सूत्रेण शरीरे निबध्य तौ यात्रामार्गे शनै: शनै: प्रसरत: स्म । एक: सर्प: तौ अपश्यत् स: तौ प्रति प्रासरत् । धावने असमर्थौ तौ सर्पेण भक्षितौ । नूनं बुद्धिहीन: विनश्यति ।

**1) एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् )**

i) मूषकस्य केन सह मैत्री अभवत् ?

ii) धावने असमर्थौ तौ केन भक्षितौ ?

iii) उभौ परस्परं कथं समयं नयत: स्म ?

**2) पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नद्वयम् )**

i) एकस्मिन् दिवसे ताभ्यां किं विचारितम् ?

ii) मार्गे मण्डूक: किम् अवदत् ?

iii) नूनं क: विनश्यति ?

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।**

**4) यथानिर्देशम् उत्तरत। (केवलं प्रश्नत्रयम्)**

i) 'सर्वत्र सहैव गमिष्याव:' इति वाक्ये 'गमिष्याव:' इति क्रियापदस्य कर्तृपदं किम् ?

क) आवाम्　　ख) सहैव　　ग) वयम्　　घ) तदा

ii) "यदि दृढेन सूत्रेण आवयो: शरीरे बध्दे स्याताम्" अस्मिन् वाक्ये "सूत्रेण " इति पदस्य विशेषणपदं किम् ?

क) दृढेन　　ख) नित्यम्　　ग) स्वयम्　　घ) आगच्छति

iii) 'शीघ्रम्' इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

क) वच:　　ख) शनै:　　ग) सह　　घ) प्रति

iv) 'अधुना' इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

क) सूत्रेण　　ख) शरीरे　　ग) नूनम्　　घ) इदानीम्

## अपठित-अवबोधनम् - उत्तरकुञ्चिका

**अनुच्छेद: - 1**

**1 ) एकपदेन उत्तरत।**

i) महिलारोप्यम्　　ii) चित्रग्रीव:　　iii) हिरण्यक:

**2 ) पूर्णवाक्येन उत्तरत।**

i) चित्रग्रीव: तान् अवदत् यत् अहो न भेतव्यम्। यूयं सर्वे मिलित्वा पाशं नीत्वा उत्पतत।

ii) हिरण्यक: पाशम् अकृन्तत् ।

iii) कपोतशावका: तण्डुलान् दृष्टवन्त: ।

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

चित्रग्रीवहिरण्यकयो: कथा / सौहृदम्  / ऐक्यमत्यं महाबलम् (एतादृशानि शीर्षकानि)

**4 ) यथानिर्दिशं उत्तरत ।**

i) कपोतशावका:  ii) व्याध:  iii) व्याध:  iv) अध:

**अनुच्छेद: - 2**

**1) एकपदेन उत्तरत ।**

i) हंसकाकौ  ii) काक:  iii) धनुर्बाणम्

**2) पूर्णवाक्येन उत्तरत ।**

i) हंस: परोपकारी दयालु: शान्त: धर्मिष्ठ: सदा प्रसन्न: नीतिमान् च आसीत् ।

ii) परसुखम् असहिष्णु: काक: तस्य मुखे पूरीषोत्सर्गं कृत्वा पलायित: ।

iii) पथिकस्य मुखम् आतपेन तप्तम् अवलोक्य वृक्षस्थितेन हंसेन पक्षौ प्रसारितौ ।

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत**

त्यज दुर्जनसंसर्गम् / हंसकाकौ / असूयालु: काक: (अथवा अन्यत् उचितं शीर्षकम् )

**4 ) यथानिर्देशम् उत्तरत ।**

i) काक:  ii) धर्मिष्ठम्  iii) असहिष्णु:  iv) वृक्षे

**अनुच्छेद: - 3**

**1) एकपदेन उत्तरत ।**

i) भिक्षाटनं  ii) कलह:  iii) बधिराय

**2) पूर्णवाक्येन उत्तरत ।**

i) तत्र सम्मिलिता: सर्वे जना: जानन्ति स्म यत् तौ वास्तविकरूपेण न मूकबधिरौ, अपि तु दृढकायौ युवकौ, किन्तु अलसौ इति ।

ii) कलहमग्नौ तौ एतत् विस्मृतवन्तौ यत् ताभ्याम् मूकबधिरौ इव अभिनय: कृत: ।

iii) कुपित: मूक: तम् धनिकम् उक्तवान् - "भो: महोदय! तस्मै किमपि मा ददातु । यत: स: बधिर: नास्ति" इति ।

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

मूकबधिरौ / क्रोधस्य फलम् / भिक्षुकद्वयम् (अथवा अन्यत् उचितं शीर्षकम् )

**4) यथानिर्देशम् उत्तरत ।**

i) स:     ii) दृढकायौ     iii) अलसौ     iv) पार्श्वे

**अनुच्छेद: - 4**

**1) एकपदेन उत्तरत ।**

i) नराणाम्     ii) संहति: कार्यसाधिका     iii) हस्तिनं

**2) पूर्णवाक्येन उत्तरत ।**

i) एकताया: प्रभावेण भारतीया: स्वदेशम् आंगलहस्तात् मोचयितुं समर्था: अभवन् ।

ii) यस्मिन् राष्ट्रे सर्वे मानवा:, सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्टं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति ।

iii) यदि वयं संधीभूय स्थास्याम: तर्हि अवश्यमेव शत्रुसैनिकान् जेतुं समर्था: भविष्याम: ।

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

संहति: कार्यसाधिका/ एकताया: प्रभाव: / संघे शक्ति: (अथवा अन्यत् उचितं शीर्षकम् )

**4) यथानिर्दिशम् उत्तरत ।**

i) सर्वे     ii) एकेन     iii) परित्यज्य     iv) मानवै:

**अनुच्छेद: - 5**

**1) एकपदेन उत्तरत ।**

i) मनः     ii) सुसङ्कल्पा:     iii) स्वमोहकम्

**2) पूर्णवाक्येन उत्तरत ।**

i) प्रातः काले ब्राह्ममुहूर्ते उत्थाय जनाः प्रातः भ्रमणस्य आनन्दं लभन्ते ।

ii) प्रातः काले उत्थाय प्रातः भ्रमणं वयोवृद्धानां कृते समुचित: व्यायामः भवति ।

iii) अतः अस्माभिः प्रतिदिनं स्वच्छवायौ बहि: गत्वा प्रातः भ्रमणं नित्यं करणीयम् ।

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत ।**

प्रातः भ्रमणम् / प्रातः भ्रमणम् स्वास्थ्य वर्धकम् (अथवा अन्यत् उचितं शीर्षकम् )

**4) यथानिर्देशम् उत्तरत ।**

i) शुद्धवायु:   ii) अतिमनोहरी     iii) रात्रे:     iv) पक्षिण:

**अनुच्छेदः - 6**

**1) एकपदेन उत्तरत ।**

i ) मण्डूकेन ii) सर्पेण iii) वर्तासु

**2) पूर्णवाक्येन उत्तरत ।**

i) एकस्मिन् दिवसे ताभ्यां विचारितं यदत्र आवयो: भोजनमपि सुलभं नास्ति। अन्यत्र गत्वा जीविकोपार्जनं कुर्वः इति।

ii) मार्गे मण्डूकोऽवदत् - "यदि दृढेन सूत्रेण आवयो: शरीरे बध्दे स्याताम्, तदा वियोगो न भविष्यति। सर्वत्र सहैव गमिष्याव:" इति।

iii) नूनं बुध्दिहीन: विनश्यति।

**3) अनुच्छेदस्य कृते उचितं शीर्षकं लिखत।**

बुद्धिहीन: विनश्यति / मूषकमण्डूकयो: कथा / दुर्बुद्धि: नश्यति (अन्यत् उचितं शीर्षकम् )

**4) यथानिर्देशम् उत्तरत।**

i) आवाम् ii) दृढेन iii) शनै: iv) इदानीम्



## ख - खण्डः

## रचनात्मकं कार्यम्

# पत्रलेखनम्

पत्रम् अस्माकं भावानां विचाराणां अभिव्यक्तये उत्कृष्टं माध्यमम् अस्ति । दूरे स्थितानां संबन्धीनां मित्राणां वा कुशलान्वेषणाय अथवा तेषां कृते अस्माकं विशेषान् ज्ञापयितुम् अपि च कार्यालय-सम्बन्धिकार्याय च वयं पत्राणां प्रयोगं कुर्मः। एतेषाम् उपयोगानाम् आधारेण पत्राणां द्विधा विभागः कृतः अस्ति।

अ) औपचारिकं पत्रम् - कार्यलयसम्बन्धिव्यवहाराय यत् पत्रं लिख्यते तत् औपचारिकं पत्रं भवति।

आ) अनौपचारिकं पत्रम् - अस्माकं सम्बन्धीनां मित्राणां वा परिचित-अपरिचित-व्यक्तीनां कृते यत् पत्रं लिख्यते तत् अनौपचारिकं पत्रं भवति।

**अस्माकं पाठ्यक्रमे किम् अस्ति ?**

सङ्केताधारितम् औपचारिकं पत्रम् अथवा अनौपचारिकं पत्रम् (मञ्जूषायाः सहायेन पत्रं पूरणीयम्)

अस्माकं द्वितीयसत्रस्य पाठ्यक्रमे एतत् एव लिखितम् अस्ति।

- सङ्केताधारितम् – Signal-based (इशारों से युक्त)
- औपचारिकम् अथवा अनौपचारिकं पत्रम् – Formal or In-Formal Letters*
  (*अद्यपर्यन्तं सी.बी.एस्.ई. परीक्षायां ये पत्राधारिताः प्रश्नाः पृष्टाः ते सर्वेऽपि सामान्यतः (95%) अनौपचारिक-पत्राणि एव ।)

अतः वयं अनौपचारिकपत्रे अधिकं ध्यानं दद्मः। किन्तु तेन सह औपचारिकपत्राणाम् अपि अभ्यासं कुर्मः।

**अभ्यासात् पूर्वम् एते विषयाः मनसि बुद्धौ च स्थिरप्रतिष्ठिताः भवेयुः ।**

सङ्केताधारितम् – Signal-based (इशारों से युक्त)

**सङ्केताः के ?**

**भवान् / भवती गायत्री । भवत्याः मित्रं फ़ात्तिमा गया-नगरस्थे महाविद्यालये पठति । भवत्याः विद्यालये संस्कृतसप्ताहः आचरितः । अस्य वर्णनं कृत्वा मित्रं प्रति लिखिते पत्रे मञ्जूषायाः सहायेन रिक्तस्थानानि पूरयत ।**

| |
|---|
| संस्कृतेन, छात्राः, संस्कृतसप्ताहस्य, गायत्री, कुशलिनः, प्रथमस्थानं प्रतियोगिताः, 25 सितम्बर् 2018, फ़ात्तिमे, प्राचार्येण |

अ) प्रश्नः अवश्यं पठनीयः। प्रश्नस्य पठनेन किं प्रयोजनम् ? ! **तद्यथा -**

प्रश्ने अस्मिन् पञ्च भागाः सन्ति -

| | | |
|---|---|---|
| **1) प्रेषयितुः नाम** | **-** | **प्रेषयितुः नाम गायत्री** |
| **2) स्वीकर्तुः नाम** | **-** | **स्वीकर्तुः नाम फात्तिमा** |
| **3) प्रेषयितुः स्थानम्** | **-** | **कन्याकुमारीस्थितः विवेकानन्दविद्यालयः** |
| **4) स्वीकर्तुः स्थानम्** | **-** | **गया** |
| **5) विषयः** | **-** | **संस्कृतसप्ताहाचरणस्य विवरणम्** |

एतेषु यत्किमपि पदं विकल्पेषु (Options) अस्ति वा इति परिशोधयन्तु।। ते च शब्दाः - संस्कृतसप्ताहस्य, गायत्री, फात्तिमे च (**विकल्पेषु यानि पदानि स्थूलाक्षरे निर्दिष्टानि**)। तन्नाम **यदि वयं प्रश्नं पठामः तर्हि कानिचन उत्तराणि विकल्पेभ्यः प्राप्तुं शक्नुमः**। अपि च **हरितवर्णे** एकः विकल्पः अस्ति। सः तु दिनाङ्कस्य / तिथेः निर्देशः अस्ति।

**एतत् अवश्यं मनसि धारणीयं यत् -**

**1) पत्रे सर्वप्रथमः अंशः भवति -** प्रेषयितुः स्थानस्य निर्देशः भवति, यथा – कन्याकुमारीतः / गोदावरीछात्रावासात् / परीक्षाभवनतः / मुम्बैतः / नवोदयविद्यालयात् / काठ्मण्डूतः / तिरुवनन्तपुरात् / पूणेतः / कोल्कत्तातः। (* सामान्यतः एकस्य स्थानस्य नाम्नः पश्चात् तः इति आत् इति वा अस्ति चेत् प्रश्नम् अपि पठित्वा निर्णयः करणीयः यत् प्रेषयितुः स्थानस्य निर्देशः वा इति।)।

**2) पत्रे द्वितीयः अंशः भवति -** दिनाङ्कः / तिथिः (* यदि विकल्पेषु दिनाङ्कस्य निर्देशः अस्ति तर्हि तत् अस्माकं सौभाग्यम् इति चिन्तनीयम्। सः दिनाङ्कः तत्स्थाने लेखनीयम्।)

**3) पत्रे तृतीयः अंशः भवति -** स्वीकर्तुः संबोधनम्। अत्र अंशद्वयं वर्तते।

1) विशेषणम् - प्रिय, आदरणीय, समादरणीय, सम्माननीय, माननीय, पूज्य, मान्य प्रियमित्र इत्यादयः।

2) विशेष्यम् - गायत्रि, मित्र, सखि, प्राचार्यमहोदय, पितृवर्य, पितः, मातः, भगिनि, भ्रातः संपादकमहोदय इत्यादयः।

**4) पत्रे चतुर्थः अंशः भवति -** स्वीकर्तुः अभिवादनम्

सस्नेहं वन्दनानि, सादरं प्रणमामि, सविनयं अभिवादये, सादरं प्रणामाः, प्रणतीनां शतम्, सस्नेहं नमः, सप्रेम नमस्ते, सादरं नमो नमः, शुभाशिषः इत्यादयः।

**5) पत्रे पञ्चमः अंशः भवति -** कुशलान्वेषणम्

अत्र कुशलं तत्रास्तु, अहमत्र कुशली अस्मि, तत्रापि तथा इति चिन्तयामि, सर्वगतं कुशलं कामये, अत्र कुशलं तत्राप्यस्तु, अहमत्र कुशलिनी अस्मि, तत्रापि सर्वे कुशलिनः इति मन्ये।।

**6) पत्रे षष्ठः अंशः भवति -** विषयस्य अवतरणम्

अत्रापि पूर्वं प्रदर्शितम् इव प्रश्नस्य विकल्पानां च पठनेन एकं वा द्वित्राणि वा उत्तराणि वयं प्राप्तुं शक्नुमः। अपि च विषये रिक्तस्थानात् परं पूर्वं वा विशेषण-विशेष्यस्य उपस्थितिः अस्ति वा इति निर्णयेन अपि कानिचन उत्तराणि सुलभतया लेखितुं शक्नुमः।।

**7) पत्रे सप्तमः अंशः भवति -** सामान्यतः सर्वेषु अनौपचारिकपत्रेषु स्वीकर्तुः पित्रोः आशीर्वादं प्राप्तुं प्रेषयिता तयोः चरणयोः प्रणामान् अर्पयति। तद्यथा –

मातृपितृचरणयोः मम प्रणामाः। मातापित्रोः कृते मम प्रणामाः। पित्रोः चरणयोः प्रणामाः। मातरं पितरं च मम कुशलान्वेषणं प्रणामान् च निवेदयतु। पित्रोः कृते प्रणामाः।

**8) पत्रे अष्टमः अंशः भवति -** प्रेषयितुः नामोल्लेखः (पत्रस्य अन्तिमः अंशः अयम् )

भवतां प्रियपुत्री गिरिजा, भवत्याः पुत्री सुकन्या,

भवतः मित्रं रवीन्द्रः, भवदीयं मित्रम्, सौरभः,

भवतः अभिन्नमित्रं स्वरूपः, सस्नेहं भवदीया अनुपमा

भवताम् आज्ञाकारी शिष्यः महेश: इत्यादय:।

# अभ्यासार्थं प्रश्नाः

## अ) अनौपचारिकं पत्रम्

1. भवान् / भवती गिरिजा । राजस्थाने छात्रावासे वसति । शैक्षिकभ्रमणस्य शुल्कं प्रार्थयित्वा स्वपितरं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत ।

| प्रणामान् , अध्यापकाः, धनादेशद्वारा, पञ्चशतम्, द्वीपे, इच्छामि, नेष्यन्ति, प्रणमामि, आगामिमासस्य, अर्धवार्षिकपरिक्षा |
|---|

दिनाङ्कः - 20/12/2021

माननीयाः पितृवर्याः !

सादरं (i) ..................

अत्र कुशलं तत्राप्यस्तु । मम (ii) .................. समाप्ता । परीक्षापत्राणि अतिशोभनानि आसन् । परिक्षापरिणामश्च (iii) .................. प्रथमसप्ताहे उद्घोषयिष्यते । अत्रान्तरे, अस्माकं विद्यालयस्य (iv) .................. अस्मान् शैक्षणिकभ्रमणाय मुम्बईतः नातिदूरे एकस्मिन् (v) .................. स्थिताम् एल्लोरा-गुहां प्रति (vi) .................. । अत्र प्राचीनानि शिवमन्दिराणि सन्ति । अहमपि तत्र गन्तुम् (vii) .................. । एतदर्थम् अस्माभिः (viii) .................. रुप्यकाणि दातव्यानि सन्ति । कृपया (ix) .................. उपर्युक्तां राशिं प्रेषयित्वा माम् अनुगृहीतां कुर्वन्तु । गृहे सर्वेभ्यः मम (x) .................. निवेदयतु ।

भवतां प्रियपुत्री

गिरिजा

2. अध्ययनविषये पुत्र्या मातरं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत ।

| कुशलिनौ, प्रतियोगिताः, कुशलिनी, परिणामः, दुःखिता, मतिम्, प्रणामाः, करणीया, खेलप्रतियोगितासु, समयः |
|---|

परीक्षाभवनतः
दिनाङ्कः ..................

पूज्यमातृचरणाः !
सादरप्रणामाः ।

अत्र अहं (i) ..................। आशासे भवती पितृमहोदयः च (ii) .................. स्तः । मातः! अहं जानामि यद् भवती मम अर्धवार्षिकपरीक्षायाः परिणामकारणात् (iii) .................. अस्ति इति। अत्र चिन्ता न (iv) ..................। प्रथमसत्रे तु अहं (v) .................. रता आसम् । पठनाय तु (vi) .................. एव न आसीत् । परम् अधुना तु सर्वाः (vii) .................. समाप्ताः । अद्य आरभ्य अहं केवलं पठने एव (viii) .................. विधास्यामि । आशासे वार्षिकपरीक्षायां मम (ix) .................. भवताम् आशानुकूलः भविष्यति । मातृपितृचरणयोः (x) .................. ।

भवत्याः पुत्री
सुकन्या

3. भवान् / भवती रवीन्द्रः। मुम्बै नगरे वसति । भवान् गतसप्ताहे संस्कृतसंभाषणशिबिरे भागं गृहीतवान्। तदधिकृत्य मित्रं रमेशं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत।
(½ X 10 = 5)

| अभिनयम् , अभ्यासम् , प्रति, विद्यालये, मञ्चनम्, आयोजितम्, करतलध्वनिम्, करोमि, रमेश , करोतु |
|---|

मुम्बैतः
तिथिः ..................

प्रिय मित्र (i) ..................
सस्नेहं नमः।

अत्र कुशलं तत्रास्तु। गतसप्ताहे अस्माकं (ii) .................. संस्कृतसम्भाषणशिबिरम् (iii) .................. आसीत् । चतुर्दशदिनानि यावत् वयं संस्कृतसंभाषणस्य (iv) .................. अकुर्म । तत्र एकस्याः लघुनाटिकायाः (v) .................. अपि अभवत् । अहं तु विदूषकस्य (vi) .................. कृतवान् । सर्वे जनाः हसित्वा हसित्वा (vii) .................. अकुर्वन् । अहम् इदानीं सर्वदा संस्कृतेन एव संभाषणम् (viii) ..................। भवान् अपि संस्कृतेन संभाषणस्य अभ्यासं (ix) ..................। पितरौ (x) .................. मम प्रणामाञ्जलिं निवेदयतु ।

भवतः मित्रम्
रवीन्द्रः।

4. भवान्/भवती सौरभः। भवतः/भवत्याः विद्यालये वार्षिकोत्सवे संस्कृतनाटकस्य मञ्चनं भविष्यति। तदर्थं स्वमित्रं गौरवं प्रति लिखिते निमन्त्रणपत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत ।

| |
|---|
| द्रष्टुम्, दिल्लीतः, कुशलम्, प्रणामाञ्जलिः, अस्माकम्, मञ्चनम्, गौरव, दीपावलीपर्वणः, करिष्यामि, सौरभः |

(i) ..................

16/12/2020

प्रिय मित्र (ii) ..................,

सस्नेहं वन्दनानि।

दीपावलीपर्वणः शुभाशयाः। अत्र सर्वगतं (iii) ..................। भवान् अपि कुशली इति मन्ये । (iv) .................. विद्यालयस्य वार्षिकोत्सवः (v) .................. शुभावसरे भविष्यति । तत्र अस्माकं पुस्तकस्य “विचित्रः साक्षी” इति पाठस्य (vi) .................. भविष्यति। अहं तस्मिन् नाटके न्यायाधीशस्य अभिनयं (vii) .................। भवान् अवश्यमेव तत् (viii) ................ आगच्छतु । तेन मम उत्साहवर्धनं भविष्यति । सर्वेषां कृते मम (ix) .................. निवेद्यताम् ।

भवदीयं मित्रम्

(x) ..................

5. भवान् / भवती सुरेशः। भवतः अनुजः जयपुरे छात्रावासे वसति । अनुजं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत ।

| |
|---|
| लेखिष्यति, जयपुरतः, सम्यक् , कुशली , अनुज , आगमिष्यति कुशलम्, अग्रजः, स्मरतः, आगन्तुम् |

(i) ..................

तिथिः ..............

प्रिय (ii) ..................

शुभाशीषः।

अहमत्र (iii) ........................... । त्वमपि तत्र कुशली असि इति मन्ये । मातापितरौ त्वां सर्वदा (iv) .................. । अग्रजा आगामिसप्ताहे गृहम् (v) ..................। त्वम् अपि यदि

(vi) .................. इच्छसि तर्हि आगच्छ । एतद्विषये अग्रजा अपि पत्रं (vii) ..................। तव अध्ययनं (viii) .................. चलति इति वयं चिन्तयामः । अन्यत् सर्वं (ix) .................. । सर्वेभ्यः मित्रेभ्यः मदीयाः शुभकामनाः।।

त्वदीयः (x) ..................

सुरेशः

6. भवान्/भवती स्वरूपः । भवतः/भवत्याः मित्रम् आकाशः । काठ्मण्डू-केन्द्रीयविद्यालये पठति । भवतः विद्यालये स्वच्छता-पक्षाचरणं जातम् । तस्य वर्णनं कुर्वन् मित्रं प्रति लिखिते पत्रे मञ्जूषापदसाहाय्येन रिक्तस्थानानि पूरयत ।

| |
|---|
| गतमासे, कुशली, स्वरूपः, उद्घाटनं, सन्देशः, प्रातःकाले, स्वच्छतां, 22 नवम्बर् 2018, लघुनाटकस्य, आकाश |

काठ्मण्डूतः

(i) ............................

प्रियमित्र (ii) ...........................

सप्रेम नमस्ते ।

अत्र कुशलम् । भवान् अपि (iii) ..................... इति मन्ये । अस्माकं विद्यालये (iv) ..................... स्वच्छतापक्षस्य आचरणं जातम् । विद्यालयस्य प्राचार्येण स्वच्छता-पक्षाचरणस्य (v) ..................... कृतम् । प्रातःकालीनसभायां मम कक्षाछात्रैः स्वच्छभारतस्य प्राधान्यविषये एकस्य (vi) ..................... प्रस्तुतिः कृता । प्रतिदिनं (vii) ..................... वयम् अस्माकं कक्षायाः विद्यालयस्य च स्वच्छतां कृतवन्तः। स्काउट् एवं गइड् छात्राः वयं समीपस्थम् आतुरालयं गत्वा (viii) ..................... कृतवन्तः । एवं स्वच्छतायाः (ix) ..................... सर्वेषां छात्राणां मनसि प्रतिष्ठितः अभवत् । मातृपितृचरणयोः मम प्रणामाः।

भवतः अभिन्नमित्रं

(x) .....................

7. भवान् / भवती अनुपमा। भवतः/भवत्याः मित्रम् अर्णवः चेन्नै नगरे पठति। स्वकीयविद्यालयस्य नूतनभवनस्य वर्णनं कृत्वा लिखिते पत्रे रिक्तस्थानानि मञ्जूषायां प्रदत्तपदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।

| |
|---|
| प्रयोगशालाः, उद्घाटनम्, कुशली, 12/12/2020, विद्यालयभवनम्, क्रीडाङ्गणम्, विद्यालयस्य, सङ्गणकम्, अर्णव, अतिसुन्दरम् |

तिरुवनन्तपुरतः

(i) ......................

प्रिय मित्र (ii)......................,

सस्नेहं वन्दनानि।

अत्र सर्वगतं कुशलं, भवान् अपि तत्र (iii)...................... इति विश्वसिमि। गत सप्ताहे अस्माकं (iv) .................. नूतनभवनप्रवेशः सम्पन्नः जातः। मित्र ! विद्यालयस्य नूतनं भवनं (v) ................ विद्यते। केरलस्य राज्यपालः विद्यालयस्य नूतनभवनस्य (vi) ...................... दीपप्रज्ज्वालनेन कृतवान्। पुरातनभवनस्य अपेक्षया अनेकाः सुविधाः सन्ति नूतने भवने। विशालं (vii) ....................... दृष्ट्वा वयं सर्वे प्रमुदिताः अभवन्। सङ्गणक-प्रयोगशालायां प्रत्येकस्य छात्रस्य कृते प्रत्येकं (viii) ...................... विद्यते। अन्याः (ix) ...................... अपि सर्वविध-सुविधाभिः सम्पन्नाः। विद्यालयं पुरतः विद्यमानम् उद्यानं सर्वेषां मानसं हरति। अगामिनि अवकाशे भवान् निश्चयेन अस्माकं नूतनं (x) ................... द्रष्टुम् आगच्छतु। मातापित्रोः कृते मम प्रणामाः।

सस्नेहं भवदीया

अनुपमा

8. भवान् / भवती भास्करः। भवतः मित्रं गीतिका पूने-नगरस्थे विद्यालये पठति। भवतः विद्यालये गान्धिजयन्ती वैभवेन आचरिता। तस्याः वर्णनं कुर्वन् मित्रं प्रति लिखिते पत्रे मञ्जूषापदसाहाय्येन रिक्तस्थानानि पूरयत।

| |
|---|
| जीवनादर्शानां, छात्राः, प्रतियोगिताः, गान्धिजयन्ती, अविस्मरणीयः, कुशलम्, पुष्पाणि, पूनेतः, गीतिके, प्राचार्येण |

(i) ................................

03 सितम्बर् 2019

प्रियसखि (ii) ....................

सप्रेम नमस्ते।

अत्र सर्वेषां (iii) .................... । भवती अपि कुशलिनी इति मन्ये । अस्माकं विद्यालये गतदिने (iv) ................. महता वैभवेन आचरिता । विद्यालयस्य (v) ................. दीपज्वालनं कृत्वा राष्ट्रपितुः महात्मा गान्धिनः चित्रे (vi) ............ अर्चयित्वा च कार्यक्रमस्य उद्घाटनम् कृतम् । प्राचार्यः स्वीये भाषणे महात्मागान्धिनः (vii) ................. विषये छात्रान् उद्बोधितवान् । अनेन सह विभिन्नाः (viii) ...................... अपि आयोजिताः आसन् । स्वच्छभारताभियानस्य अनुबन्धरूपेण (ix) ................. शिक्षकाः च पदसञ्चलनं कुर्वन्तः प्लास्टिक-अवकराणां सञ्चयं कृतवन्तः । एवं गन्धिजयन्ती अस्माकं छात्रजीवने (x) ................. कार्यक्रमः अभवत् । पित्रोः चरणयोः प्रणामाः ।

भवत्याः अभिन्नमित्रम्

भास्करः

9. भवान् / भवती गायत्री । भवत्याः कन्याकुमारी-स्थिते विवेकानन्द विद्यालये संस्कृतसप्ताहः आचरितः। भवत्याः मित्रं फात्तिमा गया-नगरस्थे महाविद्यालये पठति । संस्कृतसप्ताहस्य वर्णनं कृत्वा मित्रं प्रति लिखितं पत्रं मञ्जूषापदसाहाय्येन पूरयित्वा पुन: लिखत ।

| |
|---|
| संस्कृतेन, छात्राः, संस्कृतसप्ताहस्य, गायत्री, कुशलिनः, प्रथमस्थानम्, प्रतियोगिताः, 25 सितम्बर् 2018, फात्तिमे, प्राचार्य: |

कन्याकुमारीतः

(i) ................................

प्रियसखि (ii) ..........................

सप्रेम नमस्ते।

अत्र सर्वे (iii) ..................... । भवती अपि कुशलिनी इति मन्ये । अस्माकं विद्यालये गतमासे (iv) ..................... आचरणं जातम् । विद्यालयस्य (v) ..................... संस्कृतसप्ताहाचरणस्य उद्घाटनं कृतवान् । एकं सप्ताहं यावत् प्रातःकालीनसभा (vi) ..................... एव प्रवृत्ता । 'संस्कृतं

तथा विज्ञानम्’ इति विषये काचित् प्रदर्शनी अपि आयोजिता आसीत् । छात्राणां तथा शिक्षकाणां कृते विभिन्नाः (vii) .................. आयोजिताः आसन् । संस्कृतप्रश्नोत्तरीस्पर्धायां मम गणः (viii) .................... प्राप्नोत् । समापनकार्यक्रमे (ix) ..................... मनोरञ्जनकार्यक्रमान् प्रस्तुतवन्तः । शिष्टं सर्वम् अग्रिमपत्रे लेखिष्यामि । मातृपितृचरणयोः मम प्रणामाः ।।

भवत्याः अभिन्नमित्रम्

(x) .....................

10. भवान्/भवती संविदा । कोल्कत्तायां वसति । भवतः/भवत्याः मित्रं जोसफः केरले तिरुवनन्तपुरे टेक्नोपार्क् मध्ये कार्यं करोति । भवत्याः विवाहार्थं तं निमन्त्रयितुं लिखिते पत्रे मञ्जूषासाहाय्येन रिक्तस्थानानि पूरयत ।

| |
|---|
| करोति, निश्चयेन, प्रियमित्र, अनुग्रहः, विवाहः, कोल्कत्तातः<br>कुशलिनः, मैत्री, भवतः, प्रमुखे |

(i)...................

04/01/2022

(ii) .......................... जोसफ!

सस्नेहं नमस्ते ।

अत्र सर्वे (iii) ................. । भवान् अपि कुशली इति विश्वसिमि । षष्ठकक्षायां आवयोः (iv) ................ आरब्धा आसीत् । तदनन्तरम् मम गार्हिकमित्राणि च अभवन् (v) ................ गृहसदस्याः । इदानीम् अहं पत्रमिदं मम जीवनस्य (vi) ................ दिने भवन्तं सपरिवारं निमन्त्रयितुं लिखामि । मम (vii) ................ निश्चितः । भवान् इव मे वर: अपि सूचना-प्रौद्योगिक-क्षेत्रे एव कार्यं (viii) ................ । अहम् आशासे यत् भवान् (ix) ................ सपरिवारं मम विवाहकार्यक्रमे भागं ग्रहीष्यति इति । भवतः मातापित्रोः अपि (x) ................ मम कृते मुख्यः अस्ति । सर्वेभ्य: पुनः पुनः प्रणामाः।

भवत: अभिन्नमित्रम्

संविदा

### आ) औपचारिकं पत्रम्

1. भवतः / भवत्याः नाम निमिषा। वाराणस्यां प्रियदर्शिनी विद्यालये पठति। स्काउट् एवं गाइड् शिबिरे भागं ग्रहीतुम् प्रचार्यं प्रति लिखिते प्रार्थनापत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत।

| |
|---|
| अस्माकम्, निवेदयामि, निमिषा, अहम्, तृतीयसोपानशिबिरे, समादरणीय, प्रार्थयामि, वाराणसीतः, मासस्य, अवसरम् |

(i) ……………..

दिनाङ्कः - ....................

(ii) …………….. प्राचार्यमहोदय !

सादरं प्रणमामि।

सविनयं (iii) …………….. यत् स्काउट् एवं गाइड् संघटनेन अस्य (iv) …………….. पञ्चदश-दिनाङ्कात् आरप्स्यमाणे (v) …………….. अहं भागं ग्रहीतुम् इच्छामि। षष्ठकक्षातः (vi) …………….. अस्मिन् सङ्घटने कार्यरता अस्मि। भविष्यकाले राष्ट्रपतिपुरस्कारं प्राप्य (vii) …………….. विद्यालयस्य कीर्तिं संवर्धयितुं (viii) …………….. ददातु इति सादरं सविनयं च (ix) …………….. ।

भवताम् आज्ञाकारिणी छात्रा

(x) ……………..

2. भवतः / भवत्याः नाम गौतमः। अनन्तपुरे अमृतभारती-विद्यालये पठति। संभाषणसन्देश: नाम मासपत्रिकाया: सम्पादकाय लिखितं प्रार्थनापत्रं मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा पुनः लिखत।

(½ X 10 = 5)

| |
|---|
| महत्त्वम्, प्रकाशितानि, सम्पादकवर्य , लिखितम्, गौतमः, मासपत्रिकायाम् यथोचितम्, धन्यवादान्, अनन्तपुरात्, प्रकाशयतु |

(i) ……………..

दिनाङ्कः - ....................

मान्य (ii) …………….. !

सादरं प्रणामा: ।

भवतां (iii) …………….. मम कानिचन लेखानि पूर्वं (iv) …………. आसन् । तदर्थं हार्दिकान् (v) …………….. समर्पयामि। एतेन पत्रेण सह पर्यावरणस्य (vi) …………….. अधिकृत्य (vii) …………….. पृष्ठद्वयात्मकं लेखं प्रेषयामि । तत् सम्यक् अवलोक्य पत्रिकायां (viii) …………….. इति सादरं प्रार्थयामि । लेखे (ix) …………….. परिवर्तनं परिष्कारं च कर्तुं भवन्तः अर्हन्ति ।

भवतां विश्वासपात्रम्

(x) ……………..

3. भवतः / भवत्याः नाम विजिता । भवत्याः पितरौ कृषिकौ । भवती केरले राजकीयविद्यालये पठति। विद्यालयशुल्क-मोचनाय प्राचार्यं प्रति लिखिते प्रार्थनापत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखत । (½ X 10 = 5)

| |
|---|
| धनम्, मोचयतु, सप्तमकक्षायाम्, आज्ञाकारिणी, व्यवहारपत्राणाम्, सविनयम्, नष्टानि, कृषिकौ, संयोजितानि, पत्तनंतिट्टातः |

(i) ……………..

दिनाङ्कः - ....................

आदरणीयाः प्राचार्यमहोदयाः !

सादरं नमो नमः।

भवतां विद्यालये (ii) …………….. पठन्ती विजिता अस्मि अहम् । मम पितरौ सामान्यौ (iii) …………….. भवतः । मासद्वयात् पूर्वं केरले सर्वत्र महाप्रलयः जातः इति भवन्तः जानन्ति एव । तस्मिन् अस्माकं सस्यानि सर्वाण्यपि (iv) ……................. जातानि । अधुना प्रतिदिनव्ययनिमित्तमपि मम पित्रोः सकाशे (v) ……….. नास्ति । अतः अहं (vi) ……..…..

प्रार्थयामि यत् कृपया विद्यालयशुल्कप्रदानात् मां (vii) …………….. इति । आवश्यकानां (viii) …………….. प्रतिकृतयः अनेन पत्रेण साकं (ix) …………….. सन्ति ।

सधन्यवादम्

भवदीया (x) …………….. छात्रा

विजिता

4. भवतः / भवत्याः नाम आनन्दः। भवतः पुत्रः केन्द्रीयविद्यालये पठति । भवतः स्थानान्तरणं जातम् इति हेतोः पुत्रस्य विद्यालयस्थानान्तरणाय प्रचार्यं प्रति लिखिते प्रार्थनापत्रे मञ्जूषायां प्रदत्तशब्दैः रिक्तस्थानानि पूरयित्वा पुनः लिखित । (½ X 10 = 5)

| |
|---|
| अधुना, परिवारसदस्यान्, विश्वासपात्रम्, पठति, भवतः, अहम्, 10/12/2021, अनुगृह्णातु, स्थानान्तरणम्, वन्दनानि |

हैदराबाद्तः

(i) ……………..

आदरणीय प्राचार्यमहोदय!

सादरं (ii) ……………..।

मम पुत्रः सुकेशः (iii) …………. विद्यालये अष्टमकक्षायां 'ब' विभागे (iv) ………. । तस्य पञ्जीकरणसंख्या 3483 अस्ति । (v) …………….. हैदराबाद्-प्रदेशस्थे भारतीयवित्तकोशे कार्यनिरतः अस्मि । (vi) …………. हैदराबाद्तः बङ्गलूरु नगरं प्रति मम (vii) …………….. जातम् अस्ति । मया सह मम (viii) …………….. अपि अहं नूतनं स्थानं प्रति नेतुम् इच्छामि । अतः मम पुत्रस्य स्थानान्तरणपत्रं प्रदाय तम् (ix) …………….. इति सादरं प्रार्थयामि ।

सधन्यवादम्

भवतः (x) ……………..

आनन्दः

# पत्रलेखनम् - उत्तरकुञ्चिका

## अ) अनौपचारिकं पत्रम्

**1.** 1. प्रणमामि 2. अर्धवार्षिकपरिक्षा 3. आगामिमासस्य 4. अध्यापकाः 5. द्वीपे 6. नेष्यन्ति 7. इच्छामि 8. पञ्चशतम् 9. धनादेशद्वारा 10. प्रणामान्

**2.** 1.कुशलिनी 2. कुशलिनौ 3. दु:खिता 4. करणीया 5. खेलप्रतियोगितासु 6. समय: 7. प्रतियोगिताः 8. मतिम् 9. परिणामः 10. प्रणामाः

**3.** 1. रमेश 2. विद्यालये 3. आयोजितम् 4. अभ्यासम् 5. मञ्चनम् 6. अभिनयम् 7. करतलध्वनिम् 8. करोमि 9. करोतु 10. प्रति

**4.** 1. दिल्लीतः 2. गौरव 3. कुशलम् 4. अस्माकम् 5. दीपावलीपर्वणः 6. मञ्चनम् 7. करिष्यामि 8. द्रष्टुम् 9. प्रणामाञ्जलिः 10. सौरभः

**5**. 1. जयपुरतः 2. अनुज 3. कुशली 4. स्मरतः 5. आगमिष्यति 6. आगन्तुम् 7. लेखिष्यति 8. सम्यक् 9. कुशलम् 10. अग्रजः

**6**. 1. 22 नवम्बर् 2018 2. आकाश 3. कुशली 4. गतमासे 5. उद्घाटनम् 6. लघुनाटकस्य 7. प्रातःकाले 8. स्वच्छतां 9. सन्देशं 10. स्वरूपः

7. 1. 12/12/2020 2. अर्णव 3. कुशली 4. विद्यालयस्य 5. अतिसुन्दरम् 6. उद्घाटनम् 7. क्रीडाङ्गणम् 8. सङ्गणकम् 9. प्रयोगशालाः 10. विद्यालय-भवनम्

8. 1. पूणेतः 2. गीतिके 3. कुशलम् 4. गान्धिजयन्ती 5. प्राचार्येण 6. पुष्पाणि 7. जीवनादर्शानाम् 8. प्रतियोगिताः 9. छात्राः 10. अविस्मरणीयः

9. 1. 25 सितम्बर् 2018 2. फात्तिमे 3. कुशलिनः 4. संस्कृतसप्ताहस्य 5. प्राचार्य: 6. संस्कृतेन 7. प्रतियोगिताः 8. प्रथमस्थानम् 9. छात्राः 10. गायत्री

10. 1. कोल्कत्तातः 2. प्रियमित्र 3. कुशलिनः 4. मैत्री 5. भवतः 6. प्रमुखे 7. विवाहः 8. करोति 9. निश्चयेन 10. अनुग्रहः

## अ) अनौपचारिकं पत्रम्

1. 1. वाराणसीतः 2. समादरणीय 3. निवेदयामि 4.मासस्य 5.तृतीयसोपानशिबिरे 6.अहम् 7. अस्माकं 8. अवसरम् 9.प्रार्थयामि 10.निमिषा

2. 1.अनन्तपुरात् 2.संपादकवर्य 3.मासपत्रिकायाम् 4.प्रकाशितानि 5.धन्यवादान् 6.महत्त्वम् 7.लिखितम् 8.प्रकाशतु 9.यथोचितम् 10.गौतमः

3. 1.पत्तनंतिट्टातः 2.सप्तमकक्षायाम् 3. कृषिकौ 4.नष्टानि 5.धनम् 6.सविनयम् 7. मोचयतु 8.व्यवहारपत्राणाम् 9.संयोजितानि 10.आज्ञाकारिणी

4. 1. 10/12/2021 2.वन्दनानि 3.भवत: 4.पठति 5.अहम् 6.अधुना 7.स्थानान्तरणम् 8.परिवारसदस्यान् 9.अनुगृह्णातु 10. विश्वासपात्रम्

# चित्रवर्णनम्

अस्मिन् प्रश्ने ध्यातव्या: विषया: :-

## I. वाक्यघटना ( कर्तृ- क्रियासम्बन्ध:)

कर्ता + कर्म + क्रिया = वाक्यम्

राम: वनं गच्छति।

*** क्रियापदानि प्रथमपुरुषे -**

| कर्तृपदानि | | | क्रियापदानि | | |
|---|---|---|---|---|---|
| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| स: | तौ | ते | पतति | पतत: | पतन्ति |
| सा | ते | ता: | पतति | पतत: | पतन्ति |
| तत् | ते | तानि | पतति | पतत: | पतन्ति |
| बाल: | बालौ | बाला: | पतति | पतत: | पतन्ति |

*** क्रियापदानि मध्यमपुरुषे -**

| कर्तृपदानि | | | क्रियापदानि | | |
|---|---|---|---|---|---|
| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| त्वम् | युवाम् | यूयम् | पतसि | पतथ: | पतथ |

*** क्रियापदानि उत्तमपुरुषे -**

| कर्तृपदानि | | | क्रियापदानि | | |
|---|---|---|---|---|---|
| **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| अहम् | आवाम् | वयम् | पतामि | पताव: | पताम: |

**वाक्यनिर्माणाय केचन उपाया: । तद्यथा -**

प्रश्नमाध्यमेन वयं वाक्यनिर्माणं कर्तुं शक्नुम: ।

**1. कर्तृपदानि** (केवलम् उदाहरणानि )

चित्रे क: / का / किम् अस्ति ? ( चित्रे बालक: / बालिका / पुष्पम् अस्ति ।)

चित्रे कौ / के / के स्त : ? (चित्रे बालकौ / बालिके / पुष्पे स्त: ।)

चित्रे के / का: / कानि सन्ति ? (चित्रे बालका: / बालिका: / पुष्पाणि सन्ति ।)

**2. क्रियापदानि** (केवलम् उदाहरणानि )

चित्रे बालक: (कर्तृपदं) किं करोति ? ( चित्रे बालक: क्रीडति । )

चित्रे बालकौ (कर्तृपदं) किं कुरुत: ? (चित्रे बालकौ धावत: । )

चित्रे बालका: (कर्तृपदं ) किं कुर्वन्ति ? (चित्रे बालकाः पठन्ति ।)

( क्रीडति / विकसति / पठति / लिखति / चलति / गायति / धावति / खादति / उपविशति इत्येवं विधानां क्रियापदानां प्रयोग: मनसि धारणीय: । कर्तृपदम् एकवचने चेत् क्रियापदम् एकवचने, कर्तृपदं द्विवचने चेत् क्रियापदं द्विवचने, कर्तृपदं बहुवचने चेत् क्रियापदं बहुवचने च स्यु: । एतदर्थं पठ् , गम् , भू , कृ , दृश्, चल्, गै (गाय्) प्रभृतीनां धातूनां लट् लकारे रूपाणि पठनीयानि । )

**3. विभक्त्यर्था:**

| विभक्ति: | | अर्थ: |
|---|---|---|
| प्रथमा | = | ने |
| द्वितीया | = | को , TO |
| तृतीया | = | से , के साथ , के द्वारा BY ,WITH |
| चतुर्थी | = | के लिए FOR |
| पञ्चमी | = | से ( अलग ) FROM |
| षष्ठी | = | का , की , के OF |
| सप्तमी | = | में , पर IN /ON |

## II. चित्रवर्णनाय एका सरलरूपरेखा (वाक्यनिर्माणाय एका तालिका )

**एतानि पञ्चवाक्यानि कण्ठस्थीकुरुत-**

1. इदं ..................... चित्रम् अस्ति । (जिसका चित्र है उसका षष्ठी विभक्ति में रूप)
2. चित्रे ................ अस्ति / सन्ति ।
3. अत्र ...............अपि भवति / भवन्ति ।
4. चित्रे .............. दृश्यते / दृश्यन्ते ।
5. इदं एकं मनोहरम् / दु:खदं चित्रम् अस्ति ।

( सुंदर चित्र के लिए मनोहरं और दु:खदायी चित्र के लिए दु:खदं शब्द का प्रयोग कर सकते हैं ।)

उदाहरणार्थम् एकं चित्रं पश्यामः।



1. इदं **ग्रन्थालयस्य** चित्रम् अस्ति।
2. चित्रे **पुस्तकानि** सन्ति।
3. अत्र **ग्रन्थपालः** अपि भवति ।
4. चित्रे **कपाटिकाः** दृश्यन्ते।
5. इदं एकं मनोहरं चित्रम् अस्ति।

**चित्रवर्णने अवधातव्याः विषयाः -**

1) चित्रवर्णनस्य कृते पञ्च अङ्काः निर्दिष्टाः सन्ति। एकस्य वाक्यस्य कृते एकः अङ्कः। तत्र -

✓ अर्धः (½) अङ्कः चित्राधारित-वाक्यस्य कृते।

✓ अर्धः (½) अङ्कः शुद्धव्याकरणयुक्तस्य वाक्यस्य कृते च।

अर्थात् वाक्यं चित्राधारितं व्याकरणदृष्ट्या शुद्धं च भवेत्।

1) मञ्जूषायां दत्तानि पदानि केवलं सहायतार्थं भवन्ति।

- एतेषां सर्वेषां शब्दानां प्रयोगः करणीयः इति नास्ति।
- एते शब्दाः एव उपयोक्तव्यः इत्यपि नास्ति।
- भवन्तः यथेष्टं सहायक-शब्द-सूची-स्थितानां शब्दानां वा इतरेषां वा शब्दानां प्रयोगं कर्तुम् अर्हन्ति।

2) लघुवाक्यानि एव लेखनीयानि। तथा वाक्यानि सरलानि अपि भवेयुः। तेन वाक्येषु त्रुटीनां संभावना न्यूनीभवति।

चित्रवर्णने यावत् शक्यं -

1) संख्यावाचि-शब्दानाम् उपयोगं न कुर्वन्तु ।

2) सर्वनामपदानां प्रयोगं न कुर्वन्तु ।

3) विशेषण-विशेष्यपदानां प्रयोगः न करणीयः ।

4) दीर्घवाक्यानि न लेखनीयानि ।

**उदाहरणम् :-**

**प्रश्न 1. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्चवाक्यानि लिखत**

**मञ्जूषा –**

| |
|---|
| उद्यानम्, बालः, खेलतः, बाला, करोति, पश्यति, वृक्षः, चित्रम्, रचयति, उपविशति, दोलायाम्, पादकन्दुकेन |



वाक्यानि -

1. इदम् उद्यानस्य चित्रम् अस्ति ।
2. चित्रे वृक्षौ स्तः ।
3. चित्रे बालिके दोलायाम् उपविशतः ।
4. चित्रे बालकाः पादकन्दुकेन क्रीडन्ति ।
5. चित्रे बालिका चित्रं रचयति ।

यथा वा :-

1. इदं उद्यानस्य चित्रं अस्ति ।
2. अस्मिन् चित्रे बहव: बाला: सन्ति ।
3. अत्र नीलाकाश: अपि भवति ।
4. चित्रे अस्मिन् चित्ररचना अपि दृश्यते ।
5. इदं चित्रं अतीव मनोहरं भवति ।

## चित्रवर्णनाय एतेषां सामान्यवाक्यानाम् अभ्यासं कुर्वन्तु ।

(Practice these simple sentences)

1. इदम् उद्यानस्य चित्रम् अस्ति ।
2. अत्र बालकाः बालिकाः च सन्ति ।
3. अत्र वृक्षौ स्तः ।
4. बालकाः वेगेन धावन्ति ।
5. चित्रे एकः आदर्शः परिवारः वर्णितः ।
6. इदम् वर्षा-ऋतोः चित्रम् अस्ति ।
7. वृक्षे खगाः उत्पतन्ति ।
8. तडागे पुष्पाणि विकसन्ति ।
9. इदं क्रीडाक्षेत्रस्य चित्रम् अस्ति ।
10. क्रीडाक्षेत्रे बालाः क्रीडन्ति ।
11. बालाः पादकन्दुकेन खेलन्ति ।
12. इदं सभागारस्य चित्रम् अस्ति ।
13. अत्र अनेके जनाः सन्ति ।
14. अत्र पुष्पपात्रम् अपि अस्ति ।
15. इदं विद्यालयस्य-प्रार्थनासभायाः चित्रम् अस्ति ।
16. तत्र छात्राः शिक्षकाः च सन्ति ।
17. विद्यालयस्य प्रधानाचार्यः अपि तत्र तिष्ठति ।
18. तत्र अनेके वृक्षाः सन्ति ।
19. इदं गुरुकुलस्य चित्रम् अस्ति ।
20. गुरुकुले शिष्याः पठन्ति ।
21. गुरुः शिष्यान् पाठयति ।
22. चित्रे त्रयः जनाः दृश्यन्ते ।
23. तत्र पुरुषाः महिलाः च सन्ति ।
24. अत्र कारयानानि बसयानानि च दृश्यन्ते ।
25. तत्र अनेकानि भवनानि अपि सन्ति ।

# अभ्यासार्थम् चित्राणि

**1. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्द-सहायतया पञ्च वाक्यानि संस्कृतेन लिखत-**

**मञ्जूषा**

| |
|---|
| पञ्जरे, इतस्ततः, अनेके, पश्यन्ति,जन्तुशालायाः, दृश्यन्ते, प्रसीदन्ति, पशवः, पक्षिणः, गण्डकः, मयूरः, पुरूषः, उष्ट्रग्रीवः, महिला, सह, दर्शकाः, बालाः |




**2. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्च वाक्यानि लिखत -**

**मञ्जूषा**

| |
|---|
| खेलन्ति, क्रीडाङ्गणे, वृक्षाः, बालाः, पादकन्दुकक्रीडा, पश्यन्ति, गृहम् |



**3. अधोलिखितं चित्रं वर्णयन् संस्कृतेन पञ्च वाक्यानि लिखत -**

**मञ्जूषा**

| |
|---|
| **बालः, पश्यतः, बालः, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति, सूर्यः, हरीतिमा, खगाः, कुरुतः, व्यायामम्, कुटीरम्, वृक्षाः** |



**उत्तराणि**

**चित्रम् 1**

1. इदं जन्तुशालायाः चित्रम् अस्ति ।
2. चित्रे पशवः पक्षिणः च दृश्यन्ते ।
3. चित्रे दर्शकाः इतस्ततः भ्रमन्ति ।
4. चित्रे पुरूषः महिला च स्तः ।
5. चित्रे बालाः जन्तून् पश्यन्ति ।

**चित्रम् 2**

1.इदं क्रीडाङ्कणस्य चित्रम् अस्ति ।
2.चित्रे वृक्षाः सन्ति ।
3.चित्रे एकं गृहम् अपि अस्ति ।
4.चित्रे बालाः पादकन्दुकक्रीडां क्रीडन्ति ।
5. इदं चित्रं मनोहरम् अस्ति ।

**चित्रम् 3**

1. इदम् उपवनस्य चित्रम् अस्ति ।
2. चित्रे पादपाः सन्ति ।
3. चित्रे बालौ व्यायामं कुरुतः ।
4. चित्रे पुष्पाणि दृश्यन्ते ।
5. आकाशे खगाः उत्पतन्ति ।

# संस्कृतभाषायाम्
# अनुवादः



## संस्कृतभाषयाम् अनुवादं कुरुत । ( TRANSLATE IN TO SANSKRIT )

एतादृश: प्रश्न: द्वितीयसत्रान्तपरीक्षायां भवति । तत्र प्राय: सप्त वाक्यानि भवन्ति । पञ्च वाक्यानाम् एव अनुवाद: करणीय: ।

सामान्यत: वाक्यानि कर्तृवाच्ये भवन्ति । ( कर्तृपदं प्रथमा विभक्तौ, कर्म द्वितीयाविभक्तौ तथा च क्रिया कर्तु: अनुसारं च भवन्ति । ) यस्मिन् वाक्ये कर्ता प्रधान: भवति तत् कर्तृवाच्यम् इति कथ्यते । वाक्यनिर्माणाय 'लट्' लकारस्य अभ्यास: मुख्यतया करणीय: ।

**कर्तृवाच्यस्य सामान्यनियमा:**

<table>
<tr><td>कर्ता</td><td colspan="2">प्रथमाविभक्ति: ( कर्तृपदं प्रथमाविभक्तौ स्यात् )</td></tr>
<tr><td>कर्म</td><td colspan="2">द्वितीयाविभक्ति: ( कर्मपदं द्वितीयाविभक्तौ स्यात् )</td></tr>
<tr><td rowspan="8">क्रिया</td><td colspan="2">कर्तृपदानुसारम् (कर्तृपदस्य पुरुषवचनलिङ्गानुसारं भवति क्रियाया: पुरुषवचनानि ।)</td></tr>
<tr><td>कर्तृपदम्</td><td>क्रियापदम्</td></tr>
<tr><td>प्रथमपुरुष:</td><td>प्रथमपुरुष:</td></tr>
<tr><td>मध्यमपुरुषः</td><td>मध्यमपुरुष:</td></tr>
<tr><td>उत्तमपुरुषः</td><td>उत्तमपुरुष:</td></tr>
<tr><td>एकवचनम्</td><td>एकवचनम्</td></tr>
<tr><td>द्विवचनम्</td><td>द्विवचनम्</td></tr>
<tr><td>बहुवचनम्</td><td>बहुवचनम्</td></tr>
</table>

उदाहरणानि पश्याम: ।

<table>
<tr><td rowspan="2">1</td><td>राम:</td><td>ग्रामं</td><td>गच्छति ।</td></tr>
<tr><td>कर्ता – प्रथमपुरुष: एकवचनम्</td><td>कर्म - द्वितीयाविभक्ति:</td><td>क्रिया - प्रथमपुरुष: एकवचनम्</td></tr>
<tr><td rowspan="2">2</td><td>बालकौ</td><td>काव्यं</td><td>पठत: ।</td></tr>
<tr><td>कर्ता – प्रथमपुरुष: द्विवचनम्</td><td>कर्म - द्वितीयाविभक्ति:</td><td>क्रिया - प्रथमपुरुष: द्विवचनम्</td></tr>
<tr><td rowspan="2">3</td><td>छात्रा:</td><td>पुस्तकं</td><td>पठन्ति ।</td></tr>
<tr><td>कर्ता – प्रथमपुरुष: बहुवचनम्</td><td>कर्म - द्वितीयाविभक्ति:</td><td>क्रिया - प्रथमपुरुष: बहुवचनम्</td></tr>
<tr><td rowspan="2">4</td><td>त्वं</td><td>मधुरं</td><td>खादसि ।</td></tr>
<tr><td>कर्ता – मध्यमपुरुष: एकवचनम्</td><td>कर्म - द्वितीयाविभक्ति:</td><td>क्रिया - मध्यमपुरुष: एकवचनम्</td></tr>
<tr><td rowspan="2">5</td><td>युवां</td><td>चलच्चित्रं</td><td>पश्यथ: ।</td></tr>
<tr><td>कर्ता – मध्यमपुरुष: द्विवचनम्</td><td>कर्म - द्वितीयाविभक्ति:</td><td>क्रिया - मध्यमपुरुष: एकवचनम्</td></tr>
<tr><td rowspan="2">6</td><td>यूयं</td><td>भोजनं</td><td>खादथ ।</td></tr>
<tr><td>कर्ता – मध्यमपुरुष: वहुवचनम्</td><td>कर्म - द्वितीयाविभक्ति:</td><td>क्रिया - मध्यमपुरुष: बहुवचनम्</td></tr>
<tr><td rowspan="2">7</td><td>अहं</td><td>गीतं</td><td>गायामि ।</td></tr>
<tr><td>कर्ता – उत्तमपुरुष: एकवचनम्</td><td>कर्म - द्वितीयाविभक्ति:</td><td>क्रिया - उत्तममपुरुष: एकवचनम्</td></tr>
</table>

| | | | |
|---|---|---|---|
| 8 | **आवां** | **चित्रं** | **रचयावः ।** |
| | कर्ता – उत्तमपुरुषः द्विवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - उत्तममपुरुषः द्विवचनम् |
| 9 | **वयं** | **संस्कृतं** | **वदामः ।** |
| | कर्ता – उत्तमपुरुषः बहुवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - उत्तममपुरुषः द्विवचनम् |

अधः दत्तानि वाक्यानि अभ्यासाय भवन्ति । अभ्यासः क्रियताम् ।

1. Always speak the truth. / सदा सत्य बोलो ।
2. The past never comes back. / बीता हवा समय फिर नहीं लौटता ।
3. What is the name of your school? / तुम्हारे विद्यालय का नाम क्या है ?
4. Where are you going? / तुम कहां जा रहे हो ?
5. Gopal and Ganesh are playing in the garden. / गोपाल और गणेश उद्यान में खेल रहे हैं ।
6. There is a temple near my house. / मेरे घर के पास एक मंदिर है ।
7. I am going to school. / मैं विद्यालय जा रहा हूँ ।
8. Flowers are blooming in the garden. / उद्यान में फूल खिल रहे हैं ।
9. I have five fruits in my hand. / मेरे हाथ में पांच फल हैं ।
10. Delhi is the capital of India. / दिल्ली भारत की राजधानी है ।
11. Both of us went to Goa yesterday. / कल हम दोनों गोवा गए थे ।
12. Please bring water for me. / कृपया तुम मेरे लिए पानी लाओ ।
13. I will go to festival on Saturday. / शनिवार को मै उत्सव में जाऊँगा ।
14. You should study now. / अब तुम पढो ।
15. All of us study Sanskrit. / हम सब संस्कृत पढ़ रहे हैं ।
16. Girls are playing with football. / लड़कियां गेंद से खेल रही हैं ।
17. I go to school. / मै विद्यालय जा रहा हूँ ।
18. Leaves are falling from the tree. / पेड़ से पत्ते गिर रहे हैं ।
19. He lives in the village. / वह गाव में रहता है ।
20. Mother cooks the food. / माता खाना पकाती है ।
21. There are fruits on the tree. / पेड़ पर फल है ।
22. The dog safeguards the house. / कुत्ता घर की रक्षा करता है ।
23. The birds sit upon the tree. / पक्षी पेड़ के ऊपर बैढते हैं ।
24. Mahatma Gandhi is the father of our nation./ महात्मागांधी हमारे राष्ट्रपिता है ।

| | | |
|---|---|---|
| 25.The sun gives us the light. | / | सूरज हमें रोशनी देता है। |
| 26.Students are writing an examination. | / | छात्र एक परिक्षा लिख रहे हैं। |
| 27.An artist draws a picture. | / | चित्रकार एक चित्र बनाता है। |
| 28.The water of river Ganges is pure. | / | गंगा नदी का पानी शुद्ध है। |
| 29.Rekha is going to the school after drinking the milk. | / | रेखा दूध पीकर विद्यालय जा रही है। |
| 30.Stars are shining on the sky in the night. | / | रात में आकाश में तारे चमकते हैं। |
| 31.The river Ganga originates from Himalayas. | / | गंगानदी हिमालय से बहती है। |
| 32. Arjuna is the friend of Krishna. | / | अर्जुन कृष्ण का मित्र है। |
| 33.The father gives advice to son. | / | पिताजी बेटे को उपदेश देते हैं। |
| 34.Helping others gives happiness. | / | परोपकार खुशी प्रदान करता है। |
| 35.I am going to my mother's house. | / | मैं मा के घर जाता हूँ। |
| 36.There are many lotuses in the pond. | / | तालाब में कई कमल हैं। |
| 37.You are climbing on the tree. | / | तुम पेड़ पर चढ़ रहे हो। |
| 38.The mango is very nutritious. | / | आम्रफल बहुत पौष्टिक होता है। |
| 39.All of you are watching a film. | / | आप सब एक चलच्चित्र देख रहे हैं। |
| 40.A life without education is useless. | / | शिक्षा के बिना जीवन व्यर्थ है। |

## <u>उत्तराणि</u>

1. सदा सत्यं वद।
2. अतीत: समय: पुन: न आगच्छति।
3. तव विद्यालयस्य नाम किम् ?
4. त्वं कुत्र गच्छसि ?
5. गोपाल: गणेश: च उद्याने क्रीडत:।
6. मम गृहस्य समीपे एकं मन्दिरम् अस्ति।
7. अहं विद्यालयं गच्छामि।
8. उद्याने पुष्पाणि विकसन्ति।
9. मम समीपे पञ्च फलानि सन्ति।
10. दिल्ली भारतस्य राजधानी अस्ति।
11. ह्य: आवां गोवाम् अगच्छाव।

12. कृपया मह्यं जलम्  आनय।
13. अहं शनिवासरे उत्सवे गमिष्यामि।
14. त्वम् अधुना पठ।
15. वयं सर्वे संस्कृतं पठामः।
16. बालिकाः पादकन्दुकेन क्रीडन्ति।
17. अहं विद्यालयं गच्छामि।
18. वृक्षात् पत्राणि पतन्ति।
19. सः ग्रामे वसति।
20. माता भोजनं पचति।
21. वृक्षे फलानि सन्ति।
22. कुक्कुरः गृहस्य रक्षां करोति।
23. खगाः वृक्षे उपविशन्ति।
24. महात्मागान्धी अस्माकं राष्ट्रपिता अस्ति।
25. सूर्यः अस्माकं कृते प्रकाशम् उष्णं च ददाति।
26. छात्राः एकां परीक्षां लिखन्ति।
27. चित्रकारः एकं चित्रं रचयति।
28. गङ्गायाः जलं शुद्धं भवति।
29. रेखा दुग्धं पीत्वा विद्यालयं गच्छति।
30. रात्रौ आकाशे ताराः शोभन्ते।
31. गङ्गानदी हिमालयात् उद्भवति।
32. अर्जुनः कृष्णस्य मित्रम् अस्ति।
33. पिता पुत्रम् उपदिशति।
34. परोपकारः आनन्दं ददाति।
35.अहं मातुः गृहं गच्छामि।
36. तडागे अनेकानि कमलानि सन्ति।
37. त्वं वृक्षम् आरोहसि।
38. आम्रफलम् अतीव पोषकसमृद्धं भवति।
39. यूयं चलचित्रं पश्यथ।
40. विद्यां विना जीवनं व्यर्थम्।

# ग खण्डः

# अनुप्रयुक्तव्याकरणम्

## सन्धिः

# सन्धिकार्यम्

## व्यञ्जनसन्धिः

### 1. वर्गीयप्रथमवर्णस्य तृतीयवर्णे परिवर्तनम्

वर्गाक्षराणि

| | वर्गप्रथमाक्षराणि | वर्गद्वितीयाक्षराणि | वर्गतृतीयाक्षराणि | वर्गचतुर्थाक्षराणि | वर्गपञ्चमाक्षराणि |
|---|---|---|---|---|---|
| कवर्गः - | क् | ख् | ग् | घ् | ङ् |
| चवर्गः - | च् | छ् | ज् | झ् | ञ् |
| टवर्गः - | ट् | ठ् | ड् | ढ् | ण् |
| तवर्गः - | त् | थ् | द् | ध् | न् |
| पवर्गः - | प् | फ् | ब् | भ् | म् |

| | | | | |
|---|---|---|---|---|
| वर्गीयप्रथमाक्षरः ( क्/ च् / ट् / त् / प् ) | + | स्वरवर्णः / वर्गीयतृतीयचतुर्थपञ्चमवर्णाः / य् / र् / ल् / व् / ह् | = | वर्गीयप्रथमाक्षराणां स्थाने वर्गीयतृतीयवर्णाः ( ग् / ज् / ड् / द् / ब् ) |

विस्तरेण पश्यामः

| | | | | | | |
|---|---|---|---|---|---|---|
| (1) क् / च् / ट् / त् / प् | + | स्वरवर्णाः | | | = | क् / च् / ट् / त् / प् वर्णानां स्थाने ग् / ज् / ड् / द् / ब् वर्णाः भवन्ति । |
| (2) क् / च् / ट् / त् / प् | + | ग् ज् ड् द् ब् | घ् झ् ढ् ध् भ् | ङ् ञ् ण् न् म् | = | क् / च् / ट् / त् / प् वर्णानां स्थाने ग् / ज् / ड् / द् / ब् वर्णाः भवन्ति । |
| (3) क् / च् / ट् / त् / प् | + | य् / र् / ल् / व् / ह् | | | = | क् / च् / ट् / त् / प् वर्णानां स्थाने ग् / ज् / ड् / द् / ब् वर्णाः भवन्ति । |

**यथा :-**

1. एतस्मात् + एव

एतस्मात् + एव

एतस्माद् + एव

एतस्मादेव

2. अच् + अन्त:

अच् + अन्त:

अज् + अन्त:

अजन्त:

**उदाहरणानि**

1. वाक् + अर्थ : = वागर्थ:
2. जगत् + ईश: = जगदीश:
3. दिक् + गज: = दिग्गज:
4. तत् + धनम् = तद्धनम्
5. षट् + आनन: = षडानन:
6. सुप् + अन्त: = सुबन्त:
7. प्राक् + यात्रा = प्राग्यात्रा
8. दिक् + अम्बरम् = दिगम्बरम्
9. तत् + धनु: = तद्धनु:
10. महत् + आडम्बरम् = महदाडम्बरम्

## 2. वर्गीयप्रथमवर्णस्य पञ्चमवर्णे परिवर्तनम्

पदान्तप्रथमवर्गीयवर्णः + अनुनासिक्यवर्णः = पदान्तप्रथमवर्गीयवर्णस्य स्थाने वर्गपञ्चमवर्णः स्यात्।

| | | | | |
|---|---|---|---|---|
| पदान्तप्रथमवर्गीयवर्णः ( क् ख् ग् घ् ङ् ) | + | ङ् , ञ् , ण् ,न् ,म् | = | स्वस्ववर्गस्य पञ्चमवर्णः आगच्छति । <br> कवर्गस्य स्थाने - ङ् <br> चवर्गस्य स्थाने - ञ् <br> टवर्गस्य स्थाने - ण् <br> तवर्गस्य स्थाने - न् <br> पवर्गस्य स्थाने - म् |

वर्गस्य पञ्चमवर्णाः ( ङ् , ञ् , ण् ,न् ,म् ) अनुनासिक्यवर्णाः भवन्ति ।

पदान्तव्यञ्जनेभ्यः अनुनासिकवर्णेषु परेषु तस्य व्यञ्जनस्य स्थाने स्ववर्गस्य पञ्चमाक्षरं भवति ।

**यथा :-**

1. जगत् + नाथः

   जगत् + नाथः

   जगन्+ नाथः

   जगन्नाथः

2. वाक् + मयं = वाङ्मयं
3. तत् + मतं = तन्मतं
4. सत् + मतिः = सन्मतिः
5. एतत् + न = एतन्न
6. षट् + नवतिः = षण्णवतिः

**अभ्यासप्रश्ना:**

1. तावद्विभज्य =

[अ] ताव + द्विभज्य  [आ] तावत् + विभज्य

[इ] तावद्वि + भज्य  [ई] तावदा + विभज्य

2. पश्चादन्य: =

[अ] पश्चात् + अन्य:  [आ] पश्चात + अन्य:

[इ] पश्चा + दन्य:  [ई] पश्चाद + न्य:

3. काचित् + इयमिति =

[अ] काचिदियमिति  [आ] काचितियमिति

[इ] काचिदीयमिति  [ई] काचितीयमिति

4. भयाद्व्याघ्रस्य =

[अ] भयात् + व्याघ्रस्य  [आ] भयात + व्याघ्रस्य

[इ] भया + द्व्याघ्रस्य  [ई] भयाद्व्या + घ्रस्य

5. तदग्रत: =

[अ] तत् + अग्रत:  [आ] तद + ग्रत:

[इ] तत + ग्रत:  [ई]तदा + अग्रत:

6. तत् + अनुसारेण =

[अ] ततनुसारेण  [आ] तदनुसारेण

[इ] तथनुसारेण  [ई] तदानुसारेण

7. चलदनिशम् =

[अ] चलत् + अनिशम्  [आ] चलत + निशम्

[इ] चलद + निशम्  [ई] चलद + अनिशम्

8. वागीशः =

[अ] वाक् + ईशः [आ] वागा + इशः

[इ] वागी + ईशः [ई] वाग + ईशः

9. तस्मादङ्के =

[अ] तस्मा + दङ्के [आ] तस्मात् + अङ्के

[इ] तस्माद् + के [ई]तस्मात + अङ्के

10. किञ्चिदन्तरम् =

[अ] किञ्चित् + अन्तरम् [आ] किञ्चिद + अन्तरम्

[इ] किञ्चित + अन्तरम् [ई] किञ्चित + न्तरम्

11. किञ्चिदविनयम् =

[अ] किञ्चित + विनयम् [आ] किञ्चिदवि + नयम्

[इ] किञ्चित् + अविनयम् [ई] किञ्चिते + अविनयम्

12. तदहम् =

[अ] त + दहम् [आ] तत् + अहम्

[इ] तदा + हम् [ई] ततः + अहम्

13. दिग्गजः =

[अ] दिशा + गजः [आ] दिक् + गजः

[इ] दिका + गजः [ई] दिशि + गजः

14. अचिरादेव =

[अ] अचिराते + एव [आ] अचिरात् + एव

[इ]अचिरान् + एव [ई]अचिराते + एव

15. मानुषात् + अपि =

[अ] मानुषादपि [आ] मानुषातपि

[इ] मानुषाधपि [ई] मानुषाथपि

16. स्यान्न =

[अ] स्यात् + न [आ] स्यान् + न

[इ] स्यत् + न [ई] स्यात् + न

17. अस्मान्नगरात् =

[अ] अस्मात् + नगरात् [आ] अस्मान + नगरात्

[इ] अस्मान् + नगरात् [ई] अस्मत + नगरात्

18. स्यात् + मे =

[अ] स्यान्मे [आ] स्याद्मे

[इ] स्यात्मे [ई] स्यैन्मे

19.धिङ्माम् =

[अ] धिक् + माम् [आ] धिख् + माम्

[इ] धिग् + माम् [ई] धिङ्ग + आम्

20.सन्निधीयन्ताम् =

[अ] सदा + निधीयन्ताम् [आ] सत् + निधीयन्ताम्

[इ] सथ् + निधीयन्ताम् [ई] सनि + निधीयन्ताम्

21.सत् + निवेश: =

[अ] सन्निवेश: [आ] सनिवेश:

[इ] सद्निवेश: [ई] सन्नीनिवेश:

**उत्तरकुञ्चिका - व्यञ्जनसन्धेः अभ्यासप्रश्नानाम् उत्तराणि।**

1.तावत् + विभज्य 2.पश्चात् + अन्यो 3.काचिदियमिति 4.भयात् + व्याघ्रस्य 5.तत् + अग्रत: 6.तदनुसारेण 7.चलत् + अनिशम् 8.वाक् + ईश: 9.तस्मात् + अङ्के 10. किञ्चित् + अन्तरम् 11.किञ्चित् + अविनयम् 2.तत् + अहं 13.दिक् + गज: 14.अचिरात् + एव 15. मानुषादपि 16.स्यात् + न 17.अस्मात् + नगरात् 18.स्यान्मे 19.धिक् + माम् 20.सत् + निधीयन्तां 21.सन्निनिवेश:

## विसर्गसन्धि:

द्वयो: वर्णयो: मेलनेन यदि किमपि परिवर्तनं भवति तर्हि तत् सन्धि: कथ्यते। यदि एतत् परिवर्तनं विसर्गस्य स्थाने भवति तर्हि स: विसर्गसन्धि: उच्यते।

**I. विसर्गस्य उत्वम्**

ह्रस्वात् 'अ'कारात् परम् यदि विसर्ग:, तदनन्तरं यदि ह्रस्व: 'अ'कार: / वर्गीयतृतीय-चतुर्थ-पञ्चमवर्णा: / अथवा य् र् ल् व् वर्णा: - एतेषु कोऽपि वर्ण: आगच्छति तर्हि विसर्गस्य स्थाने 'उ'कार: आगच्छेत्।

| | | | | |
|---|---|---|---|---|
| अ: | + | अ | = | विसर्गस्य स्थाने 'उ'<br>अकारस्य स्थाने 'ऽ' च |
| अ: | | ग् / ज् / ड् / द् / ब् | = | विसर्गस्य स्थाने 'उ' |
| अ: | + | घ् / झ् / ढ् / ध् / भ् | = | विसर्गस्य स्थाने 'उ' |
| अ: | + | ङ् / ञ् / ण् / न् / म् | = | विसर्गस्य स्थाने 'उ' |
| अ: | + | य् / र् / ल् / व् / ह् | = | विसर्गस्य स्थाने 'उ' |

1. स: + अवसत् = स: + अवसत्

स उ + अवसत् ( विसर्गस्य स्थाने उ )

सो + ऽवसत् (अ + उ =ओ > स + उ = सो एवं अकारस्य स्थाने ऽ )

<u>सोऽवसत्</u>

द्वितीयपदस्य 'अ'कार: अवग्रह: [ऽ] अभवत्।

2. बाल: + धावति = बाल उ + धावति (अ + उ = ओ > बाल + उ = बालो )

बालो + धावति

<u>बालो धावति</u>

**उदाहरणानि**

| | | | | |
|---|---|---|---|---|
| 1. अन्यः | + | अपि | = | अन्योऽपि |
| 2. क : | + | अत्र | = | कोऽत्र |
| 3. रामः | + | गतः | = | रामो गतः |
| 4. ततः | + | जम्बूकः | = | ततो जम्बूकः |
| 5. ग्रन्थः | + | दर्पणः | = | ग्रन्थो डम्बरः |
| 6. क्रुद्धः | + | दर्पेण | = | क्रुद्धो दर्पेण |
| 7. अतः | + | बालिका | = | अतो बालिका |
| 8. कृष्णः | + | घनश्यामः | = | कृष्णो घनश्यामः |
| 9. अजः | + | झषः | = | अजो झषः |
| 10. कः | + | ढक्काम् | = | को ढक्काम् |
| 11. दशरथः | + | नामकः | = | दशरथो नामकः |
| 12. ततः | + | मरणम् | = | ततो मरणम् |
| 13. वृक्षः | + | वर्धते | = | वृक्षो वर्धते |
| 14. सिंहः | + | गर्जति | = | सिंहो गर्जति |
| 15. छात्रः | + | हसति | = | छात्रो हसति |

**II.विसर्गस्य सत्वम् , शत्वम्, षत्वम् च ।**

1. विसर्गात् परं यदि स् / त् / थ् वर्णः आगच्छति तर्हि विसर्गस्य स्थाने 'स्' भवति।
2. विसर्गात् परं यदि श् / च् / छ् वर्णः आगच्छति तर्हि विसर्गस्य स्थाने 'श्' भवति।
3. विसर्गात् परं यदि ष् / ट् / ठ् वर्णः आगच्छति तर्हि विसर्गस्य स्थाने 'ष्' भवति।

| | | | | |
|---|---|---|---|---|
| विसर्गः | + | स् / त् / थ् | = | विसर्गस्य स्थाने 'स्' |
| विसर्गः | + | श् / च् / छ् | = | विसर्गस्य स्थाने 'श्' |
| विसर्गः | + | ष् / ट् / ठ् | = | विसर्गस्य स्थाने 'ष्' |

**उदाहरणानि**

1. कृष्णः + तदा = कृष्णः + तदा

कृष्ण स् + तदा

कृष्णस्तदा

2. इत: + तत: = इत: + तत:

इतस् + तत:

<u>इतस्तत:</u>

3. क: + चन = क: + चन

कश् + चन

<u>कश्चन</u>

4. हरि: + शेते = हरि: + शेते

हरिश् + शेते

<u>हरिश्शेते</u>

5. धनु: + टङ्कार: = धनु: + टङ्कार:

धनुष् + टङ्कार:

<u>धनुष्टङ्कार:</u>

6. गज: + षष्ठ: = गज: + षष्ठ:

गजष् + षष्ठ:

<u>गजष्षष्ठ:</u>

## III. विसर्गस्य रत्वम्

अ / आ भिन्नस्वरात् परं यदि विसर्ग:, तदनन्तरं स्वरा: / वर्गतृतीय / चतुर्थ / पञ्चमवर्णा: / अथवा य् र् ल् व् वर्णा: आगच्छन्ति तर्हि विसर्गस्य स्थाने 'र्' आगच्छति ।

| | | | | | |
|---|---|---|---|---|---|
| अ / आ भिन्नस्वर: | : | + | स्वरा: | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | ग् / ज् / ड् / द् / ब् | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | घ् / झ् / ढ् / ध् / भ् | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | ङ् / ञ् / ण् / न् / म् | = | विसर्गस्य स्थाने 'र्' |
| अ / आ भिन्नस्वर: | : | + | य् / र् / ल् / व् | = | विसर्गस्य स्थाने 'र्' |

**उदाहरणानि**

१] नि: + बल: = निर् + बल: = निर्बल:

२] नि: + आशा = निर् + आशा = निराशा

| | | | | | | | | |
|---|---|---|---|---|---|---|---|---|
| ३] पितु: | + | इच्छा | = | पितुर् | + | इच्छा | = | पितुरिच्छा |
| ४] मुनि: | + | अयम् | = | मुनिर् | + | अयम् | = | मुनिरयम् |
| ५] देवी: | + | उवाच | = | देवीर् | + | उवाच | = | देवीरुवाच |

## IV.विसर्गलोप:

अ] 'आ' कारात् परम् यदि विसर्ग:, तदनन्तरं स्वरा: / वर्गतृतीय / चतुर्थ / पञ्चमवर्णा: / अथवा य् र् ल् व् ह् वर्णा: आगच्छन्ति तर्हि विसर्गस्य लोप: भवति ।

आ] एवम् 'अ' कारात् परं यदि विसर्ग: तदनन्तरं 'अ'भिन्नस्वरा: चेत् विसर्गलोप: ।

इ] एष: / स: पदस्य अनन्तरं 'अ'भिन्नवर्ण: भवेत् विसर्गलोप: ।

| | | | | | |
|---|---|---|---|---|---|
| आकारोत्तरम् | : | + | स्वरा: | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | ग् / ज् / ड् / द् / ब् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | घ् / झ् / ढ् / ध् / भ् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | ङ् / ञ् / ण् / न् / म् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | य् / र् / ल् / व् / ह् | = | विसर्गस्य लोप: |
| आकारोत्तरम् | : | + | अ भिन्नस्वरा: | = | विसर्गस्य लोप: |
| एष | : | + | अ भिन्नवर्ण: | = | विसर्गस्य लोप: |
| स | : | + | अ भिन्नवर्ण: | = | विसर्गस्य लोप: |

### उदाहरणानि

| | | | | |
|---|---|---|---|---|
| १] बाला: | + | अत्र | = | बाला अत्र |
| २] वृद्धा: | + | यान्ति | = | वृद्धा यान्ति |
| ३] सूर्य: | + | उदेति | = | सूर्य उदेति |
| ४] राम: | + | आगच्छति | = | राम आगच्छति |
| ५] एष: | + | विष्णु: | = | एष विष्णु |
| ६] स: | + | करोति | = | स करोति |

**सन्धिं सन्धिविच्छेदं वा कुरुत ।**

1. आर्योऽपि =

[अ] आर्या + अपि | [आ] आर्य: + अपि

[इ] आर्यो + पि | [ई] आर्यौ + अपि

2. अन्यो द्वितीय: =

[अ] अन्य + द्वितीय: | [आ ] अन्य: + द्वितीय:

[इ] अन्या +द्वितीय: | [ई ] अन्योद् +वितीय:

3. एकस्तावत् =

[अ] एक: + तावत् | [आ] एको + तावत्

[इ] एका + तावत् | [ई] एक + तावत्

4. कश्चित् =

[अ] क + चित् | [आ] कस् + चित्

[इ] क: + चित् | [ई] क + श्चित्

5. महतो भयात् =

[अ] महता: + भयात् | [आ] महत: + भयात्

[इ] महत् + भयात् | [ई] महा + तोभयात्

6. दारुणश्च =

[अ] दारुण: + च | [आ] दारुणा + श्च

[इ] दारु + णश्च | [ई] दारुणो + च

7. प्रवास: + अयम् =

[अ] प्रवासेयम् | [आ] प्रवासोऽयम्

[इ] प्रवास अयम् | [ई] प्रवासैयम्

8. देउलाख्य: + ग्राम: =

[अ] देउलाख्यो ग्राम: | [आ] देउलाख्योऽग्राम:

[इ] देउलाख्य ग्राम: | [ई] देउलाख्या ग्राम:

9. विशेषत: + तपोवने =

[अ] विशेषततपोवने | [आ] विशेषतो तपोवने

[इ] विशेषतस्तपोवने | [ई] विशेषत्तपोवने

10. मेघरवैश्च =

[अ] मेघरवै + श्च [आ] मेघरवैः + च

[इ] मेघरवश् + श्च [ई] मेघर + वैश्च

11. व्याघ्रोऽपि =

[अ] व्याघ्रो + पि [आ] व्याघ्रा + पि

[इ] व्याघ्रः + अपि [ई] व्याघ्र + अपि

12. निर्धनः + जनः =

[अ] निर्धनोः जनः [आ] निर्धन जनः

[इ] निर्धनो जनः [ई] निर्धनौ जनः

13. वयः + अनुरोधात् =

[अ] वयोऽनुरोधात् [आ] वयोनुरोधात्

[इ] वयेनुरोधात् [ई] वयसनुरोधात्

14. नमस्ते =

[अ] नमः + ते [आ] नम + स्ते

[इ] नमा + स्ते [ई] नमो + ते

15. तुरङ्गः + तुरङ्गैः =

[अ] तुरङ्गस्तुरङ्गैः [आ] तुरङ्गश्तुरङ्गैः

[इ] तुरङ्गोतुरङ्गैः [ई] तुरङ्गातुरङ्गैः

16. व्याघ्रो नष्टः =

[अ] व्याघ्र + नष्टः [आ] व्याघ्रः + नष्टः

[इ] व्याघ्र् + नष्टः [ई] व्याघ्रे + नष्टः

17. कः + टीकते =

[अ] कश्तीकते [आ] कष्टीकते

[इ] कस्तीकते [ई] कोतीकते

18. हिमकरोऽपि =

[अ] हिमकरैः + अपि [आ] हिमकर + ओपि

[इ] हिमकरे + अपि [ई] हिमकरः + अपि

19. पण्डित: + जन:  =

[अ]  पण्डितजन: [आ] पण्डितोऽजन:

[इ] पण्डितो जन: [ई] पण्डितज्जनः

20. अशक्तश्च  =

[अ] अशक्तो + च [आ] अशक्त: + च

[इ] अशक्त + श्च [ई] अशक्त + च

21. नामत: + वेदितुम्  =

[अ] नामतावेदितुम् [आ] नामतो वेदितुम्

[इ] नामतस्वेदितुम् [ई] नामत वेदितुम्

22. भक्त: + सेवते  =

[अ] भक्तो सेवते [आ] भक्तष्सेवते

[इ] भक्तस्सेवते [ई] भक्तसेवते

23. द्वयोरपि

[अ] द्वयो + रपि [आ] द्वयो: + अपि

[इ] द्वय: + अपि [ ई ]  द्वयोर + पि

24. तयो: + एक:

[अ] तयोरेक: [आ] तयो एक:

[इ] तयौरेक: [ई] तयोरक:

25. अश्वा धावन्ति

[अ] अश्वा + धावन्ति [आ] अश्वा:  + धावन्ति

[इ] अश्व: + धावति [ई]  अश्व + धावन्ति

26. बाला: + हसन्ति

[अ] बालोहसन्ति [आ] बालोऽहसन्ति

[इ]  बाला हसन्ति [ई] बाला: हसन्ति

27. राम: + आगच्छति

[अ] रामो आगच्छति [आ] रामोऽगच्छति

[इ]राम  आगच्छति [ई] राम: आगच्छति

28. नृप इच्छति

[अ] नृप् +इच्छति [आ] नृप: +इच्छति

[इ] नृपो + इच्छति [ ई] नृपा +इच्छति

29. महिषी: +इति

[अ] महिषीरिति [आ] महिषीति

[इ] महिषीरीति [ई] महिर्षीति

30. एष: + नमति

[अ] एषो नमति [आ] एशो नमति

[इ] एष नमति [ई] एषोऽनमति

31. चन्द्र: + उदेति

[अ] चन्द्रो उदेति [आ] चन्द्र उदेति

[इ] चन्द्र: उदेति [ई] चन्द्रोदेति

32. स आयाति

[अ] स: + आयाति [आ] सो + आयाति

[इ] स: + याति [ई] सो + याति

33. कवे: + उदय:

[अ] कवेरुदय: [आ] कविरुदय:

[इ] कवे उदय: [ई] कवि उदय:

34. गुरु: + अयम्

[अ] गुरु यम् [आ] गुरुस् अयम्

[इ] गुरुरयम् [ई] गुरु अयम्

35. पतिरेवम्

[अ] पति + एवम् [आ] पते: + एवम्

[इ] पति: + ऐवम् [ई] पति: + एवम्

**सन्धिं सन्धिविच्छेदं वा कुरुत - उत्तराणि**

1] आर्यः + अपि 2] अन्यः + द्वितीयः 3] एकः + तावत् 4] कः + चित्

5] महतः + भयात् 6] दारुणः + च 7] प्रवासोऽयम् 8] देउलाख्यो ग्रामः

9] विशेषतस्तपोवने 10] मेघरवैः + च 11] व्याघ्रः + अपि 12] निर्धनो जनः

13] वयोऽनुरोधात् 14] नमः + ते 15] तुरङ्गस्तुरङ्गैः 16] व्याघ्रः + नष्टः 17] कष्टीकते

18] हिमकरः + अपि 19] पण्डितो जनः 20] अशक्तः + च 21] नामतो वेदितुम्

22] स एव 23] द्वयोः + अपि 24] तयोरेकः 25] अश्वाः +धावन्ति 26] बाला हसन्ति

27] राम आगच्छति 28] नृपः + इच्छति 29 ] महिषीरिति 30] एष नमति

31] चन्द्र उदेति 32] सः + आयाति 33] कवेरुदयः 34] गुरुरयम् 35] पतिः + एवम्

# समासः

# <u>समासः</u>

## <u>समासः</u>

समासः इत्युक्ते **एकपदीकरणम्** । अर्थात् द्वयोः पदयोः अथवा बहूनां पदानां वा **एकपदीकरणं** समासः इति कथ्यते ।

यथा -

| | | |
|---|---|---|
| देशस्य सेवकः | = | देशसेवकाः |
| श्रीकृष्णः च भीमः च अर्जुनः च | = | श्रीकृष्णभीमार्जुनाः |

समासे द्वौ भागौ स्तः समस्तपदं विग्रहः (विग्रहवाक्यं) च ।

**समस्तपदम्**

एकपदीकरणेन यत् नूतनपदं निर्मीयते तत् समस्तपदं कथ्यते ।

## <u>विग्रहः / विग्रहवाक्यम्</u>

विग्रहः इत्युक्ते पृथक्-करणम् । अर्थात् एकीभूतस्य पदस्य पृथक्करणं विग्रहः इति कथ्यते । समस्तानां पदानां पृथक्-करणं विग्रहः/विग्रहवाक्यम् भवति ।

| यथा – <u>समस्तपदम्</u> | | <u>विग्रहवाक्यम्</u> |
|---|---|---|
| देशसेवकाः | - | देशस्य सेवकाः |
| श्रीकृष्णार्जुनौ | - | श्रीकृष्णः च अर्जुनः च |

**पाठ्यक्रमे अन्तर्भूताः समासाः -**

1. तत्पुरुषसमासः (विभक्तिः)
2. द्वन्द्वसमासः
3. अव्ययीभावसमासः च ।

## <u>तत्पुरुषसमासः (विभक्तिः)</u>

समासे प्रथमं पदं **पूर्वपदम्** इति द्वितीयं / अन्तिमं पदम् **उत्तरपदम्** इति च कथ्येते ।

| यथा :- | **पूर्वपदम्** | **उत्तरपदम्** |
|---|---|---|
| | देशस्य | सेवकाः |
| | (देश) | (सेवक) |

तत्पुरुषसमासे पूर्वपदे अस्माकं ध्यानं स्यात् । पूर्वपदे एव अस्माभिः परिवर्तनं करणीयम् । उत्तरपदे किमपि परवर्तनं न करणीयम् ।

विभक्त्यनुसारं तत्पुरुषसमासः षड्विधाः सन्ति । तद्यथा –

| **तत्पुरुषसमासः** | **विग्रहः / विग्रहवाक्यम्** | **समासः (समस्तपदम्)** |
|---|---|---|
| द्वितीया-तत्पुरुषः | ग्रामं गतः | ग्रामगतः |
| तृतीया-तत्पुरुषः | हस्तेन निर्मितम् | हस्तनिर्मितम् |
| चतुर्थी-तत्पुरुषः | भोजनाय वस्तूनि | भोजनवस्तूनि |
| पञ्चमी-तत्पुरुषः | सिंहात् भीतः | सिंहभीतः |
| षष्ठी-तत्पुरुषः | मानवस्य शक्तिः | मानवशक्तिः |
| सप्तमी-तत्पुरुषः | पठने समर्थः | पठनसमर्थः |

* पूर्वपदे या विभक्तिः भवति तदनुसारं तत्पुरुषसमासस्य नाम दत्तम् अस्ति । यथा यदा पूर्वपदं द्वितीयाविभक्तौ अस्ति तदा अस्य नाम द्वितीयातत्पुरुष: इति, यदा पूर्वपदं तृतीयाविभक्तौ अस्ति तदा अस्य नाम तृतीयातत्पुरुष इति च ।

* अत्र भवन्तः द्रष्टुं शक्नुवन्ति यत् विग्रहे विभक्ति-द्योतकाः प्रत्ययाः लुप्ताः जाताः।

* तत्पुरुषसमासे कुत्रचित् **अर्थस्य अनुसारं** कुत्रचित् **नियमस्य अनुसारं** च समासः करणीयः । नियमानुसारं यत्र ध्यातव्यं तत् एव अधः लिखितम् अस्ति

नियमानुसारम् – अवधातव्या: अंशा: -

**द्वितीयातत्पुरुषः** – यदि समस्तपदे **श्रित-अतीत-पतित-गत-आगत-आपन्नशब्दाः** भवन्ति तर्हि पूर्वपदं द्वितीया-विभक्तौ भवति।

यथा - कृष्णश्रितः - कृष्णं श्रितः

दुःखातीतः - दुःखम् अतीतः

कूपपतितः - कूपं पतितः

ग्रामगतः - ग्रामं गतः

शरणागता - शरणम् आगता

सङ्कटापन्नः - सङ्कटम् आपन्नः

**तृतीयातत्पुरुषः** – यदि समस्तपदे **पूर्व-सदृश-सम-मिश्रित-शब्दाः** भवन्ति तर्हि पूर्वपदं तृतीयाविभक्तौ भवति।

| | | | | |
|---|---|---|---|---|
| यथा | - | मासपूर्वः | - | मासेन पूर्वः |
| | | मातृसदृशः | - | मात्रा सदृशः |
| | | पितृसमः | - | पित्रा समः |
| | | वस्तुमिश्रितः | - | वस्तुभिः मिश्रितः |

**चतुर्थीतत्पुरुषः** – यदि समस्तपदे **अर्थ-हित-सुख-बलि-शब्दाः** भवन्ति तर्हि पूर्वपदं चतुर्थी-विभक्तौ भवति।

| | | | | |
|---|---|---|---|---|
| यथा | - | सुखार्थम् | - | सुखाय अर्थम् |
| | | लोकहितम् | - | लोकाय हितम् |
| | | पितृसुखम् | - | पित्रे सुखम् |
| | | भूतबलिः | - | भूताय बलिः |

**पञ्चमीतत्पुरुषः** – यदि समस्तपदे **मुक्त-पतित-भय-भीति-भीत-भी-शब्दाः** भवन्ति तर्हि पूर्वपदं पञ्चमीविभक्तौ भवति।

| | | | | |
|---|---|---|---|---|
| यथा | - | भयमुक्तः | - | भयात् मुक्तः |
| | | वृक्षपतितः | - | वृक्षात् पतितः |
| | | सिंहभयम् | - | सिंहात् भयम् |

(* भयम्, भीतिः, भीतः, भीः एते समानार्थकाः शब्दाः भवन्ति)

**षष्ठीतत्पुरुषः -** यदि समस्तपदे स्थितपदयोः **परस्परसंबन्धः** अस्ति तर्हि पूर्वपदं षष्ठीविभक्तौ भवति।

| | | | | |
|---|---|---|---|---|
| यथा | - | जीवनरक्षा | - | जीवनस्य रक्षा |
| | | राज्ञः पुरुषः | - | राजपुरुषः |
| | | देशस्य सेवकाः | - | देशसेवकाः |

**सप्तमीतत्पुरुषः** – यदि समस्ते पदे **कुशल-निपुण-प्रवीण-समर्थ-शब्दाः** भवन्ति तर्हि पूर्वपदं चतुर्थी-विभक्तौ भवति।

| | | | | |
|---|---|---|---|---|
| यथा | - | पठनकुशलः | - | पठने कुशलः |
| | | शास्त्रनिपुणः | - | शास्त्रे निपुणः |

(* कुशलः निपुणः प्रवीणः समर्थः एते समानार्थकाः शब्दाः भवन्ति)

**अभ्यासप्रश्नाः**

अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां समस्तपदं वा विग्रहं वा चिनुत।

1. **<u>वायुमण्डलं</u>** भृशं दूषितम् ।

   (क) वायुना मण्डलम् (ख) वायोः मण्डलम्

   (ग) वायुं मण्डलम् (घ) वायु मण्डलम्

2. **<u>महानगरमध्ये</u>** चलदनिशं कालायसचक्रम्।

   (क) महानगरेषु मध्ये (ख) महानगरेभ्यः मध्ये

   (ग) महानगरैः मध्ये (घ) महानगराणां मध्ये

3. दुर्दान्तैर्दशनैरमुना स्यान्नैव **<u>जनग्रसनम्</u>**।

   (क) जनानां ग्रसनम् (ख) जनेषु ग्रसनम्

   (ग) जनान् ग्रसनम् (घ) जनाः ग्रसनम्

4. **<u>वाष्पयानमाला</u>** संधावति वितरन्ती ध्वानम्।

   (क) वाष्पयानानि माला (ख) वाष्पयानेभ्यः माला

   (ग) वाष्पयानानां माला (घ) वाष्पयानैः माला

5. **<u>यानानां पङ्क्तयः</u>** ह्यनन्ताः कठिनं संसरणम्।

   (क) यानपङ्क्तयः (ख) यानात्पङ्क्तयः

   (ग) यानानपङ्क्तयः (घ) यानानिपङ्क्तयः

6. **<u>कुत्सितवस्तुमिश्रितं</u>** भक्ष्यं समलं धरातलम्।

   (क) कुत्सितवस्तूनां मिश्रितम् (ख) कुत्सितवस्तुषु मिश्रितम्

   (ग) कुत्सितवस्तुभ्यः मिश्रितम् (घ) कुत्सितवस्तुभिः मिश्रितम्

7. कुत्सितवस्तुमिश्रितं भक्ष्यं समलं **<u>धरातलम्</u>**।

   (क) धरायाः तलम् (ख) धरायै तलम्

   (ग) धरायां तलम् (घ) धरया तलम्

8. प्रपश्यामि **<u>ग्रामान्ते</u>** निर्झर-नदी-पयःपूरम्।

   (क) ग्रामाय अन्ते (ख) ग्रामे अन्ते

   (ग) ग्रामस्य अन्ते (घ) ग्रामम् अन्ते

9. प्रपश्यामि ग्रामान्ते निर्झर-नदी-**<u>पयःपूरम्</u>**।

(क) पयसः पूरम् (ख) पयसा पूरम्

(ग) पयसे पूरम् (घ) पयः पूरम्

10. **<u>कुसुमावलिः</u>** समीरचालिता स्यान्मे वरणीया।

(क) कुसुमैः आवलिः (ख) कुसुमेभ्यः आवलिः

(ग) कुसुमेषु आवलिः (घ) कुसुमानाम् आवलिः

11. अयि चल बन्धो! **<u>खगकुल</u>**-कलरव-गुञ्जितवनदेशम्।

(क) खगैः कुलम् (ख) खगानां कुलम्

(ग) खगेषु कुलम् (घ) खगेभ्यः कुलम्

12. अयि चल बन्धो! खगकुल-कलरव-गुञ्जित**<u>वनदेशम्</u>**।

(क) वनाय देशम् (ख) वनं देशम्

(ग) वनस्य देशम् (घ) वनेन देशम्

13. पुर-कलरव सम्भ्रमितजनेभ्यो धृत**<u>सुखसन्देशम्</u>**।

(क) सुखाय सन्देशम् (ख) सुखेन सन्देशम्

(ग) सुखे सन्देशम् (घ) सुखस्य सन्देशम्

14. **<u>चाकचिक्यजालं</u>** नो कुर्याज्जीवितरसहरणम्।

(क) चाकचिक्ये जालम् (ख) चाकचिक्येन जालम्

(ग) चाकचिक्यस्य जालम् (घ) चाकचिक्याय जालम्

15. चाकचिक्यजालं नो कुर्यात् **<u>जीवितरसहरणम्</u>**।

(क) जीवितरसस्य हरणम् (ख) जीवितरसेन हरणम्

(ग) जीवितरसे हरणम् (घ) जीवितरसं हरणम्

16. **<u>प्रस्तरतले</u>** लतातरुगुल्मा नो भवन्तु पिष्टाः।

(क) प्रस्तरस्य तले (ख) प्रस्तराय तले

(ग) प्रस्तरे तले (घ) प्रस्तरेण तले

17. **<u>मानवाय जीवनं</u>** कामये नो जीवन्मरणम्।

(क) मानवायाजीवनम् (ख) मानवजीवनम्

(ग) मानवम्जीवनम् (घ) मानवाद्जीवनम्

18. मानवाय जीवनं कामये नो **जीवन्मरणम्**।

(क) जीवतः मरणम् (ख) जीवता मरणम्

(ग) जीवन्तं मरणम् (घ) जीवते मरणम्

19. बुद्धिमती **पुत्रद्वयोपेता** पितुर्गृहं प्रति चलिता।

(क) पुत्रद्वयस्य उपेता (ख) पुत्रद्वयेन उपेता

(ग) पुत्रद्वये उपेता (घ) पुत्रद्वयम् उपेता

20. बुद्धिमती पुत्रद्वयोपेता **पितुः गृहं** प्रति चलिता।

(क) पितुरगृहम् (ख) पितुर्गृहम्

(ग) पितृगृहम् (घ) पित्रगृहम्

21. तत्र राजसिंहः नाम **राजपुत्रः** वसति स्म।

(क) राज्ञा पुत्रः (ख) राज्ञि पुत्रः

(ग) राज्ञः पुत्रः (घ) राजानं पुत्रः

22. **भयेन आकुलं** व्याघ्रं दृष्ट्वा शृगालः हसन्नाह।

(क) भयेनाकुलम् (ख) भयेनकुलम्

(ग) भयमाकुलम् (घ) भयाकुलम्

23. परं गृहीतकरजीवितो नष्टः **तदग्रतः**।

(क) तदा अग्रतः (ख) तस्य अग्रतः

(ग) तेन अग्रतः (घ) तस्मै अग्रतः

24. रे रे धूर्त, त्वया दत्तं मह्यं **व्याघ्रत्रयं** पुरा।

(क) व्याघ्राणां त्रयम् (ख) व्याघ्रेषु त्रयम्

(ग) व्याघ्रं त्रयम् (घ) व्याघ्रैः त्रयम्

25. बुद्धिमती पुनरपि व्याध्रजात् **भयात् मुक्ता** अभवत्।

(क) भयान्मुक्ता (ख) भयमुक्ता

(ग) भयामुक्ता (घ) भयात्मुक्ता

26. व्रजति हिमकरोऽपि **बालभावात्**।

(क) बालस्य भावात् (ख) बालाय भावात्

(ग) बाले भावात् (घ) बालात् भावात्

27. हिमकरोऽपि व्रजति मस्तक-**केतकच्छदत्वं** व्रजति।

(क) केतकेन छदत्वम् (ख) केतकस्य छदत्वम्

(ग) केतकाय छदत्वम् (घ) केतके छदत्वम्

28. **उपनयनोपदेशेन** भगवान् वाल्मीकिः आवयोः गुरुः।

(क) उपनयनस्य उपदेशेन (ख) उपनयने उपदेशेन

(ग) उपनयनेन उपदेशेन (घ) उपनयनम् उपदेशेन

29. कश्चित् कृषकः **क्षेत्रकर्षणं** कुर्वन्नासीत्।

(क) क्षेत्रं कर्षणम् (ख) क्षेत्राय कर्षणम्

(ग) क्षेत्रे कर्षणम् (घ) क्षेत्रस्य कर्षणम्

30. भूमौ पतितं **स्वपुत्रं** दृष्ट्वा माता सुरभिः अरुदत्।

(क) स्वस्य पुत्रम् (ख) स्वेन पुत्रम्

(ग) स्वः पुत्रम् (घ) स्वं पुत्रम्

31. सुरभेः इमामवस्थां दृष्ट्वा **सुराधिपः** अपृच्छत्।

(क) सुरः अधिपः (ख) सुरेषु अधिपः

(ग) सुराणाम् अधिपः (घ) सुरेभ्यः अधिपः

32. विनिपातो न वः कश्चिद् दृश्यते **त्रिदशाधिप** !

(क) त्रिदशाभ्यः अधिप (ख) त्रिदशासु अधिप

(ग) त्रिदशाः अधिप (घ) त्रिदशानाम् अधिप

33. यदि **पुत्रसहस्रं** मे, सर्वत्र सममेव मे।

(क) पुत्राः सहस्रम् (ख) पुत्राणां सहस्रम्

(ग) पुत्रं सहस्रम् (घ) पुत्रान् सहस्रम्

34. **सुरभिवचनं** श्रुत्वा अखण्डलस्य हृदयम् अद्रवत्।

(क) सुरभिं वचनम् (ख) सुरभिः वचनम्

(ग) सुरभेः वचनम् (घ) सुरभिना वचनम्

35. अचिरात् **मेघरवैः** प्रवर्षः समजायत।

(क) मेघानां रवैः (ख) मेघैः रवैः

(ग) मेघेषु रवैः (घ) मेघेभ्यः रवैः

36. सर्वत्र **<u>जलोपप्लवः</u>** सञ्जातः ।

(क) जलाय उपप्लवः (ख) जलेन उपप्लवः

(ग) जलम् उपप्लवः (घ) जलस्य उपप्लवः

37. कृषकः **<u>हर्षातिरेकेण</u>** कर्षणविमुखः सन् गृहमगात् ।

(क) हर्षेण अतिरेकेण (ख) हर्षाय अतिरेकेण

(ग) हर्षस्य अतिरेकेण (घ) हर्षे अतिरेकेण

38. समरूप: **<u>कुटुम्बवृत्तान्तः</u>** ।

(क) कुटुम्बात् वृत्तान्त: (ख) कुटुम्बाय वृत्तान्त:

(ग) कुटुम्बस्य वृत्तान्त: (घ) कुटुम्बम् वृत्तान्त:

**बहुव्रीहिसमासः**

**अवधातव्यम्-**

अस्मिन् समासे सामान्यतः पदद्वयं भवितुम् अर्हति ।
पूर्वपदम् उत्तरपदं च । किन्तु अनयोः पदयोः प्राधान्यं न भवति यतो हि
बहुव्रीहिः अन्यपदार्थप्रधानः समासः ।

**बहुव्रीहिसमासः द्विधा - (1) समान्यबहुव्रीहिः (2) व्यधिकरणबहुव्रीहिः च**

**(क) प्रथमः तावत् सामान्यबहुव्रीहिः -** ***पूर्वपदे उत्तरपदे च समानलिङ्गविभक्तिवचनानि।***

यथा – (1) नीलकण्ठः ⟶ पूर्वपदम् – नील, उत्तरपदम् - कण्ठ

अत्र उत्तरपदं **कण्ठ** इति । कण्ठ इति पदम् अकारान्तः पुँल्लिङ्गः प्रथमाविभक्तिः एकवचनम् । तदेव लिङ्गं विभक्तिः वचनं च पूर्वपदे अपि भवति, यतो हि कण्ठशब्दस्य विशेषणं भवति **नील**शब्दः। एवं **नीलः कण्ठः** इति भवति । किन्तु अयम् अन्यपदार्थप्रधानः बहुव्रीहिसमासः । नीलः अपि समस्तपदस्य अर्थ: न, कण्ठः अपि न । **नीलः कण्ठः यस्य अस्ति सः** एव अस्य समस्तपदस्य अर्थः । अस्मिन् उदाहरणे समस्तपदस्य अर्थानुसारं विग्रहः कर्तव्यः।

नीलः कण्ठः यस्य सः (शिवः)

(अत्र यस्य इति पदम् अर्थानुसारम्)

अवधेयम् – नीलकण्ठः इति पुँल्लिङ्ग-शब्दः

अतः विग्रहवाक्ये सः इति च अन्ते योजनीयम् ।

(2) पतितपर्णः → पूर्वपदम् - पतित, उत्तरपदम् - पर्ण

उत्तरपदम् - पर्ण-शब्दः नपुंसकलिङ्गः।

पूर्वपदम् - पतित-शब्दः पर्णशब्दस्य विशेषणम्।

अतः पतितं पर्णम्।

पतित-शब्दस्य योगे पञ्चमी विभक्तिः भवति।

एवं च पतितं पर्णं यस्मात्

अवधेयम् - पतितपर्णः इति पुँल्लिङ्ग-शब्दः

अतः विग्रहवाक्ये सः इति च अन्ते योजनीयम्।

(अत्र यस्मात् इति पदम् नियमानुसारम्)

एवं च - बहुव्रीहिसमासस्य विग्रहवाक्यलेखने केषुचित् अर्थानुसारं विग्रहः कर्तव्यः, कुत्रचित् नियमानुसारं च।

**कानिचन उदाहरणानि पश्यामः -**

| **सं** | **समस्तपदम्** | **विग्रहः** | **अर्थानुसारम् / नियमानुसारम्** |
|---|---|---|---|
| 1 | कृतभोजनः | कृतं भोजनं येन सः | नियमानुसारम् - कृत इति शब्दे क्त-प्रत्ययः अस्ति इति कारणात् येन इति तृतीया-विभक्तिः। |
| 2 | पतितपर्णः | पतितानि पर्णानि येन सः (बहुवचनमपि भवितुमर्हति) | नियमानुसारम् - पतित इति शब्दयोगे पञ्चमी विभक्तिः इति कारणात् यस्मात् इति पञ्चमी विभक्तिः |
| 3 | पीताम्बरः | पीतम् अम्बरं यस्य सः | अर्थानुसारम् |
| 4 | आरूढवृक्षः | आरूढं भोजनं येन सः | नियमानुसारम् - आरूढ इति शब्दे क्त-प्रत्ययः अस्ति इति कारणात् येन इति तृतीया-विभक्तिः |

**(ख) द्वितीयः च व्यधिकरणबहुव्रीहिः -**

पूर्वपदे उत्तरपदे च समानलिङ्गविभक्तिवचनानि न भवन्ति। अपि च व्यधिकरणे सामान्यतः अर्थस्य प्राधान्यम्। तदनुसृत्य एव विग्रहः कर्तव्यः ।

यथा - (1) विषकण्ठः → पूर्वपदम् - विष, उत्तरपदम् - कण्ठ

अत्र पूर्वपदस्य उत्तरपदेन सह अर्थयुक्तः संबन्धः एव अस्ति। यः छात्रः सम्यक्तया संस्कृतं जानाति स एव एतस्य विग्रह-निर्माणं कर्तुं शक्नोति । किन्तु अस्माकं कृते केचन प्रश्नाः एव अस्मिन् विभागे पृष्टाः भविष्यन्ति इति सौलभ्यम् ।

**कानिचन उदाहरणानि पश्याम:**

| सं | समस्तपदम् | विग्रहः | अर्थानुसारम् / नियमानुसारम् |
|---|---|---|---|
| 1 | विषकण्ठः | विषं कण्ठे यस्य सः | अर्थानुसारम् |
| 2 | चक्रपाणिः | चक्रं पाणौ यस्य सः | अर्थानुसारम् |
| 3 | गदाहस्तः | गदा हस्ते यस्य सः | अर्थानुसारम् |
| 4 | पुस्तकहस्तः | पुस्तकं हस्ते यस्य सः | अर्थानुसारम् |

अवधेयम् - अत्र उत्तरपदं सप्तमी-विभक्तौ अस्ति । अर्थानुसारम् चतुर्थं पदं यस्य इति अस्ति पुँल्लिङ्गशब्दः इति कारणात् सर्वत्र सः इति सर्वनामपदं च ।

**अभ्यासप्रश्नाः -**

(अ) अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां समस्तपदं वा विग्रहं वा चिनुत ।

1. अहो ! <u>**हृदयं गृह्णाति यः सः**</u> स्पर्शः ।
   (क) हृदयग्राही (ख) हृदयगृह्णाति
   (ग) सहृदयः (घ) गृहीतहृदयः
2. लवकुशयोः पितरं माता <u>**निरनुक्रोशः**</u> इति आह्वयति ।
   (क) निर्गतः अनुक्रोशः (ख) अनुक्रोशस्य अभावः
   (ग) अनुक्रोशः निर्गतः (घ) निर्गतः अनुक्रोशः यस्मात् सः
3. <u>**अकारणद्वेषि तद्वन्मनः यस्य सः**</u> तु यस्य वै, कथं जनस्तं परितोषयिष्यति ।
   (क) अकारणमनः (ख) कारणद्वेषमनः
   (ग) अकारणद्वेषिमनः (घ) अकारणमनद्वेषि

4. पर- **इङ्गितज्ञानफलाः** हि बुद्धयः।

(क) इङ्गितस्य ज्ञानफलम् (ख) इङ्गितज्ञानं फलं यासां ताः

(ग) इङ्गितज्ञानस्य फलम् (घ) इङ्गितज्ञानानां फलम्

5. **समानशीलव्यसनेषु** सख्यं भवति।

(क) समानं शीलं व्यसनं येषां तेषु (ख) समानशीलस्य व्यसनेषु

(ग) समानेन शीलव्यसनेषु (घ) समानं च शीलं च व्यसनं च

6. अहं **स्थितप्रज्ञः** इव स्थास्यामि।

(क) स्थितस्य प्रज्ञा (ख) स्थिता प्रज्ञा

(ग) स्थितः प्रज्ञः (घ) स्थिता प्रज्ञा यस्य सः

7. अहं **लम्बम् उदरं यस्य सः, तं** प्रणमामि।

(क) लम्बोदरस्य (ख) लम्बोदरम्

(ग) सलम्बोदरः (घ) लम्बमुदरम्

8. सः **गौराङ्गः** अस्ति।

(क) गौराणि अङ्गानि यस्य सः (ख) गौराणि अङ्गानि

(ग) गौरम् अङ्गम् (घ) गौरेण अङ्गेन सहितः

9. गजः **विशालः कायः यस्य सः** वर्तते।

(क) विशालकायः (ख) विशालकायस्य

(ग) सविशालकायम् (घ) विशालकायसः

10. पक्षिप्रधानेषु विद्यमानेषु **दिवान्धः** कथं राजा भवेत्।

(क) दिवा अन्धः य: सः (ख) दिवा अन्धः

(ग) दिवः अन्धः (घ) दिवि अन्धः

11. उलूकः **करालवक्त्रः** भवति।

(क) करालः वक्त्रः (ख) करालेन वक्त्रेण सहितः

(ग) करालस्य वक्त्रम् (घ) करालं वक्त्रं यस्य सः

12. तस्य पिता **निर्गतं धनं यस्मात् सः** आसीत्।

(क) निर्गतधनम् (ख) निर्गतधनः

(ग) निर्धनः (घ) सनिर्गतधनः

## अव्ययीभावसमासः

अवधातव्यम् -

अस्मिन् समासे पूर्वपदम् अव्ययं भवति। (अव्ययानां विषये अग्रे पठामः।)

समासपाठ्यक्रमे अन्तर्भूतानि अव्ययानि :-

**अनु, उप, सह, निर्, प्रति, यथा** – एतैः अव्ययपदैः अन्येषां पदानां समासः भवति।

अव्ययानाम् अर्थः उदाहरणं च।

| अव्ययपदानि | अव्ययपदस्य अर्थः | समस्तपदम्) | विग्रहः / विग्रहवाक्यम् |
|---|---|---|---|
| अनु | योग्यम् | अनुरूपम् | रूपस्य योग्यम् |
| | पश्चात् | अनुरथम् | रथस्य पश्चात् |
| उप | समीपम् | उपवृक्षम् | वृक्षस्य समीपम् |
| सह | सहितम् | सविनयम् | विनयेन सह (सहितम्) |
| निर् | अभावः | निर्मक्षिकम् | मक्षिकाणाम् अभावः |
| यथा | अनतिक्रम्य | यथाशक्ति | शक्तिम् अनतिक्रम्य |
| प्रति | आवृत्त्यर्थे | प्रतिगृहम् | गृहं गृहं प्रति / गृहे गृहे |

**अवधातव्यम् -**

यदि प्रश्ने समस्तपदं दत्तम् अस्ति तर्हि पूर्वपदे (**अनु, उप, सह, निर्, प्रति, यथा** इत्येतेषु अव्ययेषु) ध्यानं देयम्।

तद्यथा -

यदि **समस्ते पदे** -

**अनु** अस्ति तर्हि उत्तरपदं **योग्यम् / पश्चात्** भवति। (अर्थानुसारमेव **योग्यम्** वा **पश्चात्** वा लेखनीयं भवति।

**उप** अस्ति तर्हि उत्तरपदं **समीपम्** भवति।

**स** अस्ति तर्हि उत्तरपदं **सह / सहितम्** भवति।

**निर्** अस्ति तर्हि उत्तरपदं **अभावः** भवति।

**प्रति** अस्ति तर्हि समासे विद्यमानम् उत्तरपदं द्विवारं (द्वितीया / सप्तमीविभक्तौ) लिखित्वा **प्रति** इत्यपि लेखनीयं भवति।

**यथा** अस्ति तर्हि उत्तरपदं **अनतिक्रम्य** भवति।

**अभ्यासप्रश्नाः**

अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां समस्तपदं वा विग्रहं वा चिनुत।

1. कुत्सितवस्तुमिश्रितं **समलं** धरातलम्।

(क) मलेन सहितम् (ख) मलस्य सहितम्

(ग) मलम् अनतिक्रम्य (घ) मलं मलं प्रति

2. विद्यालयः **उपग्रामम्** अस्ति।

(क) ग्रामस्य पश्चात् (ख) ग्रामे ग्रामे प्रति

(ग) ग्रामस्य समीपम् (घ) ग्रामेण सहितम्

3. मार्गे एकं **निर्जनम्** वनम् आसीत्।

(क) वनस्य समीपे (ख) वनेन सहितम्

(ग) जनानाम् अभावः (घ) जनम् अनतिक्रम्य

4. जनाः **अनुरथं** धावन्ति।

(क) रथस्य पश्चात् (ख) रथे रथे प्रति

(ग) रथेन सह (घ) रथस्य समीपे

5. वयं **गृहं गृहं प्रति** संस्कृतं प्रसारयामः।

(क) अनुगृहम् (ख) गृहस्य समीपे

(ग) गृहस्य पश्चात् (घ) प्रतिगृहम्

6. सर्वे **यथाशक्ति** कार्यं कुर्वन्ति।

(क) शक्तेः समीपम् (ख) शक्तिम् अनतिक्रम्य

(ग) शक्तिं शक्तिं प्रति (घ) शक्तेः योग्यम्

7. छात्रा: **यथामति** गृहकार्यं कुर्वन्ति।

(क) मते: यथा (ख) मतिम् अनतिक्रम्य

(ग) मतिं मतिं प्रति (घ) मत्यै योग्यम्

8. **शृगालेन सहितम्** आगच्छन्तं व्याघ्रं सा अपश्यत्।

(क) उपशृगालम् (ख) प्रतिशृगालम्

(ग) अनुशृगालम् (घ) सशृगालम्

9. **सव्यवधानं** न चरित्रलोपाय इति रामः वदति।

(क) व्यवधानेन सहितम् (ख) व्यवधानस्य पश्चात्

(ग) व्यवधानस्य समीपम् (घ) व्यवधानस्य सह

10. सः **निरनुक्रोशं** वदति।

(क) अनुक्रोशेन सह (ख) अनुक्रोशस्य अभावः

(ग) अनुक्रोशे अनुक्रोशे प्रति (घ) अनुक्रोशम् अनतिक्रम्य

11. लवकुशौ **विदूषकेण सह** प्रविशतः।

(क) अनुविदूषकम् (ख) यथाविदूषकम्

(ग) प्रतिविदूषकम् (घ) सविदूषकम्

12. शिक्षकः **प्रत्येकं** छात्रं उद्बोधयति।

(क) एकं एकं प्रति (ख) एकम् अनतिक्रम्य

(ग) एकस्य पश्चात् (घ) एकेन सहितम्

13. आरक्षकाः **गृहं गृहं प्रति** गच्छन्ति।

(क) अनुगृहम् (ख) प्रतिगृहम्

(ग) सगृहम् (घ) यथागृहम्

14. कृषकः **अनुवृष्टि** क्षेत्रं गच्छति।

(क) वृष्टेः पश्चात् (ख) वृष्टेः समीपम्

(ग) वृष्ट्या सहितम् (घ) वृष्टिम् अनतिक्रम्य

15. छात्राः **यथासमयं** कार्यं संपादयन्ति।

(क) समयेन सह (ख) समयस्य पश्चात्

(ग) समयम् अनतिक्रम्य (घ) समयं समयं प्रति

16. सा **सचित्रम्** उपविशति।

(क) चित्रस्य समीपम् (ख) चित्रं चित्रं प्रति

(ग) चित्रस्य योग्यम् (घ) चित्रेण सहितम्

17. मुनिः **गङ्गायाः समीपं** गच्छति।

(क) यथागङ्गम् (ख) प्रतिगङ्गम्

(ग) अनुगङ्गम् (घ) उपगङ्गम्

18. ग्रामे **जलस्य अभावः** आसीत्।

(क) निर्जलम्  (ख) उपजलम्

(ग) प्रतिजलम्  (घ) अनुजलम्

19. सर्वैः **प्रतिदिनं** कार्यं करणीयम्।

(क) दिनं दिनं प्रति  (ख) दिनस्य समीपे

(ग) दिनस्य योग्यम्  (घ) दिनस्य पश्चात्

20. सः **साट्टहासं** वदति।

(क) अट्टहासेन सहितम्  (ख) अट्टहासस्य योग्यम्

(ग) अट्टहासम् अनतिक्रम्य  (घ) अट्टहासस्य पश्चात्

## द्वन्द्वसमासः (केवलम् इतरेतर-द्वन्द्व-समासः)

**अवधातव्यम्-**

अस्मिन् समासे पदद्वयं वा पदत्रयं वा अनेकानि पदानि वा भवितुम् अर्हन्ति।

विग्रहवाक्ये सर्वाणि पदानि **प्रथमा विभक्तौ** भवन्ति।

विग्रहवाक्ये सर्वाणि पदानि **च** इति अव्ययेन घटितानि भवन्ति।

(* प्रत्येकं पदस्य पश्चात् **च** इति लेखनीयम्)

**यथा -** रामः च कृष्णः च।

भीमः च कृष्णः च अर्जुनः च।

**अवधातव्यम्-**

यदा समस्तपदं कुर्मः तदा **च** इति पदं पूर्वपदस्य (पूर्वपदानां वा) विभक्तिः च लुप्ता भवति। एवं च अन्तिमे पदे विभक्तिः वचनं (द्विवचनं वा बहुवचनं वा) च संख्यानुसारं लिङ्गानुसारं च योजनीये।

**यथा -** रामः च कृष्णः च - रामकृष्णौ

भीमः च कृष्णः च अर्जुनः च - भीमकृष्णार्जुनाः

माता च पिता च - मातापितरौ

बालिकाः च बालकाः च - बालिकाबालकाः

**अभ्यासप्रश्नाः**

अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां समस्तपदं वा विग्रहं वा चिनुत।

1. प्रस्तरतले **लतातरुगुल्माः** भवन्तु नो पिष्टाः।

   (क) लताः च तरवः च गुल्माः च    (ख) लतानां तरुगुल्माः

   (ग) लताः तरवः गुल्माः च    (घ) लतातरुगुल्मानां पश्चात्

2. **व्याघ्रः च शृगालः च** आगच्छतः।

   (क) व्याघ्रशृगालम्    (ख) व्याघ्रस्य शृगालः

   (ग) व्याघ्रशृगालौ    (घ) व्याघ्रेण शृगालः

3. विदूषकेण सह **लवकुशौ** प्रविशतः।

   (क) लवकुशः च    (ख) लवः च कुशः च

   (ग) लवं कुशं प्रति    (घ) लवेन सह कुशः च

4. **लवः च कुशः च रामः च** परस्परं वार्तालापं कुर्वन्ति।

   (क) लवचकुशचरामच    (ख) लवचकुशचरामाः

   (ग) लवकुशरामाः    (घ) लवकुशरामाः च

5. **रामविदूषकौ** परस्परं पश्यतः।

   (क) विदूषकरामः च    (ख) विदूषकस्य रामः

   (ग) रामौ च विदूषकौ च    (घ) रामः च विदूषकः च

6. **भीमः च अर्जुनः च** प्रविशतः।

   (क) भीमार्जुनौ    (ख) भीमश्चार्जुनश्च

   (ग) भीमेन अर्जुनः च    (घ) भीमार्जुनः

7. **ग्रीष्मवसन्तशिशिराः** पुनरायाताः।

   (क) ग्रीष्मवसन्तयोः शिशिरः    (ख) ग्रीष्मः च वसन्तः च शिशिरः च

   (ग) ग्रीष्मः च वसन्तशिशिरः    (घ) ग्रीष्मवसन्तश्च शिशिरश्च

8. **रामसीते** आश्रमे अवसताम्।

   (क) रामः च सीता च    (ख) रामेण सह सीता च

   (ग) रामचसीताच    (घ) रामसीता

9. माता **फलानि च पुष्पाणि च** आनयति ।

(क) फलानिचपुष्पाणि (ख) फलानिपुष्पाणि

(ग) फलपुष्पाणि (घ) फलानां पुष्पाणि

10. **पशुपक्षिणः** सर्वदा सर्वथा रक्षणीयाः ।

(क) पशुना च पक्षी च (ख) पशवः च पक्षिणः च

(ग) पशवपक्षिणः (घ) पशुपक्षी

11. जीवने **क्रोधः च लोभः च** न करणीयौ ।

(क) क्रोधलोभश्च (ख) क्रोधलोभौ

(ग) क्रोधश्च लोभौ (घ) क्रोधलोभः

## समासः - उत्तरकुञ्चिका

**तत्पुरुषसमासस्य अभ्यासप्रश्नानाम् उत्तराणि ।**

1.वायो: मण्डलम् 2.महानगराणां मध्ये 3.जनानां ग्रसनम् 4.वाष्पयानानां माला 5.यानपङ्क्तयः 6.कुत्सितवस्तुभिः मिश्रितम् 7.धरायाः तलम् 8.ग्रामस्य अन्ते 9.पयसः पूरम् 10.कुसुमानाम् आवलिः 11.खगानां कुलम् 12. वनस्य देशम् 13.सुखस्य सन्देशम् 14.चाकचिक्यस्य जालम् 15.जीवितरसस्य हरणम् 16. प्रस्तरस्य तले 17.मानवजीवनम् 18.पुत्रद्वयेन उपेता 19. पितृगृहम् 20. राज्ञः पुत्रः 21.भयाकुलम् 22.तस्य अग्रतः 23.व्याघ्राणां त्रयम् 24.भयमुक्ता 25.बालस्य भावात् 26.केतकस्य छदत्वम् 27.उपनयनस्य उपदेशेन 28.क्षेत्रस्य कर्षणम् 29.स्वस्य पुत्रम् 30.सुराणाम् अधिपः 31.त्रिदशानाम् अधिप! 32.पुत्राणां सहस्रम् 33.सुरभेः वचनम् 34.मेघानां रवैः 35.जलस्य उपप्लवः 36.हर्षस्य अतिरेकेण 37.कुटुम्बस्य वृत्तान्त:

**बहुव्रीहिसमासस्य अभ्यासप्रश्नानाम् उत्तराणि ।**

1. हृदयग्राही 2. निर्गत: अनुक्रोशः यस्मात् सः 3. अकारणद्वेषिमनः 4.इङ्गितज्ञानं फलं यासां ताः 5.समानं शीलं व्यसनं च येषां तेषु 6.स्थिता प्रज्ञा यस्य सः 7. लम्बोदरम् 8.गौराणि अङ्गानि यस्य सः 9. विशालकायः 10. दिवा अन्धः य: सः 11. करालं वक्त्रं यस्य सः 12. निर्धनः

**अव्ययीभावसमासस्य अभ्यासप्रश्नानाम् उत्तराणि ।**

1.मलेन सहितम् 2.ग्रामस्य समीपम् 3.जनानाम् अभावः 4.रथस्य पश्चात् 5.प्रतिगृहम् 6.शक्तिम् अनतिक्रम्य 7.मतिम् अनतिक्रम्य 8.उपशृगालम् 9.व्यवधानेन सहितम् 10.अनुक्रोशस्य अभावः 11.सविदूषकम् 12.एकं एकं प्रति 13.प्रतिगृहम् 14.वृष्टेः पश्चात् 15.समयम् अनतिक्रम्य 16.चित्रेण सहितम् 17.उपगङ्गम् 18.निर्जलम् 19.दिनं दिनं प्रति 20.अट्टहासेन सहितम्

**समासः - द्वन्द्वसमासस्य अभ्यासप्रश्नानाम् उत्तराणि ।**

1.लताः च तरवः च गुल्माः च 2.व्याघ्रशृगालौ 3.लवः च कुशः च 4.लवकुशरामाः 5. रामः च विदूषक: च 6.भीमार्जुनौ 7. ग्रीष्मः च वसन्तः च शिशिरः च 8.रामः च सीता च 9.फलपुष्पाणि 10.पशवः च पक्षिणः च 11.क्रोधलोभौ

# प्रत्ययाः

प्रत्यया: पदान्ते प्रयुज्यन्ते ।   अस्माभि: द्विविधा: प्रत्यया: पठनीया: ।

1) तद्धितप्रत्यया:  ( तद्धितप्रत्यया: मूलशब्दै: सह प्रयुज्यन्ते ।)

2) स्त्रीप्रत्यया:      (शब्दानां स्त्रीलिङ्गरूपनिर्माणाय मूलशब्दै: सह स्त्रीप्रत्यया: प्रयुज्यन्ते । )

**<u>तद्धितप्रत्यया:</u>**

1) **मतुप् प्रत्यय: ( तदस्ति अस्मिन् – इत्यर्थे )**

मतुप् प्रत्यय: मूलशब्दै: सह प्रयुज्यन्ते । अस्मिन् प्रत्यये 'मत्' इति अवशिष्यते । यदा अकारान्त / आकारान्तशब्दै: सह यदा मतुप् प्रत्ययस्य योग: भवति तदा 'मत्' इत्यस्य स्थाने 'वत्' इति आदेश: आगच्छति । अन्यत्र 'मत्' इत्येव तिष्ठति । उदाहरणानि पश्याम: ।

यथा :-  धन + मतुप्    =  धनवत्

अंशु + मतुप्  =  अंशुमत्

मति + मतुप्  =   मतिमत्

**पुल्लिङ्गे** रूपाणि 'भवत्' शब्दवत् भवन्ति । (भवान्  -  भवन्तौ  - भवन्त:)

| **शब्द: + मतुप्** | **रूपम्** | **पुल्लिङ्गे रूपाणि** | | |
|---|---|---|---|---|
| | | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| धन + मतुप् | धनवत् | धनवान् | धनवन्तौ | धनवन्त: |
| गुण + मतुप् | गुणवत् | गुणवान् | गुणवन्तौ | गुणवन्त: |
| शक्ति + मतुप् | शक्तिमत् | शक्तिमान् | शक्तिमन्तौ | शक्तिमन्त: |
| मति + मतुप् | मतिमत् | मतिमान् | मतिमन्तौ | मतिमन्त: |
| चक्षुस् + मतुप् | चक्षुष्मत् | चक्षुष्मान् | चक्षुष्मन्तौ | चक्षुष्मन्त: |
| अंशु + मतुप् | अंशुमत् | अंशुमान् | अंशुमन्तौ | अंशुमन्त: |
| बुद्धि + मतुप् | बुद्धिमत् | बुद्धिमान् | बुद्धिमन्तौ | बुन्द्धिमन्त: |
| नीति + मतुप् | नीतिमत् | नीतिमान् | नीतिमन्तौ | नीतिमन्त: |
| क्षमा + मतुप् | क्षमावत् | क्षमावान् | क्षमावन्तौ | क्षमावन्त: |
| श्रद्धा + मतुप् | श्रद्धावत् | श्रद्धावान् | श्रद्धावन्तौ | श्रद्धावन्त: |

**स्त्रीलिङ्गे** रूपाणि 'नदी' शब्दवत् भवन्ति। ( नदी - नद्यौ - नद्य:)

| **शब्दः + मतुप्** | **रूपम्** | **स्त्रीलिङ्गे रूपाणि** | | |
|---|---|---|---|---|
| | | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| धन + मतुप् | धनवत् | धनवती | धनवत्यौ | धनवत्य: |
| गुण + मतुप् | गुणवत् | गुणवती | गुणवत्यौ | गुणवत्य: |
| शक्ति + मतुप् | शक्तिमत् | शक्तिमती | शक्तिमत्यौ | शक्तिमत्य: |
| मति + मतुप् | मतिमत् | मतिमती | मतिमत्यौ | मतिमत्य: |
| चक्षुस् + मतुप् | चक्षुष्मत् | चक्षुष्मती | चक्षुष्मत्यौ | चक्षुष्मत्य: |
| अंशु + मतुप् | अंशुमत् | अंशुमती | अंशुमत्यौ | अंशुमत्य: |
| बुद्धि + मतुप् | बुद्धिमत् | बुद्धिमती | बुद्धिमत्यौ | बुद्धिमत्य: |
| नीति + मतुप् | नीतिमत् | नीतिमती | नीतिमत्यौ | नीतिमत्य: |
| क्षमा + मतुप् | क्षमावत् | क्षमावती | क्षमावत्यौ | क्षमावत्य: |
| श्रद्धा + मतुप् | श्रद्धावत् | श्रद्धावती | श्रद्धावत्यौ | श्रद्धावत्य: |

**नपुंसकलिङ्गे** रूपाणि 'जगत्' शब्दवत् भवन्ति। ( जगत् - जगती - जगन्ति )

| **शब्दः + मतुप्** | **रूपम्** | **लिङ्गे रूपाणि** | | |
|---|---|---|---|---|
| | | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
| धन + मतुप् | धनवत् | धनवत् | धनवती | धनवन्ति |
| गुण + मतुप् | गुणवत् | गुणवत् | गुणवती | गुणवन्ति |
| शक्ति + मतुप् | शक्तिमत् | शक्तिमत् | शक्तिमती | शक्तिमन्ति |
| मति + मतुप् | मतिमत् | मतिमत् | मतिमती | मतिमन्ति |
| चक्षुस् + मतुप् | चक्षुष्मत् | चक्षुष्मत् | चक्षुष्मती | चक्षुष्मन्ति |
| अंशु + मतुप् | अंशुमत् | अंशुमत् | अंशुमती | अंशुमन्ति |
| बुद्धि + मतुप् | बुद्धिमत् | बुद्धिमत् | बुद्धिमती | बुद्धिमन्ति |
| नीति + मतुप् | नीतिमत् | नीतिमत् | नीतिमती | नीतिमन्ति |
| क्षमा + मतुप् | क्षमावत् | क्षमावत् | क्षमावती | क्षमावन्ति |
| श्रद्धा + मतुप् | श्रद्धावत् | श्रद्धावत् | श्रद्धावती | श्रद्धावमन्ति |

**वाक्ये प्रयोग: :-**

1) ____________ (श्रद्धा + मतुप् ) पुरुष: लभते ज्ञानम् । - श्रद्धावान्

( अत्र पुरुष: विशेष्यपदं भवति । अत: मतुप् प्रत्ययान्तं रूपं पुल्लिङ्गे एकवचने च स्यात् )

2) नारी __________ (क्षमा + मतुप् ) भवति । - क्षमावती

( अत्र नारी विशेष्यपदं भवति । अत: मतुप् प्रत्ययान्तं रूपं स्त्रीलिङ्गे एकवचने च स्यात् )

3) भारतस्य सैनिका: ________ ( शक्ति + मतुप् ) भवन्ति । - शक्तिमन्त:

( अत्र सैनिका: विशेष्यपदं भवति । अत: मतुप् प्रत्ययान्तं रूपं पुल्लिङ्गे बहुवचने च स्यात् )

4) ________ ( चक्षुस् + मतुप् ) जना: विद्वांस: प्रकीर्तिता: । - चक्षुष्मन्त:

( अत्र सैनिका: विशेष्यं भवति । अत: मतुप् प्रत्ययान्तं रूपं पुल्लिङ्गे बहुवचने च स्यात् )

5) वृक्षस्य पुष्पाणि _________ ( गन्ध + मतुप् ) सन्ति । - गन्धवन्ति

( अत्र पुष्पाणि विशेष्यपदं भवति । अत: मतुप् प्रत्ययान्तं रूपं नपुंसकलिङ्गे बहुवचने च स्यात् )

6) आम्रं ______ (मधुर + मतुप् ) फलम् अस्ति । - मधुरवत्

( अत्र आम्रं विशेष्यपदं भवति । अत: मतुप् प्रत्ययान्तं रूपं नपुंसकलिङ्गे एकवचने च स्यात्)

2) **ठक् प्रत्यय: ( सम्बन्ध -अर्थे)**

ठक् प्रत्यय: अपि मूलशब्देन सह प्रयुज्यते । ठक् प्रत्ययस्य स्थाने इक इति आगच्छति । मूलशब्दस्य अन्तिमस्वरस्य स्थाने इक आदेश: भवति । ठक् प्रययस्य प्रयोगे मूलशब्दस्य प्रथमस्वरस्य वृद्धि-आदेश: अपि भवति । तद्यथा -

| **वर्ण:** | | **वृद्धिवर्ण:** |
|---|---|---|
| अ | - | आ |
| इ / ई | - | ऐ |
| उ / ऊ | - | औ |

**उदाहरणम् :-**

**स**माज + ठक् = समाज + इक

= सामाज + इक

= **सामाजिक**

( पुल्लिङ्गे - सामाजिक: / स्त्रीलिङ्गे - सामाजिकी / नपुंसकलिङ्गे - सामाजिकम् )

(रूपाणि पुल्लिङ्गे बालक-शब्दवत् / स्त्रीलिङ्गे नदी-शब्दवत् / नपुंसकलिङ्गे पुष्प-शब्दवत् च सन्ति ।)

| शब्द: + ठक् | रूपम् | लिङ्गेषु रूपाणि | | |
|---|---|---|---|---|
| | | पुल्लिङ्गे | स्त्रीलिङ्गे | नपुंसकलिङ्गे |
| वाच + ठक् | वाचिक | वाचिक: | वाचिकी | वाचिकम् |
| शरीर + ठक् | शारीरिक | क: | की | कम् |
| धर्म + ठक् | धार्मिक | धार्मिक: | धार्मिकी | धार्मिकम् |
| कर्म + ठक् | कार्मिक | कार्मिक: | कार्मिकी | कार्मिकम् |
| नगर + ठक् | नागरिक | नागरिक: | नागरिकी | नागरिकम् |
| भूत + ठक् | भौतिक | भौतिक: | भौतिकी | भौतिकम् |
| अध्यात्म + ठक् | आध्यात्मिक | आध्यात्मिक: | आध्यात्मिकी | आध्यात्मिकम् |
| गुण + ठक् | गौणिक | गौणिक: | गौणिकी | गौणिकम् |
| मूल + ठक् | मौलिक | मौलिक: | मौलिकी | मौलिकम् |
| शक्ति + ठक् | शाक्तिक | शाक्तिक: | शाक्तिकी | शाक्तिकम् |

**वाक्ये प्रयोग: :-**

1. वयं भवताम् **हृद् + ठक्** स्वागतं कूर्म: । हार्दिकम्

( अत्र स्वागतम् विशेष्यपदं भवति । अत: ठक् प्रत्ययान्तं रूपं नपुंसकलिङ्गे एकवचने च स्यात् )

2. स्वतन्त्रता अस्माकम् **मूल + ठक्** अधिकार: अस्ति । मौलिक:

( अत्र अधिकार: विशेष्यपदं भवति । अत: ठक् प्रत्ययान्तं रूपं पुल्लिङ्गे एकवचने च स्यात् )

3. अद्य मम **साप्ताह + ठक्** अवकाश: अस्ति । साप्ताहिक:

( अत्र अवकाश: विशेष्यपदं भवति । अत: ठक् प्रत्ययान्तं रूपं पुल्लिङ्गे एकवचने च स्यात् )

4. **नगर + ठक्** संस्कृति: प्रकृते: नाशं करोति । नागरिकी

( अत्र संस्कृति: विशेष्यपदं भवति । अत: ठक् प्रत्ययान्तं रूपं स्त्रीलिङ्गे एकवचने च स्यात् )

5. परोपकार: सर्वेषां **प्रथम + ठक्** कर्तव्य: वर्तते । प्राथमिक:

( अत्र कर्तव्य: विशेष्यपदं भवति । अत: ठक् प्रत्ययान्तं रूपं पुल्लिङ्गे एकवचने च स्यात् )

3) **त्व प्रत्ययः ( धर्मार्थे भाववाचकः प्रत्ययः )**

धर्मार्थे भाववाचकशदानां निर्माणार्थं मूलशब्दैः सह 'त्व' प्रत्ययः प्रयुज्यते। त्व-प्रत्ययान्तं पदं सर्वदा नपुंसकलिङ्गे भवति। पदस्य अन्ते 'त्वम्' इति भवति।

| | | | | | |
|---|---|---|---|---|---|
| यथा :- | मानव | + | त्व | = | मानवत्वम् |
| | महत् | + | त्व | = | महत्त्वम् |
| | पशु | + | त्व | = | पशुत्वम् |
| | गुरु | + | त्व | = | गुरुत्वम् |
| | लघु | + | त्व | = | लघुत्वम् |
| | मृग | + | त्व | = | मृगत्वम् |
| | मनुष्य | + | त्व | = | मनुष्यत्वम् |
| | स्त्री | + | त्व | = | स्त्रीत्वम् |
| | नृप | + | त्व | = | नृपत्वम् |
| | पुरुष | + | त्व | = | पुरुषत्वम् |
| | दीर्घ | + | त्व | = | दीर्घत्वम् |
| | नर | + | त्व | = | नरत्वम् |
| | गुण | + | त्व | = | गुणत्वम् |

**वाक्ये प्रयोगः**

1) _______ ( नर + त्व ) दुर्लभं लोके। नरत्वम्

2) _______ (मनुष्य + त्व ) सर्वदा सर्वत्र पालनीयम्। मनुष्यत्वम्

3) _______ (स्त्री + त्व ) सर्वदा पूज्यते। स्त्रीत्वम्

4) स्वामिविवेकानन्दस्य ______ ( महत् + त्व ) विश्वप्रसिद्धं भवति। महत्त्वम्

4) **तल् प्रत्ययः ( धर्मार्थे भाववाचकः प्रत्ययः )**

धर्मार्थे भाववाचकशदानां निर्माणार्थं मूलशब्दैः सह 'तल्' प्रत्ययः प्रयुज्यते। तल् प्रत्ययस्य स्थाने ता इति आगच्छति। तल्-प्रत्ययान्तं पदं सर्वदा स्त्रीलिङ्गे भवति।

| | | | | | |
|---|---|---|---|---|---|
| यथा :- | मानव | + | तल् | = | मानवता |
| | क्रूर | + | तल् | = | क्रूरता |
| | मूर्ख | + | तल् | = | मूर्खता |

| | | | | |
|---|---|---|---|---|
| विद्वस् | + | तल् | = | विद्वत्ता |
| महत् | + | तल् | = | महत्ता |
| पवित्र | + | तल् | = | पवित्रता |
| पशु | + | तल् | = | पशुता |
| गुरु | + | तल् | = | गुरुता |
| लघु | + | तल् | = | लघुता |
| मित्र | + | तल् | = | मित्रता |

**वाक्ये प्रयोग:**

1. **समम + तल्** सदैव पालनीया अस्ति। — समता
2. प्रकृते: **रमणीय + तल्** मनोरमा अस्ति। — रमणीयता
3. सर्वे **सम्पन्न + तल्** इच्छन्ति । — सम्पन्नताम्
4. मनस: **चञ्चल+ तल्** य: वशीकर्तुं सक्षम: स: एव धीर:। — चञ्चलताम्

**5) टाप् प्रत्यय: (स्त्रीप्रत्यय:)**

अकारान्तशब्दानां स्त्रीलिङ्गपदनिर्माणाय 'टाप्' प्रत्यय: प्रयुज्यते। 'टाप्' प्रत्यये **'आ'** इति अवशिष्यते। शब्दानाम् अन्ते यदि 'अक' इति भवति तदा टाप् प्रत्ययस्य योगे **'अक'** इत्यस्य स्थाने **'इका'** इति परिवर्तनम् भवति।

यथा :-

| | | | | |
|---|---|---|---|---|
| बाल | + | टाप् | = | बाला |
| निर्मल | + | टाप् | = | निर्मला |
| अज | + | टाप् | = | अजा |
| गज | + | टाप् | = | गजा |
| छात्र | + | टाप् | = | छात्रा |
| शिष्य | + | टाप् | = | शिष्या |
| कोकिल | + | टाप् | = | कोकिला |
| शोभन | + | टाप् | = | शोभना |
| नायक | + | टाप् | = | नायिका |

| | | | | |
|---|---|---|---|---|
| शिक्षक | + | टाप् | = | शिक्षिका |
| बालक | + | टाप् | = | बालिका |
| मूषक | + | टाप् | = | मूषिका |
| गायक | + | टाप् | = | गायिका |
| चालक | + | टाप् | = | चालिका |
| लेखक | + | टाप् | = | लेखिका |
| भाषक | + | टाप् | = | भाषिका |

**वाक्ये प्रयोग:**

1. अरुन्धती राई ______ ( लेखक + टाप् ) अस्ति । लेखिका
2. _______ ( बालक + टाप् ) नृत्यं करोति । बालिका
3. ________ ( छात्र + टाप् ) विद्यालयं गच्छति । छात्रा
4. ________ ( नायक + टाप् ) अभिनयं करोति । नायिका
5. ________ ( अज + टाप् ) तृणं चरति । अजा

6) **ङीप् प्रत्यय: (स्त्रीप्रत्यय:)**

ईकारान्तस्त्रीलिङ्गपदनिर्माणाय 'ङीप्' प्रत्यय: प्रयुज्यते । 'ङीप्' प्रत्यये 'ई' इति अवशिष्यते ।

| | | | | | |
|---|---|---|---|---|---|
| यथा :- | नद | + | ङीप् | = | नदी |
| | मुख | + | ङीप् | = | मुखी |
| | दातृ | + | ङीप् | = | दात्री |
| | धातृ | + | ङीप् | = | धात्री |
| | तपस्विन् | + | ङीप् | = | तपस्विनी |
| | वादिन् | + | ङीप् | = | वादिनी |
| | देव | + | ङीप् | = | देवी |
| | भयङ्कर | + | ङीप् | = | भयङ्करी |
| | मृग | + | ङीप् | = | मृगी |
| | भवत् | + | ङीप् | = | भवती |
| | श्रीमत् | + | ङीप् | = | श्रीमती |

**वाक्ये प्रयोग:**

1. पर्वतेभ्य: **नद + ङीप्** प्रवहन्ति। — नद्य:
2. **मृग + ङीप्** मृगेण सह क्रीडति। — मृगी
3. **तपस्विन् + ङीप्** तप: करोति। — तपस्विनी

अधुना पाठेषु आगतानि मतुप् / ठक् / त्व / तल् / टाप् / ङीप् प्रत्ययान्तानि पदानि पश्याम:। तानि पदानि रेखाङ्कितानि सन्ति। कोष्ठके क: प्रत्यय: इति लिखितं च।

**प्रथम: पाठ: - शुचिपर्यावरणम्**

1. **बाष्पयानमाला** संधावति वितरन्ती ध्वानम्। (बाष्पयानमाल + टाप्)
2. **नवमालिका** रसालं मिलिता रुचिरं संगमनम्। (नवमालिक + टाप्)
3. हरिततरूणां ललितलतानां **माला** रमणीया। (माल + टाप्)
4. अपत्येषु च सर्वेषु **जननी** तुल्यवात्सला। ( जनन + ङीप्)

**द्वितीय:पाठ: - बुद्धिर्बलवती सदा**

1. बुद्धि: **बलवती** सदा। ( बलवत् + ङीप्)
2. बुद्धि: **बलवती** सदा। ( बल + मतुप्)
3. एकदा तस्य **भार्या** बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता। ( भार्य + टाप्)
4. श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा **बुद्धिमती** चिन्तितवती। ( बुद्धि + मतुप्)
5. अन्योऽपि **बुद्धिमान्** लोके मुच्यते महतो भयात्। ( बुद्धि + मतुप्)
6. इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी **भयङ्करा**। (भयङ्कर + टाप्)
7. यत्रास्ते सा **धूर्ता** तत्र गम्यताम्। (धूर्त + टाप्)

**चतुर्थ: पाठ: - शिशुलालनम्**

1. 'व्रजति हिमकरोऽपि बालभावात् पशुपति-मस्तक- केतक**च्छदत्वम्**। (केतकच्छद + त्व)

**पञ्चम: पाठ: - जननी तुल्यवत्सला**

1. जननी **तुल्यवत्सला** भवति। (तुल्यवत्सल + टाप्)
2. जननी दीने पुत्रे **कृपार्द्रहृदया** भवति। (कृपार्द्रहृदय + टाप्)
3. इन्द्रः दुर्बलवृषभस्य कष्टानि अपाकर्तुं **प्रवर्षां** कृतवान्। (प्रवर्ष + टाप्)
4. मातुः **अधिका** कृपा दीने पुत्रे भवति। (अधिक + टाप्)
5. दुर्बले सुते मातु: अभ्यधिका कृपा **सहजा** एव भवति। ( सहज + टाप्)
6. दुर्बले सुते मातु: अभ्यधिका **कृपा** सहजा एव भवति। ( कृप + टाप्)

**षष्ठः पाठः - सुभाषितानि**

1. सम्पत्तौ च विपत्तौ च महताम् **एकरूपता**। ( एकरूप + तल् )

**सप्तमः पाठः - सौहार्दं प्रकृतेः शोभा**

1. वनस्य दृश्यम् समीपे एवैका **नदी** वहति। ( नद + ङीप् )
2. मम **सत्यप्रियता** तु जनानां कृते उदाहरणस्वरूपा। ( सत्यप्रिय + तल् )
3. किं ते **महत्वम्** ? ( महत् + त्व )
4. अरे अहिभुक् ! नृत्यातिरिक्तं का तव **विशेषता** ? ( विशेष + तल् )

**अष्टमः पाठः - विचित्रः साक्षी**

1. एकदा स पिता तनूजस्य **रुग्णताम्** आकर्ण्य व्याकुलो जातः। ( रुग्ण + तल् )
2. विजने प्रदेशे **पदयात्रा** न सुखावहा । ( पदयात्र + टाप् )

**नवमः पाठः - सूक्तयः**

1. संसारे विद्वांसः ज्ञानचक्षुभिः **नेत्रवन्तः** कथ्यन्ते। ( नेत्र + मतुप् )
2. पिताऽस्य किं तपस्तेपे इत्युक्तिः तत्-**कृतज्ञता**। ( कृतज्ञ + तल् )
3. **अवक्रता** यथा चित्ते तथा वाचि भवेद् यदि। ( अवक्र + तल् )
4. तदेवाहुः महात्मानः **समत्वम्** इति तथ्यतः। ( सम + त्व )
5. वाक्पटुः **धैर्यवान्** मन्त्री सभायामप्यकातरः। ( धैर्य + मतुप् )

**द्वादशः पाठः - अन्योक्तयः**

1. सरसः **शोभा** राजहंसेन भवति। ( शोभ + टाप् )

## अभ्यासप्रश्नाः

अधोलिखितवाक्येषु रेखाङ्कितपदानां **प्रकृतिप्रत्ययौ** संयोज्य विभज्य वा उचितम् उत्तरं चिनुत।

1) यथासमयं सर्वेषां **महत्त्वम्** विद्यते।

(क) महत् + त्व (ख) महता + त्व

(ग) महत् + टाप् (घ) महत् + त्वम्

2) यत्रास्ते सा **धूर्त + टाप्** तत्र गम्यताम् ।

(क) धूर्तः (ख) धूर्ता

(ग) धूत्रा (घ) धूरत

3) महात्मा गान्धी वर्य: **क्षमा + मतुप्** आसीत्।

(क) क्षमावती (ख) क्षमावत्

(ग) क्षमावन्त: (घ) क्षमावान्

4) **श्रद्धा + मतुप्** छात्र: ज्ञानम् लभते।

(क) श्रद्धावान् (ख) श्रद्धावत्

(ग) श्रद्धावन्त: (घ) श्रद्धावन्

5) **पवित्र + टाप्** गङ्गा दूषिता न कर्त्तव्या।

(क) पवित्रम् (ख) पवित्री

(ग) पवित्र: (घ) पवित्रा

6) सत्सङ्गतिः सर्वत्र **दुर्लभ + टाप्**।

(क) दुर्लभी (ख) दुर्लभा

(ग) दुर्लभम् (घ) दुर्लभत्वम्

7) **शिष्य + टाप्** जलेन लतां सिञ्चति।

(क) शिष्या (ख) शिष्येण

(ग) शिष्य: (घ) शिष्यम्

8) छात्रजीवने परिश्रमस्य **महत् + त्व** वर्तते।

(क) महत्ताम् (ख) महत्त्वम्

(ग) महता (घ) महत्तमम्

9) **बुद्धि + मतुप्** नारी प्रशस्यते।

(क) बुद्धिमान् (ख) बुद्धिमता

(ग) बुद्धिमत् (घ) बुद्धिमती

10) एतौ छात्रौ **शक्ति + मतुप्** स्तः।

(क) शक्तिमन्तौ (ख) शक्तिमन्त:

(ग) शक्तिमत् (घ) शक्तिमती

11) ताः कन्याः **गुणवत्यः** सन्ति।

(क) गुण + टाप् (ख) गुण + मतुप्

(ग) गुण + तुमुन् (घ) गुणी + मतुप्

12) **धन + मतुप्** जनाः दरिद्राणां सहायतां कुर्वन्तु।

(क) धनवत्वम् (ख) धनवान्

(ग) धनवत् (घ) धनवन्तः

13) **बलवता** जनेन निर्बलेषु बलं न प्रयोक्तव्यम्।

(क) बल + तुम् (ख) बल + टाप्

(ग) बल + वता (घ) बल + मतुप्

14) **धैर्यवान्** सफलतां गच्छति।

(क) धैर्य + मतुप् (ख) धैर्य + वान्

(ग) धैर्य + वतुप् (घ) धैर्य + त्व

15) वेदानां **महत् + त्व** को न जानाति।

(क) महत्ताम् (ख) महत्त्वम्

(ग) महता (घ) महत्तमम्

16) मित्रेण सह **मित्रत्वम्** कदापि न त्याज्यम्।

(क) मित्र + टाप् (ख) मित्र + त्वम्

(ग) मित्र + त्व (घ) मित्र + ता

17) कालिदासः **कीर्तिमान्** आसीत्।

(क) कीर्ति + मतुप् (ख) कीर्ति + मान्

(ग) कीर्ति + टाप् (घ) कीर्ति + त्व

18) एते जनाः **गुणवन्तः** सन्ति।

(क) गुण + तुप् (ख) गुण + तुमुन्

(ग) गुण + मतुप् (घ) गुण + क्तवतु

19) गुरोः **गुरु + त्व** वर्णयितुं न शक्यते।

(क) गुरुत्वम् (ख) गुरुत्ववान्

(ग) गुरुता (घ) गुरुत्ववती

20) पर्यावरणस्य **महत् + त्व** सर्वे जानन्ति।

(क) महत्त्वम् (ख) महत्ताम्

(ग) महता (घ) महत्तमम्

21) **कोकिल + टाप्** आम्रवृक्षे मधुरस्वरेण गायन्ति ।

(क) कोकिलया (ख) कोकिल:

(ग) कोकिला: (घ) कोकिलवान्

22) पृथिव्याः **गुरुत्त्वं** सर्वे जानन्ति ।

(क) गुरु + त्व (ख) गुरु + मतुप्

(ग) गुरु + तल् (घ) गुरु + टाप्

23) मनसः **चञ्चल + त्व** वशीकरणीयम् ।

(क) चञ्चलता (ख) चञ्चलत्वम्

(ग) चञ्चला (घ) चञ्चलतम्

24) **छाया + मतुप्** वृक्षाः मार्गे श्रान्तपथिकेभ्यः आश्रयं यच्छन्ति।

(क) छायावान् (ख) छायावन्तः

(ग) छायावन्तम् (घ) छायावतः

25) **बुद्धि + मतुप्** नरः सर्वत्र मानं लभते ।

(क) बुद्धिमत् (ख) बुद्धिमान्

(ग) बुद्धिमन्तः (घ) बुद्धिमतः

26) **बल + मतुप्** हि आशा ।

(क) बलवान् (ख) बलवत्

(ग) बलवती (घ) बलवतः

27) पठनेन नर: **गुणवान्** भवति ।

(क) गुण + तुप् (ख) गुण + मत्

(ग) गुण + मतुप् (घ) गुण + वत्

28) जीवने विद्यायाः बहु **महत्त्वं** वर्तते ।

(क) महत् + त्वम् (ख) महत् + त्व

(ग) महत्त्व + मतुप् (घ) महत्त + त्व

29) आगता पर्वसु **प्रिया** दीपावलिः ।

(क) प्रिय + आ (ख) प्रिय + आप

(ग) प्रिय + टाप् (घ) प्रिय + ङीप्

30) पुष्पाणां शोभा **<u>अनुपमा</u>** भवति।

(क) अनुपम + टाप् (ख) अनुपम + आप्

(ग) अनुपम + चाप् (घ) अनुपम + ठक्

31) **<u>अजा</u>** शनैः शनैः चलति।

(क) अज + टाप् (ख) अजा + टाप्

(ग) अज + आप् (घ) अज + आ

32) पृथिव्याः **<u>गुरुत्वं</u>** सर्वे जानन्ति।

(क) गुरु + त्व (ख) गुरु + त्वम्

(ग) गुरु + त्तवम् (घ) गुरु + त्तव

33) दीपिका क्रीडायाम् **<u>कुशल + टाप्</u>** अस्ति।

(क) कुशलता (ख) कुशलय

(ग) कुशला (घ) कुशलताम्

34) प्रभा-दीपिकयोः माता **<u>चिकित्सक + टाप्</u>** अस्ति।

(क) चिकित्सका (ख) चिकित्सकाः

(ग) चिकित्सकः (घ) चिकित्सिका

35) सा समाजस्य **<u>सेवक + टाप्</u>** अपि अस्ति।

(क) सेवका (ख) सेविका

(ग) सेविकः (घ) सेवकी

36) पुष्पाणां **<u>रमणीय + त्व</u>** दृष्ट्वा मनः प्रसन्नं भवति।

(क) रमणीयताम् (ख) रमणीयत्वः

(ग) रमणीयत्वम् (घ) रमणीयत्व

37) बालकाः **<u>बालक + टाप्</u>** च कन्दुकेन क्रीडन्ति।

(क) बालिकाभि: (ख) बालिकाः

(ग) बालिका (घ) बलिकया

38) **<u>आचार्य + टाप्</u>** अपि तेभ्यः क्रुध्यति।

(क) आचार्या (ख) आचार्यया

(ग) आचार्याम् (घ) आचार्याः

39) जीवने शिक्षायाः सर्वाधिकं **महत् + त्व** वर्तते ।

(क) महत्त्वः (ख) महत्त्वो

(ग) महत्त्वम् (घ) महत्तम्

40) उद्यमस्य **महत् + तल्** सर्वविदिता एव ।

(क) महत्त्वः (ख) महत्ता

(ग) महत्त्वा (घ) महत्त्व

41) **सदाचारवान्** विवेकी भवति ।

(क) सदा + आचारवान् (ख) सदाचार + मतुप्

(ग) सदाचार + मान् (घ) सदाचार + शतृ

42) भाषणे **मृदु + त्व** आवश्यकम् ।

(क) मृदुत्वम् (ख) मृदुत्वा

(ग) मृदुत्वे (घ) मृदुता

43) एषा बालिका **उत्तम + टाप्** अस्ति ।

(क) उत्तमः (ख) उत्तमम्

(ग) उत्तमा (घ) उत्तमया

44) परिश्रमस्य **महत्वम्** सर्वे जानन्ति एव ।

(क) मह + त्वत् (ख) महत् + त्व

(ग) महत् + त्वम् (घ) मह + त्वम्

45) रूप + मतुप् अहंकारिण: न भवेयु: ।

(क) रूपमन्त: (ख) रूपवन्त:

(ग) रूपवान: (घ) रूपवाना:

46) जगति **मनुष्यत्वम्** दुर्लभं वर्तते ।

(क) मनुष्य + त्व (ख) मनुष्यत् + व

(ग) मनुष्य + ता (घ) मनुष्यत्व + म्

47) **<u>श्रीमती</u>** प्रतिभा पाटील: भारतस्य प्रथमा महिला राष्ट्रपति: आसीत्।

(क) श्रीमान् + टाप् (ख) श्रीमान् + ङीप्

(ग) श्रीमान् + ठक् (घ) श्रीमान् + त्व

48) **<u>मुदिता</u>** मह्यं रोचते।

(क) मुदित + तल् (ख) मुदित + ठक्

(ग) मुदित + त्व (घ) मुदित + तुमुन्

49) **<u>भवती</u>** इति पदे प्रत्ययः अस्ति।

(क) ति (ख) ड़ीप्

(ग) ती (घ) वती

50) विद्यालयस्य **<u>साप्ताहिक:</u>** अवकाश: रविवासरे भवति।

(क) सप्ताह + ठक् (ख) सप्ताह + इन्

(ग) सप्त + इक् (घ) साप्ताहिक + ठक्

51) **<u>दरिद्रता</u>** सदैव दुःखकारिणी।

(क) दरिद्र + टाप् (ख) दरिद्र + तल्

(ग) दरिद्रः + तल् (घ) दरिद्र + ङीप्

52) अस्मिन् लोके विद्वांसः एव **<u>चक्षुष्मन्त:</u>** प्रकीर्तिताः।

(क) चक्षुर् + मतुप् (ख) चक्षु + मतुप्

(ग) चक्षुः + मतुप् (घ) चक्षुष् + मतुप्

53) मयूरस्य **<u>सुन्दरता</u>** जगत्प्रसिद्धा।

(क) सुन्दर + तल् (ख) सुन्दर + ताल्

(ग) सुन्दर + त्व (घ) सुन्दर + टाप्

54) कालिदासस्य **<u>विद्वत्वं</u>** सर्वजनविदितम्।

(क) विद्व + त्वम् (ख) विद्व + ता

(ग) विद्वस् + त्व (घ) विदुष् + त्व

55) **<u>नारी</u>** सर्वत्र पूज्यते।

(क) नर + इन् (ख) नारी + ङीप

(ग) नर + ङीप् (घ) नर + टाप्

56) भवतां **<u>हृद + ठक्</u>** स्वागतम् अस्ति।

(क) हार्दिकः (ख) हार्दिकम्

(ग) हार्दिकी (घ) हृदयेन

57) अग्रिममासे अस्माकं **<u>वार्षिकी</u>** परीक्षा भवति।

(क) वर्षा + ठक् (ख) वर्ष + ठक्

(ग) वर्ष + की (घ) वर्ष + शतृ

58) **<u>विज्ञान + ठक्</u>** देशस्य गौरवं भवन्ति।

(क) विज्ञानिकाः (ख) वैज्ञानिकाः

(ग) विज्ञानिकः (घ) वैज्ञानिक:

59) मानवानां **<u>नीति + ठक्</u>** विकास: आवश्यक:।

(क) नैतिकम् (ख) नैतिक:

(ग) नीतिक: (घ) नीतिठक्

60) **<u>शक्तिमान्</u>** राजा प्रजा: संरक्षणं करोति।

(क) शक्ति + तुमुन् (ख) शक्ति + मतुप्

(ग) शक्ति + टाप् (घ) शक्ति + ठक्

## उत्तरकुञ्चिका

**प्रत्यया: - अभ्यासप्रश्नानाम् उत्तराणि**

1) महत् + त्व 2) धूर्ता 3) क्षमावान् 4) श्रद्धावान् 5) पवित्रा 6) दुर्लभा 7) शिष्या 8) महत्त्वम् 9) बुद्धिमती 10) शक्तिमन्तौ 11) गुण + मतुप् 12) धनवन्तः 13) बल + मतुप् 14) धैर्य + मतुप् 15) महत्त्वम् 16) मित्र + त्व 17) कीर्ति + मतुप् 18) गुण + मतुप् 19) गुरुत्वम् 20) महत्त्वम् 21) कोकिला: 22) गुरु + त्व 23) चञ्चलत्वम् 24) छायावन्तः 25) बुद्धिमान् 26) बलवती 27) गुण + मतुप् 28) महत् + त्व 29) प्रिय + टाप् 30) अनुपम + टाप् 31) अज + टाप् 32) गुरु + त्व 33) कुशला 34) चिकित्सिका 35) सेविका 36) रमणीयत्वम् 37) बालिका 38) आचार्या 39) महत्त्वम् 40) महत्ता 41) सदाचार + मतुप् 42) मृदुत्वम् 43) उत्तमा 44) महत् + त्व 45) रूपवन्त: 46) मनुष्य + त्व 47) श्रीमान् + ङीप् 48) मुदित + तल् 49) ड़ीप् 50) सप्ताह + ठक् 51) दरिद्र + तल् 52) चक्षुष् + मतुप् 53) सुन्दर + तल् 54) विद्वस् + त्व 55) नर + ङीप् 56) हार्दिकम् 57) वर्ष + ठक् 58) वैज्ञानिकाः 59) नैतिक: 60) शक्ति + मतुप्

# वाच्यम्

# वाच्यपरिवर्तनम्

अथ वाक्यानां प्रयोगविषये पठामः । भाषा व्यवहाराय भवति । व्यवहारः वाक्यैः भवति । वाक्ये त्रय: अंशा: मुख्या: भवन्ति । कर्ता कर्म क्रिया च । य: क्रियां करोति स: कर्ता, या प्रवृत्ति: क्रियते सा क्रिया, क्रियाया: प्रभाव: यत्र भवति तत् कर्म । एतेषां प्रयोगानुसारं वाक्यं त्रिविधं वर्तते - **कर्तृवाच्यं कर्मवाच्यं भाववाच्यं च** ।

## कर्तृवाच्यम्

सामान्यत: वाक्ये यत् पदं प्रथमाविभक्तौ अस्ति तस्य पदस्य प्राधान्यं वर्तते । यस्मिन् वाक्ये कर्तृपदं प्रथमाविभक्तौ वर्तते तत् वाक्यं कर्तृवाच्यम् इति कथ्यते (सामान्यनियम:) । अर्थात् यस्मिन् वाक्ये कर्ता प्रधान: भवति तत् कर्तृवाच्यम् ।

इदानीम् अधोलिखितानि वाक्यानि पठत ।

1. घनश्यामः ग्रन्थं पठति ।
2. कमला कथां लिखति ।
3. बालिका चित्रं रचयति ।
4. शिक्षकः ग्रन्थान् पठति ।
5. सुस्मिता काव्यं पठति ।
6. माता तण्डुलं पचति ।
7. एषा दूरदर्शिनीं पश्यति ।

एतेषु वाक्येषु कर्तृपदं (कर्ता) किं, कर्मपदं किं, क्रियापदं किम् इति पश्याम: ।

| | **कर्ता** | **कर्म** | **क्रिया** |
|---|---|---|---|
| १ | घनश्यामः | ग्रन्थं | पठति |
| २ | कमला | कथां | लिखति |
| ३ | बालिका | चित्रं | रचयति |
| ४ | शिक्षकः | ग्रन्थान् | पठति |
| ५ | सुस्मिता | काव्यं | पठति |
| ६ | गिरिजा | विद्यालयं | गच्छति |
| ७ | माता | तण्डुलं | पचति |
| ८ | एषा | दूरदर्शिनीं | पश्यति |

उपरि प्रदत्तवाक्येषु कर्तृपदानि प्रथमाविभक्तौ सन्ति । अत: एतानि वाक्यानि कर्तृवाच्यानि सन्ति । इदानीं कर्तृवाच्यस्य नियमान् पश्याम: ।

**कर्तृवाच्यस्य सामान्यनियमाः**

| | | |
|---|---|---|
| कर्ता | प्रथमाविभक्तिः ( कर्तृपदं प्रथमाविभक्तौ स्यात् ) | |
| कर्म | द्वितीयाविभक्तिः ( कर्मपदं द्वितीयाविभक्तौ स्यात् ) | |
| क्रिया | कर्तृपदानुसारम् (कर्तृपदस्य पुरुषवचनलिङ्गानुसारं भवति क्रियायाः पुरुषवचनानि ।) | |
| | **कर्तृपदम्** | **क्रियापदम्** |
| | प्रथमपुरुषः | प्रथमपुरुषः |
| | मध्यमपुरुषः | मध्यमपुरुषः |
| | उत्तमपुरुषः | उत्तमपुरुषः |
| | एकवचनम् | एकवचनम् |
| | द्विवचनम् | द्विवचनम् |
| | बहुवचनम् | बहुवचनम् |

उदाहरणानि पश्यामः ।

| | | | |
|---|---|---|---|
| 1 | **रामः** | **पाठं** | **पठति ।** |
| | कर्ता – प्रथमपुरुषः एकवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - प्रथमपुरुषः एकवचनम् |
| 2 | **बालकौ** | **ग्रामं** | **गच्छतः ।** |
| | कर्ता – प्रथमपुरुषः द्विवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - प्रथमपुरुषः द्विवचनम् |
| 3 | **छात्राः** | **प्रार्थनां** | **कुर्वन्ति ।** |
| | कर्ता – प्रथमपुरुषः बहुवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - प्रथमपुरुषः बहुवचनम् |
| 4 | **त्वं** | **संस्कृतं** | **वदसि ।** |
| | कर्ता – मध्यमपुरुषः एकवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - मध्यमपुरुषः एकवचनम् |
| 5 | **युवां** | **छत्रं** | **उद्घाटयतः ।** |
| | कर्ता – मध्यमपुरुषः द्विवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - मध्यमपुरुषः एकवचनम् |
| 6 | **यूयं** | **चित्रं** | **पश्यथ ।** |
| | कर्ता – मध्यमपुरुषः वहुवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - मध्यमपुरुषः बहुवचनम् |
| 7 | **अहं** | **भोजनं** | **खादामि ।** |
| | कर्ता – उत्तमपुरुषः एकवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - उत्तममपुरुषः एकवचनम् |
| 8 | **आवां** | **काव्यं** | **रचयावः ।** |
| | कर्ता – उत्तमपुरुषः द्विवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - उत्तममपुरुषः द्विवचनम् |
| 9 | **वयं** | **गीतं** | **गायामः ।** |
| | कर्ता – उत्तमपुरुषः बहुवचनम् | कर्म - द्वितीयाविभक्तिः | क्रिया - उत्तममपुरुषः द्विवचनम् |

## कर्मवाच्यम्

यस्मिन् वाक्ये कर्मपदं प्रथमाविभक्तौ वर्तते तत् वाक्यं कर्मवाच्यम् इति कथ्यते (सामान्यनियम:)। अर्थात् यस्मिन् वाक्ये कर्मपदं प्रधानं भवति तत् कर्मवाच्यम्।

इदानीम् अधोलिखितानि वाक्यानि पठत।

1. घनश्यामेन ग्रन्थ: पठ्यते।
2. कमलया कथा लिख्यते।
3. बालिकया चित्रं रच्यते।
4. शिक्षकेण ग्रन्था: पठ्यन्ते।
5. सुस्मितया काव्यं पठ्यते।
6. मात्रा तण्डुलं पच्यते।
7. अनया दूरदर्शिनी दृश्यते।

उपरि प्रदत्तवाक्येषु कर्मपदानि प्रथमाविभक्तौ सन्ति। अत: एतानि वाक्यानि कर्मवाच्यानि सन्ति। इदानीं कर्मवाच्यस्य नियमान् पश्याम:।

### कर्मवाच्यस्य सामान्यनियमा:

<table>
<tr><td>कर्ता</td><td colspan="2">तृतीयाविभक्ति: ( कर्तृपदं तृतीयाविभक्तौ स्यात् )</td></tr>
<tr><td>कर्म</td><td colspan="2">प्रथमाविभक्ति: ( प्रथमाविभक्तौ स्यात् )</td></tr>
<tr><td rowspan="8">क्रिया</td><td colspan="2">कर्मपदानुसारम् (कर्मपदस्य पुरुषवचनलिङ्गानुसारं भवति क्रियाया: पुरुषवचनलिङ्गानि । धातुना सह ‘य’ वर्ण: योज्यते (यथा – पठ् + य = पठ्य)। क्रियापदै: सह आत्मनेपदीप्रत्ययानां प्रयोग: क्रियते। अर्थात् कर्मवाच्ये क्रियापदानि आत्मनेपदीधातूनां रूपाणि इव भवन्ति।<br>(यथा :- पठ्यते – पठ्येते – पठ्यन्ते )</td></tr>
<tr><td>कर्मपदम्</td><td>क्रियापदम्</td></tr>
<tr><td>प्रथमपुरुष:</td><td>प्रथमपुरुष:</td></tr>
<tr><td>मध्यमपुरुषः</td><td>मध्यमपुरुष:</td></tr>
<tr><td>उत्तमपुरुषः</td><td>उत्तमपुरुष:</td></tr>
<tr><td>एकवचनम्</td><td>एकवचनम्</td></tr>
<tr><td>द्विवचनम्</td><td>द्विवचनम्</td></tr>
<tr><td>बहुवचनम्</td><td>बहुवचनम्</td></tr>
</table>

उदाहरणानि पश्याम: ।

| | | | |
|---|---|---|---|
| 1 | **रामेण** | **पाठः** | **पठ्यते ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – प्रथमपुरुष: एकवचनम् | क्रिया - प्रथमपुरुष: एकवचनम् |
| 2 | **बालकाभ्यां** | **शुनकौ** | **ताड्येते ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – प्रथमपुरुष: द्विवचनम् | क्रिया - प्रथमपुरुष: द्विवचनम् |
| 3 | **छात्रैः** | **मोदकानि** | **खाद्यन्ते ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – प्रथमपुरुष: बहुवचनम् | क्रिया - प्रथमपुरुष: बहुवचनम् |
| 4 | **मया** | **त्वं** | **दृश्यसे ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – मध्यमपुरुष: एकवचनम् | क्रिया - मध्यमपुरुष: एकवचनम् |
| 5 | **शिक्षकेण** | **युवां** | **कथ्येथे ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – मध्यमपुरुष: द्विवचनम् | क्रिया - मध्यमपुरुष: द्विवचनम् |
| 6 | **अस्माभिः** | **यूयं** | **दृश्यध्वे ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – मध्यमपुरुष: बहुवचनम् | क्रिया - मध्यमपुरुष: बहुवचनम् |
| 7 | **त्वया** | **अहं** | **ताड्ये ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – उत्तममपुरुष: एकवचनम् | क्रिया - उत्तममपुरुष: एकवचनम् |
| 8 | **मित्राभ्यां** | **आवां** | **कथ्यावहे ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – उत्तममपुरुष: द्विवचनम् | क्रिया - उत्तममपुरुष: द्विवचनम् |
| 9 | **शिक्षकैः** | **वयं** | **पाठयामहे ।** |
| | कर्ता – तृतीयाविभक्तौ | कर्म – उत्तममपुरुष: बहुवचनम् | क्रिया - उत्तममपुरुष: बहुवचनम् |

**भाववाच्यम्**

यस्मिन् वाक्ये कर्म न भवति (अकर्मकधातुषु) तेषां भाववाच्ये परिवर्तनं भवति । भाववाच्ये क्रियायाः एव प्राधान्यम् । भाववाच्ये कर्तृपदं तृतीयाविभक्तौ अस्ति । सर्वदा क्रियावाचकपदं प्रथमपुरुषे एकवचने भवति ।

**केचन अकर्मकधातवः** - लज्ज्, ह्री, भू, अस्, विद्, स्था, जागृ, वृध्, एध्, शी, क्षि, भी, जीव्, मृ, स्वप्, क्रीड्, खेल्, रम्, रुच्, हस्, दीप्, ज्वल् इत्यादयः।

## वाच्यपरिवर्तनम् (कर्तृवाच्यात् कर्मवाच्ये )

कर्तृवाच्यात् कर्मवाच्ये तथा कर्मवाच्यात् कर्तृवाच्ये च वाक्यानि परिवर्तनीयानि। वाच्यपरिवर्तनाय अधः प्रदत्तां पट्टिकां पश्यन्तु।

| कर्तृवाच्ये | कर्मवाच्ये |
|---|---|
| **कर्ता** प्रथमाविभक्तिः | **कर्ता** तृतीयाविभक्तिः |
| **कर्म** द्वितीयाविभक्तिः | **कर्म** प्रथमाविभक्तिः |
| **क्रिया** कर्तृपदानुसारम् | **क्रिया** कर्मपदानुसारम् |

## वाच्यपरिवर्तनस्य उदाहरणम्

| | | | |
|---|---|---|---|
| कर्तृवाच्यम् - | रामः | ग्रन्थं | पठति। |
| | ↓ | ↓ | ↓ |
| | तृतीया | प्रथमा | कर्मानुसारम् |
| | ↓ | ↓ | ↓ |
| कर्मवाच्यम् - | रामेण | ग्रन्थः | पठ्यते। |

| क्रमसंख्या | कर्तृवाच्यम | कर्मवाच्यम् |
|---|---|---|
| १ | श्रमिकः पाषाणं त्रोटयति। | श्रमिकेण पाषाणः त्रोट्यते। |
| २ | अहं गृहम् गच्छामि। | मया गृहं गम्यते। |
| ३ | आवां पितरौ वन्दावहे। | आवाभ्यां पितरौ वन्द्येते। |
| ४ | वयं कार्यं कुर्मः। | अस्माभिः कार्यं क्रियते। |
| ५ | त्वं किं करोषि ? | त्वया किं क्रियते ? |
| ६ | युवां कुत्र गच्छथः ? | युवाभ्यां कुत्र गम्यते ? |
| ७ | माता भोजनं पचति। | मात्रा भोजनं पच्यते। |
| ८ | मम मित्रं चलच्चित्रं पश्यति। | मम मित्रेण चलच्चित्रं दृश्यते। |
| ९ | दुष्टाः शिष्टान् पीडयन्ति। | दुष्टैः शिष्टाः पीड्यन्ते। |
| १० | बुभुक्षितः भोजनं करोति। | बुभुक्षितेन भोजनं क्रियते। |
| ११ | बालिका कथां शृणोति। | बालिकया कथा श्रूयते। |
| १२ | बालिका गीतं गायति। | बालिकया गीतं गीयते। |

| | | |
|---|---|---|
| १३ | शिशुः मिष्टान्नं खादति। | शिशुना मिष्टान्नं खाद्यते। |
| १४ | अहं धनं ददामि। | मया धनं दीयते। |
| १५ | त्वं पाठं स्मरसि। | त्वया पाठः स्मर्यते। |
| १६ | सः कथां कथयति। | तेन कथा कथ्यते। |
| १७ | बुद्धिमती व्याघ्रं रक्षति। | बुद्धिमत्या न्याघ्रः रक्ष्यते। |
| १८ | यज्ञदत्तः ईश्वरं नमति। | यज्ञदत्तेन ईश्वरः नम्यते। |
| १९. | सैनिकः राष्ट्रं सेवते। | सैनिकेन राष्ट्रं सेव्यते। |
| २० | पिता पुत्रं रक्षति। | पित्रा पुत्रः रक्ष्यते । |

**भाववाच्ये परिवर्तनम् (कर्तृवाच्यात् भाववाच्ये )**

| क्र.सं. | कर्तृवाच्यम् | भाववाच्यम् |
|---|---|---|
| १ | मृगः धावति। | मृगेण धाव्यते। |
| २ | पुष्पं विकसति। | पुष्पेण विकस्यते। |
| ३ | पुष्पाणि विकसन्ति। | पुष्पैः विकस्यते। |
| ४ | क्रीडकः क्रीडति। | क्रीडकेन क्रीड्यते। |
| ५ | शिशुः रोदिति। | शिशुना रुद्यते। |
| ६ | अहं स्वपिमि। | मया सुप्यते। |
| ७ | छात्राः तिष्ठन्ति। | छात्रैः स्थीयते। |
| ८ | बालिकाः हसन्ति। | बालिकाभिः हस्यते। |
| ९ | अश्वाः धावन्ति। | अश्वैः धाव्यते। |
| १० | सज्जनाः उपविशन्ति। | सज्जनैः उपविश्यते। |
| ११ | वृक्षाः कम्पन्ते। | वृक्षैः कम्प्यते। |
| १२ | सः आचार्यः भवति। | तेन आचार्येण भूयते। |
| १३ | शिक्षकः तत्र तिष्ठति। | शिक्षकेण तत्र स्थीयते। |

वाच्यपरिवर्तनाय कतिपयक्रियारूपाणि अधः प्रदीयन्ते।

| क्रमसंख्या | धातुः | कर्तृवाच्यम् | कर्मवाच्यम् / भाववाच्यम् |
|---|---|---|---|
| १ | वह् | वहति | उह्यते |
| २ | भू | भवति | भूयते |
| ३ | रम् | रमते | रम्यते |
| ४ | पा | पिबति | पीयते |
| ५ | श्रु | शृणोति | श्रूयते |
| ६ | पच् | पचति | पच्यते |
| ७ | नी | नयति | नीयते |
| ८ | कृ | करोति | क्रियते |
| ९ | धृ | धारयति | धार्यते |
| १० | हन् | हन्ति | हन्यते |

**अभ्यासप्रश्नाः**

**1.अधोलिखितेषु कतृपदं कर्मवाच्ये परिवर्तनं कृत्वा रिक्तस्थानानि पूरयत।**

१.सा सखीं कथयति। ...................... सखी कथ्यते।

२.पुत्रः पितरं नमति। .......................पिता नम्यते।

३.अहं लेखं लिखामि। .......................लेखः लिख्यते।

४.त्वं कवितां श्रुणोति। .......................कविता श्रूयते।

५.जनाः सत्यं कथयन्ति। .......................सत्यं कथ्यते।

**2.उचितशब्दैः रिक्तस्थानानि पूरयत।**

१.रमया फलानि ......................। (खाद्यते, खाद्येते, खाद्यन्ते)

२.तेन कथा .............................। (श्रूयन्ते, श्रूयते, श्रृणोति)

३.मया चन्द्रः ..........................। (पश्यति, पश्यते, दृश्यते)

४.तैः पुस्तकं ............................। (पठ्यते, पठति, हस्यन्ते)

५.अस्माभिः रामः ....................। (स्मरामः, स्मर्यते, स्मर्यन्ते)

**वाच्यम् - अभ्यासप्रश्नानाम् उत्तराणि।**

1. १.तया २.पुत्रेण ३.मया ४. त्वया ५.जनैः

2. १.खाद्यन्ते २.श्रूयते ३.दृश्यते ४.पठ्यते ५.स्मर्यते

# समयलेखनम्



# समयलेखनम्

अङ्कानां स्थाने शब्देषु समयलेखनाय केचन निर्देशा: दीयन्ते । O'clock इत्यस्य स्थाने संस्कृते **वादनम्** इति प्रयुज्यते ।

1) समयलेखनाय संख्यावाचिशब्दानां मूलशब्दा: एव प्रयुज्यन्ते । यथा – एक द्वि त्रि चतुर् पञ्च षट् सप्त अष्ट नव दश एकादश द्वादश च । अधुना अधोदत्तां तालिकां पश्यत ।

| **समय:** | **संस्कृते समयलेखनम्** |
|---|---|
| 01.00 O'clock | एकवादनम् |
| 02.00 O'clock | द्विवादनम् |
| 03.00 O'clock | त्रिवादनम् |
| 04.00 O'clock | चतुर्वादनम् |
| 05.00 O'clock | पञ्चवादनम् |
| 06.00 O'clock | षड्वादनम् |
| 07.00 O'clock | सप्तवादनम् |
| 08.00 O'clock | अष्टवादनम् |
| 09.00 O'clock | नववादनम् |
| 10.00 O'clock | दशवादनम् |
| 11.00 O'clock | एकादशवादनम् |
| 12.00 O'clock | द्वादशवादनम् |

उदाहरणानि पश्याम: ।



कः समयः ? नववादनम् |



कः समयः ? चतुर्वादनम् |



कः समयः ? दशवादनम् |

2) 00.15 (Quarter past) इत्यस्य कृते संस्कृते **सपाद** शब्दस्य प्रयोग: क्रियते। अधुना अधोदत्तां तालिकां पश्यत।

| **समय:** | **संस्कृते समयलेखनम्** |
|---|---|
| 1.15 O'clock | सपादैकवादनम् |
| 2.15 O'clock | सपादद्विवादनम् |
| 3.15 O'clock | सपादत्रिवादनम् |
| 4.15 O'clock | सपादचतुर्वादनम् |
| 5.15 O'clock | सपादपञ्चवादनम् |
| 6.15 O'clock | सपादषड्वादनम् |
| 7.15 O'clock | सपादसप्तवादनम् |
| 8.15 O'clock | सपादाष्टवादनम् |
| 9.15 O'clock | सपादनववादनम् |
| 10.15 O'clock | सपाददशवादनम् |
| 11.15 O'clock | सपादैकादशवादनम् |
| 12.15 O'clock | सपादद्वादशवादनम् |

उदाहरणानि पश्याम:।





कः समयः ? सपादपञ्चवादनम्।





कः समयः ? सपादनववादनम्।



कः समयः ? सपादैकादशवादनम्।

3) 00.30 (Half past) इत्यस्य कृते संस्कृते **सार्ध** शब्दस्य प्रयोग: क्रियते। अधुना अधोदत्तां तालिकां पश्यत।

| समय: | संस्कृते समयलेखनम् |
|---|---|
| 1.30 O’clock | सार्धैकवादनम् |
| 2.30 O’clock | सार्धद्विवादनम् |
| 3.30 O’clock | सार्धत्रिवादनम् |
| 4.30 O’clock | सार्धचतुर्वादनम् |
| 5.30 O’clock | सार्धपञ्चवादनम् |
| 6.30 O’clock | सार्धषड्वादनम् |
| 7.30 O’clock | सार्धसप्तवादनम् |
| 8.30 O’clock | सार्धाष्टवादनम् |
| 9.30 O’clock | सार्धनववादनम् |
| 10.30 O’clock | सार्धदशवादनम् |
| 11.30 O’clock | सार्धैकादशवादनम् |
| 12.30 O’clock | सार्धद्वादशवादनम् |

उदाहरणानि पश्याम:।



कः समयः ? सार्धपञ्चवादनम्।



कः समयः ? सार्धषड्वादनम्।



कः समयः ? सार्धैकादशवादनम्।

4) 00.45. (Quarter to / Quarter less to) इत्यस्य कृते संस्कृते **पादोन** शब्दस्य प्रयोगः क्रियते। अधुना अधोदत्तां तालिकां पश्यत।

| **समयः** | **संस्कृते समयलेखनम्** |
|---|---|
| 1.45 O'clock | पादोनद्विवादनम् |
| 2.45 O'clock | पादोनत्रिवादनम् |
| 3.45 O'clock | पादोनचतुर्वादनम् |
| 4.45 O'clock | पादोनपञ्चवादनम् |
| 5.45 O'clock | पादोनषड्वादनम् |
| 6.45 O'clock | पादोनसप्तवादनम् |
| 7.45 O'clock | पादोनाष्टवादनम् |
| 8.45 O'clock | पादोननववादनम् |
| 9.45 O'clock | पादोनदशवादनम् |
| 10.45 O'clock | पादोनैकादशवादनम् |
| 11.45 O'clock | पादोनद्वादशवादनम् |
| 12.45 O'clock | पादोनैकवादनम् |

उदाहरणानि पश्यामः।



कः समयः ? पादोनषड्वादनम्।



कः समयः ? पादोनाष्टवादनम्।



कः समयः ? पादोनदशवादनम्।

5) am इत्यस्य कृते संस्कृते **प्रात:** इति pm इत्यस्य कृते **सायं / रात्रौ** इति च प्रयुज्यन्ते।

| **प्रभाते** (Morning) | | **सायं काले / रात्रौ** (Evening / Night) |
|---|---|---|
| प्रात: सपादषड्वादने सूर्यः उदेति। |  | सायं सपादषड्वादने सूर्यः अस्तं गच्छति। |
| पिता प्रात: दशवादने कार्यालयं गच्छति। |  | रमेशः रात्रौ दशवादने स्वपिति। |
| प्रात: सार्धनववादने रमेशः प्रातराशं करोति। |  | रात्रौ सार्धनववादने रमेशः पठति। |

**अभ्यासप्रश्ना:**

1.अधोलिखितकार्यक्रमे अङ्कानां स्थाने संस्कृते समयं लिखत।

१.प्रातः (7:30)......... वादने सभागारे आगमनम्।

२.सायं (8:00)...........वादने कवितापाठः।

३.रात्रौ (9:15)...........वादने प्रीतिभोजनम्।

४.रात्रौ (9:45)..........वादने प्रसादवितरणं प्रस्थानं च।

2. अधोलिखितकार्यक्रमे अङ्कानां स्थाने संस्कृते समयं लिखत।

1. प्रातः ................... (7:30) वादने योगाभ्यासः।
2. प्रातः ................... (8:45) वादने संगीतप्रस्तुतिः।
3. प्रातः ................... (10:15) वादने मुख्यातिथेः आशीर्वचनम्।
4. प्रातः ................... (11:00) वादने प्रसादवितरणं समर्पणं च।

**समयलेखनम् - अभ्यासप्रश्नानाम् उत्तराणि।**

1. १. सार्धसप्त २. अष्ट २. सपादनव ३. पादोनदश

2. १. सार्धसप्त २. पादोननव ३. सपाददश ४. एकादश

# अव्ययानि

येषां पदानां लिङ्ग-विभक्ति-वचननिमित्तको रूपभेदो नास्ति तानि **अव्ययानि** इत्युच्यते । संस्कृतभाषायाम् अव्ययानि नितरां प्राधान्यं भजन्ते । यथा शब्दाः विभक्त्यनुगुणं, वचनानुगुणं लिङ्गानुगुणं वा परिवर्तन्ते तथा एतानि अव्ययानि न परिवर्तन्ते । अर्थात् सर्वेषु वचनेषु, सर्वेषु पुरुषेषु, सर्वासु विभक्तिषु च एतेषाम् अव्ययानां रूपं समानं भवति । *( लिङ्गों,विभक्तियों वा वचनों में जो शब्द न बदले, एक जैसा रहे वह शब्द अव्यय कहलाता है ।)*

तदेव उच्यते-

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

उपयोगः- वाक्यानां परस्परमेलनाय अथवा प्रत्येकं वाक्ये प्रत्येकार्थद्योतकार्थं वा अव्ययानि उपयुज्यन्ते ।




**<u>पाठ्यपद्धतौ अन्तर्गतानि अव्ययपदानि</u>**

1. अद्य - TODAY
2. श्वः - TOMORROW
3. ह्यः - YESTERDAY
4. यदा - WHEN (Connecting word with THEN)

5. तदा - THEN (Connecting word with WHEN)

6. अधुना - NOW

7. इदानीम् - NOW

8. साम्प्रतम् - NOW

9. अत्र - HERE

10. यत्र - WHERE (Connecting word with THERE)

11. तत्र - THERE (Connecting word with WHERE)

12. सर्वत्र - EVERYWHERE

13. अन्यत्र - SOMEWHERE

14. कुतः - FROM WHERE

15. कुत्र - WHERE

16. कदा - WHEN

17. च - AND

18. अपि - ALSO

19. उच्चैः - LOUDER / HIGH

20. सहसा - SUDDENLY / UNEXPECTEDLY / QUICKLY

21. वृथा - VAIN / USELESS

22. इतस्ततः - HERE AND THERE

23. यदि-तर्हि - IF-THEN (Used to combine two sentences into one)

24. यावत्-तावत् - WHEN –TILL THAT TIME

25. शनैः - SLOWLY

## अत्र अव्ययानां प्रयोगः उदाहरणानां साहाय्येन जानीमः।

**अद्य - TODAY**

* यदा **अद्य** इत्यव्ययस्य प्रयोगं कुर्मः तदा क्रियापदं वर्तमानकाले (लट् लकारे) एव स्यात्।

- **अद्य** संस्कृतपरीक्षा भवति।
- **अद्य** पशुमहोत्सवः भवति।
- सः **अद्य** विद्यालयं गच्छति।
- **अद्य** सोमवासरः भवति।
- **अद्य** मम जन्मदिनम् अस्ति।

**श्वः - TOMORROW**

* यदा **श्वः** इत्यव्ययस्य प्रयोगं कुर्मः तदा क्रियापदं भविष्यकाले (लृट् लकारे) एव स्यात्।

- लता **श्वः** पुस्तकं पठिष्यति।
- अहं **श्वः** देवालयं गमिष्यामि।
- **श्वः** कः मया सह खेलिष्यति ?
- मम पिता **श्वः** विद्यालयम् आगमिष्यति।
- सर्वे छात्राः **श्वः** भ्रमणार्थं कन्याकुमारीं गमिष्यन्ति।

**ह्यः - YESTERDAY**

* यदा **ह्यः** इत्यव्ययस्य प्रयोगं कुर्मः तदा क्रियापदं भूतकाले (लङ् लकारे) एव स्यात्।

- **ह्यः** कः वासरः आसीत् ?
- **ह्यः** त्वं चलच्चित्रं द्रष्टुम् अगच्छः।
- **ह्यः** मम विद्यालयस्य वार्षिकोत्सवः आसीत्।
- नगरे **ह्यः** वृष्टिः अभवत्।
- अहं **ह्यः** जन्तुशालाम् अगच्छम्।

**यदा- तदा** - **WHEN-THEN (Connecting wordS)**

- **यदा** सूर्यः उदेति **तदा** कमलानि विकसन्ति ।
- **यदा** अध्यापकः कक्षां प्रविशति **तदा** छात्राः उत्तिष्ठन्ति ।
- **यदा** प्रवर्षः भवति **तदा** जलोपप्लवः भवति ।
- **यदा** सिंहराज: गर्जति **तदा** जन्तव: भयभीता: भवन्ति ।
- **यदा** वृष्टि: भवति **तदा** जना: छत्रम् उद्घाटयन्ति ।

**अधुना** - **NOW**

- छात्र: **अधुना** पाठं पठति ।
- त्वम् **अधुना** कुत्र गच्छसि ?
- **अधुना** किं करणीयम् ?
- **अधुना** अत्र वृष्टि: प्रचलति ।
- **अधुना** गृहकार्यं कुरु ।

**इदानीम्** - **NOW**

- **इदानीम्** अहं लिखामि ।
- **इदानीं** यानम् आगच्छति ।
- **इदानीं** वायुमण्डलं दूषितं भवति।
- **इदानीं** विद्यालये विराम: वर्तते ।
- **इदानीं** भोजनं कुरु ।

**साम्प्रतम्** - **NOW**

- **साम्प्रतं** कार्यं कुरु ।
- त्वं **साम्प्रतं** ग्रामं गच्छ ।
- **साम्प्रतं** किं करणीयम् ?
- सः **साम्प्रतं** दूरदर्शनं पश्यति ।
- अहं **साम्प्रतं** आपणं गच्छामि ।

**अत्र - HERE**

- त्वं **अत्र** आगच्छ ।
- **अत्र** जीवितं दुर्वहं जातम् ।
- **अत्र** व्याघ्र: जम्बूकः च आगच्छत: ।
- **अत्र** एक: विषसर्प: अस्ति ।
- मम गृहम् **अत्र** अस्ति ।

**यत्र-तत्र – WHERE-THERE (Connecting word)**

- **यत्र** पुष्पाणि सन्ति **तत्र** भ्रमराः आगच्छन्ति ।
- **यत्र** जलं **तत्र** जीवनम् ।
- **यत्र** धूम: अस्ति **तत्र** अग्नि: अपि अस्ति ।
- **यत्र** सा धूर्ता वसति **तत्र** गम्यताम् ।
- **यत्र** वातावरणं स्वच्छं भवति **तत्र** जीवनं सुकरं भवति ।

**सर्वत्र - EVERYWHERE**

- **सर्वत्र** निर्मलं जलम् अस्ति ।
- **सर्वत्र** जलेपप्लवः सञ्जातः ।
- **सर्वत्र** जनाः भ्रमन्ति ।
- वायु: **सर्वत्र** वहति ।
- भारते **सर्वत्र** संस्कृतं पाठ्यते ।

**अन्यत्र - SOMEWHERE ELSE**

- **अन्यत्र** जलम् अस्ति ।
- सः **अन्यत्र** गच्छति ।
- स: अत्र नास्ति **अन्यत्र** अन्वेषणं करोतु ।
- मम गृहम् **अन्यत्र** अस्ति ।
- मम पिता **अन्यत्र** कार्यं करोति ।

( त्र युक्तानि अव्ययानि स्थानबोधकानि भवन्ति)

**कुतः** - **FROM WHERE ?**

- व्याघ्रः **कुतः** आगच्छति ?
- नदी **कुतः** प्रवहति?
- युवां **कुतः** आगच्छथ: ?
- **कुत:** आगच्छसि मातुलचन्द्र ! ?
- त्वं **कुत:** संस्कृतं पठितवान् ?

(कुत: इति प्रश्नवाचकम् अव्ययम् अस्ति )

**कुत्र -WHERE ?**

- भवान् **कुत्र** वसति ?
- सः **कुत्र** कार्यं करोति ?
- व्याघ्रः **कुत्र** गर्जति ?
- **कुत्र** गमिष्यसि मातुलचन्द्र ! ?
- त्वं **कुत्र** गच्छसि ?

(कुत्र इति प्रश्नवाचकम् अव्ययम् अस्ति )

**कदा** - **WHEN ?**

- कोकिलः **कदा** कूजति ?
- त्वं **कदा** विद्यालयं गमिष्यसि ?
- सूर्यः **कदा** उदेति ?
- सः **कदा** ग्रामं गमिष्यति ?
- परीक्षा **कदा** भविष्यति ?

(कदा इति प्रश्नवाचकम् अव्ययम् अस्ति )

**च** - **AND**

- जम्बुकः व्याघ्रः **च** तत्र गच्छतः ।
- लता मेधा **च** विद्यालयं गच्छतः।
- कृष्णः पठने वंशीवादने **च** कुशलः आसीत् ।
- सः पत्रं पुष्पं **च** नयति।
- अहं संस्कृतं गणितं विज्ञानं **च** पठामि ।

**अपि** - **ALSO**

- सूर्यः शोभते । चन्द्रः **अपि** शोभते ।
- अहम् **अपि** विद्यालयं गमिष्यामि ।
- लवः गायति । कुशः **अपि** गायति ।
- **अपि** कुशलं महाराजस्य ?
- **अपि** गृहकार्यं कृतम् ?

(अपि इति अव्ययं क्वचित् प्रश्नवाचकपदरूपेण अपि प्रयुज्यते ।)

**उच्चैः** - **LOUDER / HIGH**

- मेघानाम् **उच्चैः** स्थितिः भवति ।
- सिंहः **उच्चैः** गर्जति ।
- छात्रः **उच्चैः** श्लोकालापनं करोति ।
- क्रुद्धः राक्षसः **उच्चैः** आक्रोशति ।
- शिक्षिका **उच्चैः** वदति ।

**सहसा** - **SUDDENLY / UNEXPECTEDLY**

- मार्गे **सहसा** व्याघ्रः आगच्छत् ।
- ग्रामे **सहसा** वर्षा अभवत् ।
- **सहसा** विदधीत न क्रियाम् अविवेकः परमापदां पदम् ।
- ह्यः वर्षासु **सहसा** वृक्षः पतितः ।
- कक्षायां छात्राः **सहसा** अहसन् ।

**वृथा** - **IN VAIN**

- **वृथा** वृष्टिः समुद्रेषु।
- **वृथा** तृप्तस्य भोजनम्।
- सः **वृथा** उपदेशं करोति।
- दिवा दीपप्रज्वालनं **वृथा**।
- गुरूपदेशः **वृथा** न स्यात्।

**इतस्ततः** - **HERE AND THERE**

- बालकः उद्याने **इतस्ततः** भ्रमति।
- वानराः **इतस्ततः** कूर्दन्ति।
- लीला कक्षायाम् **इतस्ततः** भ्रमति।
- वने पशवः **इतस्ततः** चरन्ति।
- सिंहः भोजनार्थम् **इतस्ततः** अटति।

**यदि-तर्हि** - **IF-THEN (Used to combine two sentences into one)**

- **यदि** परिश्रमः क्रियते **तर्हि** सफलता प्राप्यते।
- **यदि** आत्मविश्वासः स्यात् **तर्हि** कार्यसिद्धिः भविष्यति।
- **यदि** वृष्टिः भवति **तर्हि** शस्याः समृद्धाः भविष्यन्ति।
- **यदि** छात्रः सम्यक् पठेत् **तर्हि** परीक्षायां विजयः सुनिश्चितः भवति।
- **यदि** प्राचार्यः अनुमतिं यच्छेत् **तर्हि** छात्राणां विनोदयात्रा भविष्यति।

**यावत्-तावत्** - **WHEN –TILL THEN**

- **यावत्** अध्यापकः कक्षां न प्रविशति **तावत्** छात्राः कोलाहलं कुर्वन्ति।
- **यावत्** भूमौ सरितः गिरयश्च स्थास्यन्ति **तावत्** रामायणकथा लोकेषु प्रचरिष्यति।
- **यावत्** विजयं न प्राप्नोति **तावत्** परिश्रमं करोतु।
- **यावत्** प्रकाशः न प्रसरति **तावत्** अन्धकारः भवति।
- **यावत्** परिश्रमं न करोषि **तावत्** कार्यं न प्राप्स्यसि।

**शनैः** - **SLOWLY**

- उष्ट्रः **शनैः** चलति।
- गजः **शनैः** भारं वहति।
- कूर्मः **शनैः** गच्छति।
- वृद्धः **शनैः** चलति ।
- रात्रौ चौरः **शनैः** गृहस्य अन्तः प्रविशति।

## अभ्यासप्रश्नाः

**उचितम् अव्ययपदं चित्वा वाक्यानि पूरयत।**

1. ----- जीवनं दुर्वहं भवति। (अत्र, यावत्, यदि)
2. ----- हरीतिमा तत्र शुचिपर्यावरणम्। (यदि, यत्र, यावत्)
3. प्राकृतिकवातावरणे क्षणं सञ्चरणं ---- लाभदायकं भवति। (एव, च, अपि)
4. भवान् ---- भयात् पलायितः ? (यथा, कति, कुतः)
5. यदि एवं भवति ---- मां निजगले बद्ध्वा चल सत्वरम्। (तर्हि, तत्र, तावत्)
6. अहम् ---- कुश इति आत्मानं श्रावयामि। (एव, अपि, न)
7. एवं------- पृच्छामि निरनुक्रोश इति। (यत्र, तावत्, च)
8. रामः वनं गच्छति। सीता ----- वनं गच्छति। (अपि, यदा, कुत्र)
9. सः अयं परिकरः श्रोतारं पुनाति रमयति ---। ( एव, च, मा)
10. बालभावात् हिमकरः ---- विराजते ? (तदा, कुत्र, न)
11. सः दीनः इति जानन् ---- कृषकः तं बहुधा पीडयति। (अपि, इव, एव)
12. कुपिता सा ----- वदति। (उच्चैः, च ,न)
13. यत्र वृक्षाः सन्ति ----- खगाः आगच्छन्ति। (तावत्, तत्र, अपि )
14. ---- लता आगच्छति तावत् त्वं तिष्ठ। (यावत्, यत्र,यदि)
15. ------ सोमवासरः अस्ति। (अद्य, अत्र, ह्यः)
16. ----- सः गृहं अगच्छत्। (अद्य, ह्यः, श्वः )
17. शिशुः----- चलति। (यत्र, इतस्ततः, च)
18. ------- त्वं गृहं गच्छ। (अधुना, वृथा, उच्चैः)

19----- वृष्टि: समाप्ता भविष्यति तदा वयं चलामः। (यदा, शनैः, सहसा)

20.------- पाठं पठतु। (एव, साम्प्रतम्, च)

21.निर्बली बलं ---- वेत्ति। (वा, च , न)

22.पशुना ------ उदीरितः अर्थः गृह्यते। (अपि, एव , मा)

23.हयाः नागाः ---- बोधिताः वहन्ति। (वा, च, न)

24.दैवात् --- फलं नास्ति वृक्षस्य छाया केन निवार्यते। (यदि, मा, न)

25. अयोग्यः पुरुषः ------ दुर्लभः। (एवं, सह, तत्र)

26.यथा सविता उदये रक्तः-----अस्तमये च रक्तः भवति। (अपि, तथा, न)

27.अपरः वानरः सिंहस्य कर्णमाकृष्य ----- वृक्षोपरि आरोहति। (पुनः, कुत्र, एव)

28.त्वं वनराजः भवितुं ------अयोग्यः। (कुत्र, सर्वथा, सह)

29.-------अहं कृष्णवर्णःतर्हि त्वं किं गौराङ्गः ? (यदि, यत्र, एव)

30.काकचेष्टः विद्यार्थी ------ आदर्शछात्रः मन्यते। (यदि, यत्र, एव)

31.वनराजपदाय अहम् ----- योग्यः। (कदा, एव, मा)

32.सिंहेन बहुकालपर्यन्तं शासनं कृतं परं ------तु कोऽपि पक्षी एव राजा इति निश्चेतव्यम्।
(अधुना, इति, श्वः)

33. त्वया अहं चौरात् वारितः। ----निजकृत्यस्य फलं भुङ्क्ष्व। (च, एव, इदानीम्)

**अव्ययम् - अभ्यासप्रश्नानाम् उत्तराणि**

1.अत्र 2.यत्र 3.अपि 4.कुतः 5.तर्हि 6.अपि 7.तावत् 8.अपि 9.च 10.कुत्र 11. अपि 12.उच्चैः 13.तत्र 14.यावत् 15.अद्य 16.ह्यः 17. इतस्ततः 18.अधुना 19.यदा 20. साम्प्रतम् 21.न 22. अपि 23. च 24. यदि 25. तत्र 26. तथा 27. पुनः 28. सर्वथा 29. यदि 30. एव 31. एव 32. अधुना 33. इदानीम्

# अशुद्धिसंशोधनम्



अशुद्धिसंशोधनाय अनुवादस्य सामान्य नियमानां ज्ञानम् आवश्यकम् अस्ति। अनुवादविधौ अस्माभिः ते नियमाः पठिताः ।

**वचनदृष्ट्या वाक्यसंशोधनम्**

कर्तृक्रिययोः वचनं सर्वदा समानं भवति । यदि कर्ता एकवचने भवति तर्हि क्रिया अपि एकवचने भवति। यदि कर्ता द्विवचने भवति तर्हि क्रिया अपि द्विवचने भवति। यदि कर्ता बहुवचने भवति तर्हि क्रिया अपि बहुवचने भवति। यदि विशेष्यपदम् एकवचने भवति तर्हि विशेषणपदम् अपि एकवचने भवति। यदि विशेष्यपदम् एकवचने भवति तर्हि विशेषणपदम् अपि एकवचने भवति। यदि विशेष्यपदं द्विवचने भवति तर्हि विशेषणपदम् अपि द्विवचने भवति। यदि विशेष्यपदं बहुवचने भवति तर्हि विशेषणपदम् अपि बहुवचने भवति।

यथा -

| **अशुद्धं वाक्यम्।** ( अशुद्धं पदं रेखाङ्कितम् ) | **शोधितं वाक्यम्।** |
|---|---|
| 1. ते मम **मित्रम्** सन्ति। | ते मम **मित्राणि** सन्ति। |
| 2. तत्र **अनेकाः** पुष्पाणि सन्ति। | तत्र **अनेकानि** पुष्पाणि सन्ति। |
| 3. एका बालिका **क्रीडन्ति**। | एका बालिका **क्रीडति**। |
| 4. त्रयः **बालकः** पठन्ति। | त्रयः **बालकाः** पठन्ति। |
| 5. चत्वारः बालकाः **धावति**। | चत्वारः बालकाः **धावन्ति**। |

**लिङ्गदृष्ट्या वाक्यसंशोधनम्**

वाक्ये विशेषणविशेष्यपदानि समानलिङ्गे समानवचने समानविभक्तौ च भवितव्यानि।

समानलिङ्गे यथा -

1. यदि विशेष्यपदं पुल्लिङ्गे भवति तर्हि विशेषणपदम् अपि पुल्लिङ्गे भवति।
2. यदि विशेष्यपदं स्त्रीलिङ्गे भवति तर्हि विशेषणपदम् अपि स्त्रीलिङ्गे भवति।
3. यदि विशेष्यपदं नपुंसकलिङ्गे भवति तर्हि विशेषणपदम् अपि नपुंसकलिङ्गे भवति।

समानवचने यथा -

1. यदि विशेष्यपदम् एकवचने भवति तर्हि विशेषणपदम् अपि एकवचने भवति।
2. यदि विशेष्यपदं द्विवचने भवति तर्हि विशेषणपदम् अपि द्विवचने भवति।
3. यदि विशेष्यपदं बहुवचने भवति तर्हि विशेषणपदम् अपि बहुवचने भवति।

समानविभक्तौ यथा :-

विशेष्यपदस्य या विभक्ति: सा एव विभक्ति: स्यात् विशेषणपदस्य अपि ।

यथा -

| **अशुद्धं वाक्यम् ।** ( अशुद्धं पदं रेखाङ्कितम् ) | **शोधितं वाक्यम् ।** |
|---|---|
| 1. वस्त्राणि **सुन्दरा:** सन्ति । | वस्त्राणि **सुन्दराणि** सन्ति । |
| 2. वृक्षे मधुराणि **फला:** सन्ति । | वृक्षे मधुराणि **फलानि** सन्ति । |
| 3. **लोभम्** न करणीयः । | **लोभ:** न करणीयः । |
| 4. **शुद्धम्** पवनः वहति । | **शुद्ध:** पवनः वहति । |
| 5. तस्य हस्ते **एकम्** ग्रन्थ: अस्ति । | तस्य हस्ते **एक:** ग्रन्थ: अस्ति । |
| 6. तत्र **चत्वार:** बालिका: क्रीडन्ति । | तत्र **चतस्र:** बालिका: क्रीडन्ति । |

## पुरुषदृष्ट्या वाक्यसंशोधनम्

यदि कर्ता प्रथमपुरुषे अस्ति तर्हि क्रिया अपि प्रथमपुरुषे भवति । यदि कर्ता मध्यमपुरुषे अस्ति तर्हि क्रिया अपि मध्यमपुरुषे भवति । यदि कर्ता उत्तमपुरुषे अस्ति तर्हि क्रिया अपि उत्तमपुरुषे भवति ।

यथा -

| **अशुद्धं वाक्यम् ।** ( अशुद्धं पदं रेखाङ्कितम् ) | **शोधितं वाक्यम् ।** |
|---|---|
| 1. सः बालकः **खादसि** । | सः बालकः **खादति** । |
| 2. भवान् **पठसि** । | भवान् **पठति** । |
| 3. त्वं मम मित्रम् **अस्ति** । | त्वं मम मित्रम् **असि** । |
| 4. वानरः **अकूर्दः** । | वानरः **अकूर्दत्** । |
| 5. त्वं कदा नाटकम् **द्रक्ष्यति** ? | त्वं कदा नाटकम् **द्रक्ष्यसि** ? |
| 6. अहं पुस्तकं **पठसि** । | अहं पुस्तकं **पठामि** । |

## लकारदृष्ट्या वाक्यसंशोधनम्

1. अद्य, अधुना, सम्प्रति, इदानीम् - एतेषाम् अव्ययानां प्रयोगे वर्तमानकालार्थे च लट् लकारस्य प्रयोग: भवति ।
2. ह्यः इति अव्ययस्य प्रयोगे भूतकालार्थे च लङ् लकारस्य प्रयोग: भवति ।
3. श्व: इति अव्ययस्य प्रयोगे भविष्यकालार्थे च लृट् लकारस्य प्रयोग: एव भवति ।

यथा -

| **अशुद्धं वाक्यम् ।** ( अशुद्धं पदं रेखाङ्कितम् ) | **शोधितं वाक्यम् ।** |
|---|---|
| 1. सा श्वः **आगच्छत्** । | सा श्वः **आगमिष्यति** । |
| 2. ह्यः अवकाशः **अस्ति** । | ह्यः अवकाशः **आसीत्** । |
| 3. वयम् ह्यः विज्ञानम् **पठति** । | वयम् ह्यः विज्ञानम् **अपठाम** । |
| 4. अधुना अहम् **अगच्छाम** । | अधुना अहम् **गच्छामि** । |

**विभक्तिदृष्ट्या वाक्यसंशोधनम्**

विभक्ति प्रयोगः द्विविधा भवति । कारकविभक्तिः उपपदविभक्तिः च ।

**कारकविभक्तिः -**

| | |
|---|---|
| 1. कर्त्रर्थे प्रथमा-विभक्तिः । | ( ने - Self ) |
| 2. कर्मार्थे द्वितीया-विभक्तिः । | ( को - To ) |
| 3. करणार्थे तृतीया-विभक्तिः । | ( से - By ) |
| 4. सम्प्रदानार्थे चतुर्थी-विभक्तिः । | ( को / के लिए - For) |
| 5. अपादानार्थे पञ्चमी-विभक्तिः । | ( से - From ) |
| 6. सम्बन्धार्थे षष्ठी-विभक्तिः । | ( का / के / की / में से – Of / Among) |
| 7. अधिकरणार्थे सप्तमी-विभक्तिः । | ( में / पर / में से – In/ On/ Among) |

**उपपदविभक्तिः**

केषाञ्चित् नियुक्तपदानां धातूनां वा प्रयोगे इयमेव विभक्तिः प्रयोक्तव्या इति नियमः वर्तते । सः नियमः एव उपपदविभक्तिनियमः इति कथ्यते । यथा -

1. धिक् प्रति उभयतः अभितः परितः विना आदिशब्दानां योगे द्वितीयाविभक्तिः भवति ।
2. सह साकम् सार्धम् विना अलम् आदिशब्दानां योगे तृतीयाविभक्तिः भवति ।
3. रुच् कुप् दा धातवः नमः स्वस्ति स्वाहा शब्दानां च प्रयोगे चतुर्थीविभक्तिः भवति ।
4. भी रक्ष् धात्वोः विना शब्दस्य च योगे पञ्चमीविभक्तिः भवति ।
5. उपरि अधः पश्चात् आदिशब्दानां योगे षष्ठीविभक्तिः भवति ।
6. स्निह् विश्वस् धात्वोः निपुण प्रवीणशब्दयोः च योगे सप्तमीविभक्तिः भवति ।

यथा -

**अशुद्धं वाक्यम्।** ( अशुद्धं पदं रेखाङ्कितम् ) **शोधितं वाक्यम्।**

1. **त्वं** पितुः नाम किम् ? — **तव** पितुः नाम किम् ?
2. **तस्य** नमः। — **तस्मै** नमः।
3. सः **चौरेण** विभेति। — सः **चौरात्** विभेति।
4. अहं **मित्रं** सह गच्छामि। — अहं **मित्रेण** सह गच्छामि।
5. **कविभिः** कालीदास: श्रेष्ठः। — **कविषु** कालीदास: श्रेष्ठः।

**अभ्यासप्रश्नाः**

**अधोलिखितवाक्येषु रेखाङ्किताशुद्धपदानां स्थाने उचितपदं चित्वा वाक्यं शोधयत -**

1. सः संस्कृतं **पठसि**।

    अ) पठतः    ब) पठति    स) पठथ    द) पठामि

2. युवां किमर्थं **हससि**।

    अ) हसतः    ब) हसति    स) हसथ    द) हसथः

3. अद्य सोमवासरः **आसीत्**।

    अ) अस्ति    ब) असि    स) भविष्यति    द) स्म

4. सरोवरे **कमलाः** विकसन्ति।

    अ) कमलानि    ब) कमलः    स) कमले    द) कमलम्

5. **चतस्त्रः** बालकाः सन्ति।

    अ) चतुरः    ब) चत्वारा    स)चत्वारः    द) चतस्त्रा

6. **द्वे** बालकौ स्तः।

    अ) द्वौ    ब) द्वा    स) द्वयः    द) द्वाभिः

7. रामः दशरथस्य पुत्रः **अस्मि**।

    अ) आस्व    ब) असि    स) भविष्यति    द) आसीत्

8. आवां **लिखामः**।

    अ) लिखति    ब) लिखावः    स) लिख    द) लिखसि

9. **शरीरः** अस्वस्थम् अस्ति।

    अ) शरीर    ब) शरीरम्    स) शरीरा    द) शरीरे

10. **<u>सर्वे</u>** बालिकाः गायन्ति ।

अ) सर्वः　　ब) सर्वा　　स) सर्वाः　　द) सर्वम्

11. **<u>सः</u>** पुरुषाः सन्ति ।

अ) ते　　ब) ताः　　स) सा　　द) तानि

12. **<u>वृक्षाणि</u>** हरिताः सन्ति ।

अ) वृक्षे　　ब) वृक्षं　　स) वृक्षाः　　द) वृक्षम्

13.**<u>शाखेषु</u>** खगाः सन्ति ।

अ) शाखा　　ब) शाखे　　स) शाखासु　　द) शाखाम्

14. **<u>वनः</u>** अतिविस्तृतम् अस्ति ।

अ) वनम्　　ब) वने　　स) वनात्　　द) वनाय

15. **<u>उपवनः</u>** सुन्दरम् अस्ति ।

अ) उपवनात्　　ब)उपवने　　स) उपवनम्　　द)उपवनाम्

16. त्वं काव्यं **<u>पठथ</u>** ।

अ) पठसि　　ब) पठति　　स) पठामि　　द) पठामः

17. **<u>श्वः</u>** परीक्षा आसीत् ।

अ) अद्य　　ब) ह्यः　　स) अधुना　　द) सम्प्रति

18.अधुना सः पाठं **<u>पठिष्यति</u>** ।

अ) पठसि　　ब) पठति　　स) पठामि　　द) पठामः

19. धनिक: **<u>भिक्षुकम्</u>** भोजनम् यच्छति ।

अ) भिक्षुकाय　　ब) भिक्षुकः　　स) भिक्षुकम्　　द) भिक्षुकस्य

20. **<u>ग्रामस्य</u>** अभितः वृक्षाः सन्ति ।

अ) ग्रामः　　ब) ग्रामे　　स) ग्रामात्　　द) ग्रामम्

21. **<u>बालकं</u>** स्वस्ति ।

अ) बालकाय　　ब) बालकः　　स) बालकम्　　द) बालकाः

22. **<u>विवादम्</u>** अलम् ।

अ) विवादाय　　ब) विवादः　　स) विवादेन　　द) विवादात्

23. <u>**जलः**</u> विना जीवनं न अस्ति।

अ) जलाय  ब) जले  स) जल  द) जलम्

24. <u>**त्रयः**</u> पुस्तकानि सन्ति।

अ) त्रि  ब) त्रीणि  स) त्रे  द) त्रयम्

25. भवत्यः पत्रं <u>**लिखथः**</u>।

अ) लिखन्ति  ब) लिखावः  स) लिख  द) लिखसि

**अशुद्धिसंशोधनम् - अभ्यासप्रश्नानाम् उत्तराणि।**

1. पठति 2. हसथः 3.अस्ति 4.कमलानि 5.चत्वारः 6.द्वौ 7.आसीत् 8.लिखावः

9. शरीरम् 10. सर्वाः 11. ते 12. वृक्षाः 13. शाखासु 14.वनम् 15.उपवनम्

16. पठसि 17. ह्यः 18. पठति 19.भिक्षुकाय 20.ग्रामम् 21.बालकाय

22. विवादेन 23. जलम् 24. त्रीणि 25. लिखन्ति

# घ खण्डः

# पठितावबोधनम्

## प्रथमः पाठः

## शुचिपर्यावरणम्



# प्रथमः पाठः - शुचिपर्यावरणम्

**प्रथमः श्लोकः**

दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम् ।
शुचि-पर्यावरणम् ॥
महानगरमध्ये चलदनिशं कालायसचक्रम् ।
मन: शोषयत् तनु: पेषयद् भ्रमति सदा वक्रम् ॥
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम् ॥

**एकपदेन उत्तरत**

1 ) अत्र जीवितं कथं जातम् ?

2 ) का एव शरणम् अस्ति ?

3 ) किं शोषयत् सदा वक्रम् भ्रमति ?

4 ) चक्रं कथं भ्रमति?

5) अत्र किं दुर्वहं जातम् ?

**पूर्णवाक्ये उत्तरं लिखत ।**

1 ) महानगरमध्ये अनिशं किं चलति ?

2 ) कुत्र कालायसचक्रम् अनिशं चलति ?

3 ) दुर्दान्तैर्दशनैरमुना किं न स्यात् ?

4 ) कालायसचक्रम् महानगरमध्ये किं करोति ?

**निर्देशानुसारम् उत्तरत**

1) "अत्र जीवितं दुर्वहं जातम् " - अत्र **कठिनम्** इत्यर्थे किं पदं दत्तम् ?

क) जीवितम् ख) जातम्

ग) शरणम् घ) दुर्वहम्

2) " कालायसचक्रं सदा वक्रं भ्रमति " - अत्र क्रियापदं किम् ?

क) वक्रम् ख) सदा

ग) भ्रमति घ) कालायसचक्रम्

3) 'दुर्दान्तैः दशनैः अमुना स्यान्नैव जनग्रसनम्' - अस्मिन् वाक्ये **जनपीडनम्** इति पदस्य किं पर्यायवाचिपदं प्रयुक्तम् ?

क) दुर्दान्तैः　　　　ख) दशनैः

ग) जनग्रसनम्　　　　घ) नैव

4) " मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम् " अस्मिन् वाक्ये **मानसम्** इति पदस्य किं पर्यायवाचिपदं प्रयुक्तम् ?

क) सदा　　　　ख) वक्रम्

ग) शोषयत्　　　　घ) मनः

5) " मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम् " - अस्मिन् वाक्ये **शरीरम्** इति पदस्य किं पर्यायवाचिपदं प्रयुक्तम् ?

क) शोषयत्　　　　ख) पेषयत्

ग) तनुः　　　　घ) भ्रमति

6) " मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम् " - अस्मिन् वाक्ये **एकदा** इति पदस्य किं विलोमपदं प्रयुक्तम् ?

क) शोषयत्　　　　ख) सदा

ग) तनुः　　　　घ) वक्रम्

**द्वितीयः श्लोकः**

कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् ।
वाष्पयानमाला संधावति वितरन्ती ध्वानम् ।
यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम् ॥

**एकपदेन उत्तरत ।**

1 ) शतशकटीयानम् कज्जलमलिनं कम् मुञ्चति ?

2 ) वाष्पयानमाला किं वितरन्ति ?

3 ) किं धूमं मुञ्चति ?

**पूर्णवाक्ये उत्तरं लिखत ।**

1 ) शतशकटीयानम् कीदृशम् धूमं मुञ्चति ?

2 ) का ध्वानम् वितरन्ती संधावति ?

3 ) केषम् पङ्क्तय: अनन्ता:?

4 ) कस्मात् कारणात्  संसरणम् कठिनं वर्तते ?

**निर्देशानुसारम् उत्तरत**

1)“वाष्पयानमाला संधावति वितरन्ती ध्वानम्” अस्मिन् वाक्ये क्रियापदं किम् ?

क) वाष्पयानमाला ख) संधावति

ग) ध्वानम् घ) वितरन्ति

2) “कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्” अस्मिन् वाक्ये कर्तृपदं किम् ?

क) कज्जलमलिनम् ख) धूमम्

ग) मुञ्चति घ) शतशकटीयानम्

3) “वाष्पयानमाला संधावति वितरन्ती ध्वानम्” अस्मिन् वाक्ये **शब्दः** इति पदस्य किं पर्यायवाचिपदं दत्तम् ?

क) वाष्पयानमाला ख) संधावति

ग) वितरन्ति घ) ध्वानम्

4) “कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्” अस्मिन् वाक्ये **त्यजति** इति पदस्य किं पर्यायवाचिपदं दत्तम् ?

क) मुञ्चति ख) कज्जलमलिनम्

ग) शतशकटीयानम् घ) धूमम्

5) यानानां पङ्क्तयो ह्यनन्ता: कठिनं संसरणम् अस्मिन् वाक्ये **कठिनम्** इति पदस्य विशेष्यपदं किम् ?

क) यानानाम् ख) पङ्क्तयः

ग) ह्यनन्ता: घ) संसरणम्

6) “कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्” अस्मिन् वाक्ये **धूमम्** इति पदस्य विशेषणपदं किम्?

क) कज्जलमलिनम् ख) धूमम्

ग) मुञ्चति घ) शतशकटीयानम्

**<u>तृतीयः श्लोकः</u>**

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् ।

**एकपदेन उत्तरत ।**

1) किं भृशं दूषितं भवति ?

2) निर्मलं किं नास्ति ?

3) कीदृशं भक्ष्यं ?

4) वायुमण्डलं कीदृशम् अस्ति ?

5) कीदृशम् जलम् नास्ति ?

**पूर्णवाक्ये उत्तरं लिखत ।**

1) धरातलम् कीदृशम् जातम् ?

2) बहिरन्तर्जगति किं करणीयम् ?

**निर्देशानुसारम् उत्तरत ।**

1) "कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्" अस्मिन् वाक्ये **भक्ष्यम्** इति पदस्य विशेषणपदं किम्?

क) कुत्सितवस्तुमिश्रितम्　　　ख) भक्ष्यम्

ग) समलम्　　　घ) धरातलम्

2) इदानीं वायुमण्डलं भृशं दूषितम् अस्ति- अत्र **अत्यधिकम्** इत्यर्थे किं पदं दत्तम् ?

क) दूषितम्　　　ख) भृशम्

ग) इदानीम्　　　घ) वायुमण्डलम्

3) "कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्" अस्मिन् वाक्ये **समलम्** इति पदस्य विशेष्यपदं किम्?

क) भक्ष्यम्　　　ख) समलम्

ग) धरातलम्　　　घ) मिश्रितम्

4) “इदानीं वायुमण्डलं भृशं दूषितम् अस्ति” अस्मिन् वाक्ये **कलुषितम्** इति पदस्य किं पर्यायवाचि शब्दं प्रयुक्तम्?

| | |
|---|---|
| क) भृशम् | ख) दूषितम् |
| ग) अस्ति | घ) इदानीम् |

**<u>चतुर्थः श्लोकः</u>**

कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम् ।
प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम् ।
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् ।।

**एकपदेन उत्तरत ।**

1) कुतः मां कञ्चित् कालं नय ?
2) कञ्चित् कालं मां अस्मान्नगरात् कुत्र नय ?
3) निर्झर-नदी-पयःपूरम् कुत्र अस्ति ?
4) कविः कस्मात् बहुदूरं गन्तुं कथयति ?

**पूर्णवाक्ये उत्तरं लिखत ।**

1) कविः ग्रामान्ते किं दृष्टुम् इच्छति ?
2) कविः कुत्र सञ्चरणम् कर्तुम् कथयति ?

**निर्देशानुसारम् उत्तरत ।**

1) “एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्” अस्मिन् वाक्ये **कान्तारे** इति पदस्य विशेषणपदं किम्?

| | |
|---|---|
| क) एकान्ते | ख) कान्तारे |
| ग) क्षणमपि | घ) सञ्चरणम् |

2) “प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम्” अस्मिन् वाक्ये **तटिनी** इति पदस्य पर्यायवाचिपदम् ?

| | |
|---|---|
| क) प्रपश्यामि | ख) ग्रामान्ते |
| ग) नदी | घ) निर्झर |

3) “प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम्” अस्मिन् वाक्ये क्रियापदं किम् ?

| | |
|---|---|
| क) प्रपश्यामि | ख) ग्रामान्ते |
| ग) नदी | घ) निर्झर |

4) “प्रपश्यामि ग्रामान्ते निझर-नदी-पय:पूरम्” अस्मिन् वाक्ये कर्तृपदं किम् ?

क) ग्रामान्त　　　　ख) अहम्

ग) नदी　　　　घ) पय:पूरम्

5) “एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्” अस्मिन् वाक्ये **वने** इति पदस्य पर्यायवाचिपदं किम्?

क) कान्तारे　　　　ख) क्षणमपि

ग) सञ्चरणम्　　　　घ) एकान्ते

6) “एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्” अस्मिन् वाक्ये **एकान्ते** इति पदस्य विशेष्यपदं किम्?

क) कान्तारे　　　　ख) क्षणमपि

ग) सञ्चरणम्　　　　घ) एकान्ते

7) “कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम्” अस्मिन् वाक्ये **अतिसमीपम्** इति पदस्य विपरीतपदं किम्?

क) बहुदूरम्　　　　ख) कालं

ग) कञ्चित्　　　　घ) माम्

8) “मां अस्मात् नगरात् बहुदूरं कञ्चित् कालं नय ” अत्र कर्तृपदं किम् ?

क) माम्　　　　ख) बहुदूरम्

ग) त्वम्　　　　घ) कालम्

**पञ्चमः श्लोकः**

हरिततरूणां ललितलतानां माला रमणीया।
कुसुमावलि: समीरचालिता स्यान्मे वरणीया ।।
नवमालिका रसालं मिलिता रुचिरं संगमनम् ।।

**एकपदेन उत्तरत।**

1) का समीरचालिता ?
2) का रसालं मिलिता ?
3) ललितलतानां माला कीदृशी अस्ति ?
4) कुसुमावलि: केन चालिता ?
5) हरिततरूणां ललितलतानां का रमणीया ?

**पूर्णवाक्येन उत्तरं लिखत ।**

1) केषाम् माला रमणीया ?

2) हरिततरूणां माला कीदृशी अस्ति ?

3) केषाम् आवलि: समीरचालिता?

**निर्देशानुसारम् उत्तरत ।**

1) "हरिततरूणां ललितलतानां माला रमणीया" अस्मिन् वाक्ये **रमणीया** इति विशेषणपदस्य विशेष्यपदम् किम्?

क) लतानाम्   ख) तरूणाम्

ग) माला   घ) हरित

2) "कुसुमावलि: समीरचालिता स्यान्मे वरणीया" अस्मिन् वाक्ये **समीरचालिता** इति पदस्य विशेष्यपदम् किम्?

क) कुसुमावलि:   ख) समीरचालिता

ग) स्यान्मे   घ) वरणीया

3) "कुसुमावलि: समीरचालिता स्यान्मे वरणीया" अस्मिन् वाक्ये क्रियापदं किम् ?

क) कुसुमावलि:   ख) समीरचालिता

ग) स्यात्   घ) वरणीया

4) "नवमालिका रसालं मिलिता अस्ति" अत्र **आम्रम्** इति पदस्य पर्यायपदं किम् ?

क) मिलित्वा   ख) रसालम्

ग) अस्ति   घ) नवमालिका

**षष्ठः श्लोकः**

अयि चल बन्धो! खगकुलकलरव गुञ्जितवनदेशम् ।
पुर-कलरव सम्भ्रमितजनेभ्यो धृतसुखसन्देशम् ।
चाकचिक्यजालं नो कुर्याज्जीवितरसहरणम् ।।

**एकपदेन उत्तरत ।**

1) किं जीवितरसहरणम् न कुर्यात् ?

2) केभ्यो धृतसुखसन्देशम्?

3) पुर-कलरव सम्भ्रमितजनेभ्यो कीदृशम् सन्देशम् ?

**पूर्णवाक्येषु उत्तरं लिखत।**

1) कविः कुत्र चलितुम् इच्छति ?

2) वनदेशम् केषां कलरवेण गुञ्जितम् अस्ति?

**निर्देशानुसारम् उत्तरत।**

1) 'पुर-कल-रव-सम्भ्रमितजनेभ्यो धृतसुखसन्देशम्' अस्मिन् वाक्ये **शब्द** इति पदस्य पर्यायपदं किम् ?

क) सन्देशम्      ख) सम्भ्रमित

ग) पुर      घ) रव

2) "अयि चल बन्धो! खगकुलकलरव गुञ्जितवनदेशम्" अस्मिन् वाक्ये **चल** इति क्रियापदस्य कर्तृपदं किम्?

क) अयि      ख) त्वम्

ग) देशम्      घ) खग:

3) "चाकचिक्यजालं नो कुर्यात् जीवितरसहरणम्।" अस्मिन् वाक्ये क्रियापदं किम् ?

क) कुर्यात्      ख) रसम्

ग) नो      घ) रसहरणम्

**सप्तमः श्लोकः**

प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टा।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा।
मानवाय जीवनं कामये नो जीवन्मरणम्॥

**एकपदेन उत्तरत।**

1) लतातरुगुल्मा: कुत्र न पिष्टा: ?

2) पाषाणी सभ्यता कुत्र समविष्टा न स्यात् ?

3) कस्मै जीवनं कामये ?

4) मानवाय किं न कामये ?

5) प्रस्तरतले का: न पिष्टा: भवन्तु ?

6) मानवाय किं कामये ?

**पूर्णवाक्ये उत्तरं लिखत ।**

1) कविः का कामना करोति ?

2) निसर्गे का समाविष्टा न स्यात् ?

**निर्देशानुसारम् उत्तरत ।**

1) "प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टा:" अस्मिन् वाक्ये **शिलातले** इति पदस्य पर्यायवाचिपदं किम्?

क) प्रस्तरतले ख) लतातरुगुम्ला

ग) भवन्तु घ) पिष्टा:

2) "मानवाय जीवनं कामये नो जीवन्मरणम्।" अस्मिन् वाक्ये **इच्छामि** इत्यर्थे किं पदं प्रयुक्तम्?

क) मानवाय ख) जीवनम्

ग) कामये घ) जीवन्मरणम्

3) "मानवाय जीवनं कामये नो जीवन्मरणम्" अस्मिन् वाक्ये **अहम्** इति कर्तृपदस्य क्रियापदं किम्?

क) मानवाय ख) जीवनम्

ग) कामये घ) जीवन्मरणम्

## उत्तरकुञ्चिका

**प्रथमः श्लोकः**

**एकपदेन उत्तरत**

1) दुर्वहम् 2) प्रकृति: 3) मन: 4) वक्रम् 5 ) जीवितम्

**पूर्णवाक्येषु उत्तरं लिखत ।**

1 ) महानगरमध्ये अनिशं कालायसचक्रम् चलति ।

2 ) महानगरमध्ये कालायसचक्रम् अनिशं चलति ।

3 ) दुर्दान्तैर्दशनैरमुना जनग्रसनम् न स्यात् ।

4 ) कालायसचक्रम् महानगरमध्ये अनिशं चलति ।

**निर्देशानुसारम् उत्तरत**

1) दुर्वहम्  2) भ्रमति  3) जनग्रसनम्  4) मनः  5)तनुः  6)सदा

**<u>द्वितीयः श्लोकः</u>**

**एकपदेन उत्तरत ।**

1) धूमम्  2 ) ध्वानम्  3 ) शतशकटीयानम्

**पूर्णवाक्येषु उत्तरं लिखत ।**

1) शतशकटीयानम्  कज्जलमलिनं  धूमं मुञ्चति ।

2) वाष्पयानमाला ध्वानम् वितरन्ती संधावति ।

3) यानानां  पङ्क्तय: अनन्ता: ।

4) यानानां पङ्क्तयो ह्यनन्ता: अतः  संसरणम् कठिनं वर्तते ।

**निर्देशानुसारम् उत्तरत**

1) संधावति  2) शतशकटीयानम्  3) ध्वानम्  4) मुञ्चति  5)संसरणम्

6) कज्जलमलिनम्

**<u>तृतीयः श्लोकः</u>**

**एकपदेन उत्तरत ।**

1)  वायुमण्डलम्  2) जलम्  3) कुत्सितवस्तुमिश्रितम्  4) दूषितम्  5) निर्मलम्

**पूर्णवाक्येषु उत्तरं लिखत ।**

1) धरातलम्  समलं जातम् ।

2) बहिरन्तर्जगति  बहु शुध्दीकरणम् करणीयम् ।

**निर्देशानुसारम् उत्तरत ।**

1) कुत्सितवस्तुमिश्रितम्  2 ) भृशम्  3 ) धरातलम्  4 ) दूषितम्

**<u>चतुर्थः श्लोकः</u>**

**एकपदेन उत्तरत ।**

1) अस्मान्नगरात्  2) बहुदूरम्  3) ग्रामान्ते  4) नगरात्

**पूर्णवाक्येषु उत्तरं लिखत ।**

1) कविः ग्रामान्ते  निझर-नदी-पय: पूरम् दृष्टुम् इच्छति ।

2)  कविः एकान्ते कान्तारे सञ्चरणम् कर्तुम् कथयति ।

**निर्देशानुसारम् उत्तरत।**

1) एकान्ते 2)नदी 3) प्रपश्यामि 4) अहम् 5) कान्तारे 6) कान्तारे 7) बहुदूरम् 8) माम्

**पञ्चमः श्लोकः**

**एकपदेन उत्तरत।**

1) कुसुमावलिः 2) नवमालिका 3) रमणीया 4) समीरेण 5) माला

**पूर्णवाक्येषु उत्तरं लिखत।**

1) हरिततरूणां माला रमणीया ।

2) हरिततरूणां माला रमणीया अस्ति।

3) कुसुमानाम् आवलिः समीरचालिता।

**निर्देशानुसारम् उत्तरत**

1) माला 2) कुसुमावलिः 3) स्यात् 4) रसालम्

**षष्ठः श्लोकः**

**एकपदेन उत्तरत।**

1) चाकचिक्यजालम् 2) पुर-कलरव सम्भ्रमितजनेभ्यः 3) धृतसुखसन्देशम्

**पूर्णवाक्येषु उत्तरं लिखत।**

1) कविः खगकुलकलरवगुञ्जितवनदेशम् चलितुम् इच्छति।

2) वनदेशम् खगानाम् कलरवेण गुञ्जितम् अस्ति।

**निर्देशानुसारम् उत्तरत।**

1) रव 2) त्वम् 3) कुर्यात्

**सप्तमः श्लोकः**

**एकपदेन उत्तरत।**

1) प्रस्तरतले 2) निसर्गे 3) मानवाय 4) जीवन्मरणम् 5) लतातरुगुल्माः 6) जीवनम्

**पूर्णवाक्येषु उत्तरं लिखत।**

1) कविः मानवाय जीवनं कामये नो जीवन्मरणम् इति कामना करोति।

2) निसर्गे पाषाणी सभ्यता समविष्टा न स्यात्।

**निर्देशानुसारम् उत्तरत**

1) प्रस्तरतले 2) कामये 3) कामये

# अभ्यासप्रश्नाः

1) 'महानगरमध्ये चलदनिशं कालायसचक्रम्' - अस्मिन् वाक्ये **ग्रामम्** इति पदस्य किं विलोमपदं प्रयुक्तम् ?

| | |
|---|---|
| क) नगरम् | ख) अनिशम् |
| ग) कालायसम् | घ) चक्रम् |

2) "मन: शोषयत् तनु: पेषयद् भ्रमति सदा वक्रम्" - अस्मिन् वाक्ये **चित्तम्** इति पदस्य किं पर्यायवाचिपदं दत्तम् ?

| | |
|---|---|
| क) मन: | ख) शोषयत् |
| ग) तनु: | घ) पेषयद् |

3) "महानगरमध्ये चलत् अनिशं कालायसचक्रम् " अत्र **अहर्निशम्** इत्यर्थे किं पदं दत्तम् ?

| | |
|---|---|
| क) अनिशम् | ख) चलत् |
| ग) महानगरमध्ये | घ) कालायसचक्रम् |

4) "दुर्दान्तैः दशनैः अमुना स्यान्नैव जनग्रसनम्" - अस्मिन् वाक्ये **दशनै:** इति पदस्य विशेषणपदं किम् ?

| | |
|---|---|
| क) जनग्रसनम् | ख) दुर्दान्तै: |
| ग) अमुना | घ) स्यान्नैव |

5) "कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्" - अस्मिन् वाक्ये क्रियापदं किम् ?

| | |
|---|---|
| क) कज्जलमलिनम् | ख) धूमम् |
| ग) मुञ्चति | घ) शतशकटीयानम् |

6) "कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्" - अस्मिन् वाक्ये **धूमम्** इति पदस्य विशेषणपदं किम् ?

| | |
|---|---|
| क) कज्जलमलिनम् | ख) धूमम् |
| ग) मुञ्चति | घ) शतशकटीयानम् |

7) "यानानां पङ्क्तयो ह्यनन्ता: कठिनं संसरणम्" - अस्मिन् वाक्ये **वाहनानाम्** इति पदस्य किं पर्यायवाचिशब्दं दत्तम् ?

| | |
|---|---|
| क) यानानाम् | ख) संसरणम् |
| ग) ह्यनन्ता: | घ) पङ्क्तयो |

8) “वाष्पयानमाला संधावति वितरन्ती ध्वानम्” - अस्मिन् वाक्ये कर्तृपदं किम् ?

क) वाष्पयानमाला ख) संधावति

ग) ध्वानम् घ) वितरन्ति

9) “यानानां पङ्क्तयो हि अनन्ता: कठिनं संसरणम्” - अस्मिन् वाक्ये **अनन्ता:** इति पदस्य विशेष्यपदं किम् ?

क) पङ्क्तय: ख) यानानाम्

ग) संसरणम् घ) कठिनम्

10) “वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम्” - अस्मिन् वाक्ये **जलम्** इति पदस्य विशेषणपदं किम् ?

क) निर्मलम् ख) भृशम्

ग) दूषितम् घ) वायुमण्डलम्

11) “कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्” - अस्मिन् वाक्ये **भूतलम्** इति पदस्य किं पर्यायवाचिपदं प्रयुक्तम् ?

क) भक्ष्यम् ख) समलम्

ग) धरातलम् घ) मिश्रितम्

12) “कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम्” - अस्मिन् वाक्ये **कुत्सितवस्तुमिश्रितम्** इति पदस्य विशेष्यपदं किम् ?

क) कुत्सितवस्तुमिश्रितम् ख) भक्ष्यम्

ग) समलम् घ) धरातलम्

13) जगति बहिः अन्तः च बहुशुद्धीकरणं भवेत्- अत्र **अन्तः** इत्यस्य किं विलोमपदं प्रयुक्तम् ?

क) जगति ख) भवेत्

ग) शुद्धीकरणम् घ) बहिः

14) “जगति बहिः अन्तः च बहुशुद्धीकरणं भवेत् - अस्मिन् वाक्ये **संसारे** इति पदस्य किं पर्यायवाचि शब्दं प्रयुक्तम् ?

क) अन्तः ख) जगति

ख) बहिः घ) भवेत्

15) “मानवाय जीवनं कामये नो जीवन्मरणम् ।” - अस्मिन् वाक्ये **मरणम्** इति पदस्य किं विलोमपदं प्रयुक्तम् ?

क) मानवाय ख) जीवनम्

ग) कामये घ) नो

16) “पाषाणी सभ्यता निसर्गे स्यान्न समविष्टा” - अस्मिन् वाक्ये **पाषाणी** इति पदस्य विशेष्यपदम् किम् ?

क) सभ्यता ख) निसर्गे

ग) स्यात् घ) पाषाणी

17) “ मानवाय जीवनं कामये नो जीवन्मरणम् ।” अस्मिन् वाक्ये **दानवाय** इति पदस्य विलोमपदम् किम् ?

क) मानवाय ख) मरणम्

ग) जीवनं घ) कामये

18) “अयि चल बन्धो! खगकुल-कलरव-गुञ्जितवनदेशम्” अस्मिन् वाक्ये **पक्षिकुलम्** इति पदस्य पर्यायवाचि पदं किम् ?

क) खगकुलम् ख) गुञ्जितवनदेशम्

ग) अयि घ) बन्धो

19) “समीरेण चालिता कुसुमावलिः रमणीया अस्ति ” अत्र **वायुना** इति पदस्य पर्यायपदं किम् ?

क) चालिता ख) आवलिः

ग) रमणीया घ) समीरेण

20) “हरिततरूणां ललितलतानां माला रमणीया” अस्मिन् वाक्ये **वृक्षाणाम्** इति पदस्य पर्यायवाचिपदं किम्?

क) हरित ख) तरूणाम्

ग) लतानाम् घ) माला

## अभ्यासप्रश्नानाम् उत्तरकुञ्चिका ।

1) नगरम् 2) मन: 3) अनिशम् 4) दुर्दान्तै: 5) मुञ्चति 6) कज्जलमलिनं 7) यानानाम् 8) वाष्पयानमाला 9) पङ्क्तय: 10) निर्मलं 11) धरातलम् 12) भक्ष्यम् 13) बहिः 14) जगति 15) जीवनम् 16) सभ्यता 17) मानवाय 18) खगकुलम् 19) समीरेण 20) तरूणाम्

## प्रथमपाठस्य <u>सन्धिकार्यम्</u>

1 . चलदनिशम् =

[अ] चलत् + अनिशम्    [आ] चलत + निशम्

[इ] चलद + निशम्    [ई] चलद + अनिशम्

2 . स्यान्न =

[अ] स्यात् + न    [आ] स्यान् + न

[इ] स्यत् + न    [ई] स्यात + न

3 . अस्मान्नगरात् =

[अ] अस्मात् + नगरात्    [आ] अस्मान + नगरात्

[इ] अस्मान् + नगरात्    [ई] अस्मत + नगरात्

4 . स्यात् + मे =

[अ] स्यान्मे    [आ] स्याद्मे

[इ] स्यात्मे    [ई] स्यैन्मे

5 यानानां <u>**पङ्क्तयो ह्यनन्ताः**</u> सन्ति ।

[अ] पङ्क्तयाः + ह्यनन्ताः    [आ] पङ्क्तयः + ह्यनन्ताः

[इ] पङ्क्तया + अनन्ताः    [ई] पङ्क्तया + ह्यनन्ताः

## सन्धिकार्यस्य उत्तरकुञ्चिका

1) चलत् + अनिशम् 2) स्यात् + न 3) अस्मात् + नगरात्

4 ) स्यान्मे 5) पङ्क्तयः + ह्यनन्ताः

## प्रथमपाठस्य समासः

अधोलिखितेषु वाक्येषु रेखाङ्कितानां पदानां समस्तपदं वा विग्रहं वा चिनुत।

10. **वायुमण्डलं** भृशं दूषितम् ।

(क) वायुना मण्डलम् (ख) वायोः मण्डलम्

(ग) वायुं मण्डलम् (घ) वायु मण्डलम्

11. **महानगरमध्ये** चलदनिशं कालायसचक्रम्।

(क) महानगरेषु मध्ये (ख) महानगरेभ्यः मध्ये

(ग) महानगरैः मध्ये (घ) महानगराणां मध्ये

12. दुर्दान्तैर्दशनैरमुना स्यान्नैव **जनग्रसनम्।**

(क) जनानां ग्रसनम् (ख) जनेषु ग्रसनम्

(ग) जनान् ग्रसनम् (घ) जनाः ग्रसनम्

13. **वाष्पयानमाला** संधावति वितरन्ती ध्वानम्।

(क) वाष्पयानानि माला (ख) वाष्पयानेभ्यः माला

(ग) वाष्पयानानां माला (घ) वाष्पयानैः माला

14. **यानानां पङ्क्तयः** ह्यनन्ताः कठिनं संसरणम्।

(क) यानपङ्क्तयः (ख) यानात्पङ्क्तयः

(ग) यानानपङ्क्तयः (घ) यानानिपङ्क्तयः

15. **कुत्सितवस्तुमिश्रितं** भक्ष्यं समलं धरातलम्।

(क) कुत्सितवस्तूनां मिश्रितम् (ख) कुत्सितवस्तुषु मिश्रितम्

(ग) कुत्सितवस्तुभ्यः मिश्रितम् (घ) कुत्सितवस्तुभिः मिश्रितम्

16. कुत्सितवस्तुमिश्रितं भक्ष्यं समलं **धरातलम्।**

(क) धरायाः तलम् (ख) धरायै तलम्

(ग) धरायां तलम् (घ) धरया तलम्

17. प्रपश्यामि **ग्रामान्ते** निर्झर-नदी-पयःपूरम्।

(क) ग्रामाय अन्ते (ख) ग्रामे अन्ते

(ग) ग्रामस्य अन्ते (घ) ग्रामम् अन्ते

18. प्रपश्यामि ग्रामान्ते निर्झर-नदी-**पयःपूरम्**।

(क) पयसः पूरम् (ख) पयसा पूरम्

(ग) पयसे पूरम् (घ) पयः पूरम्

10. **कुसुमावलिः** समीरचालिता स्यान्मे वरणीया।

(क) कुसुमैः आवलिः (ख) कुसुमेभ्यः आवलिः

(ग) कुसुमेषु आवलिः (घ) कुसुमानाम् आवलिः

11. अयि चल बन्धो! **खगकुल**-कलरव-गुञ्जितवनदेशम्।

(क) खगैः कुलम् (ख) खगानां कुलम्

(ग) खगेषु कुलम् (घ) खगेभ्यः कुलम्

12. अयि चल बन्धो! खगकुल-कलरव-गुञ्जित**वनदेशम्**।

(क) वनाय देशम् (ख) वनं देशम्

(ग) वनस्य देशम् (घ) वनेन देशम्

13. पुर-कलरव सम्भ्रमितजनेभ्यो धृत**सुखसन्देशम्**।

(क) सुखाय सन्देशम् (ख) सुखेन सन्देशम्

(ग) सुखे सन्देशम् (घ) सुखस्य सन्देशम्

14. **चाकचिक्यजालं** नो कुर्याज्जीवितरसहरणम्।

(क) चाकचिक्ये जालम् (ख) चाकचिक्येन जालम्

(ग) चाकचिक्यस्य जालम् (घ) चाकचिक्याय जालम्

15. चाकचिक्यजालं नो कुर्यात् **जीवितरसहरणम्**।

(क) जीवितरसस्य हरणम् (ख) जीवितरसेन हरणम्

(ग) जीवितरसे हरणम् (घ) जीवितरसं हरणम्

16. **प्रस्तरतले** लतातरुगुल्मा नो भवन्तु पिष्टाः।

(क) प्रस्तरस्य तले (ख) प्रस्तराय तले

(ग) प्रस्तरे तले (घ) प्रस्तरेण तले

17. **मानवाय जीवनं** कामये नो जीवन्मरणम्।

(क) मानवायाजीवनम् (ख) मानवजीवनम्

(ग) मानवम्जीवनम् (घ) मानवाद्जीवनम्

18. मानवाय जीवनं कामये नो **जीवन्मरणम्**।

(क) जीवतः मरणम् (ख) जीवता मरणम्

(ग) जीवन्तं मरणम् (घ) जीवते मरणम्

19 . कुत्सितवस्तुमिश्रितं **समलं** धरातलम्।

(क) मलेन सहितम् (ख) मलस्य सहितम्

(ग) मलम् अनतिक्रम्य (घ) मलं मलं प्रति

20) प्रस्तरतले **लतातरुगुल्माः** भवन्तु नो पिष्टाः।

(क) लताः च तरवः च गुल्माः च (ख) लतानां तरुगुल्माः

(ग) लताः गुल्माः च (घ) लतातरुगुल्मानां पश्चात्

21 ) इदं **मलस्य अभावः** जलम् अस्ति।

(क) निर्मलः (ख) निर्मलम्

(ग) निर्मलाभावः (घ) अभावनिर्मलः

## समासकार्यस्य उत्तरकुञ्चिका

1.वायोः मण्डलम् 2.महानगराणां मध्ये 3.जनानां ग्रसनम् 4.वाष्पयानानां माला 5.यानपङ्क्तयः 6.कुत्सितवस्तुभिः मिश्रितम् 7.धरायाः तलम् 8.ग्रामस्य अन्ते 9.पयसः पूरम् 10.कुसुमानाम् आवलिः 11.खगानां कुलम् 12. वनस्य देशम् 13.सुखस्य सन्देशम् 14.चाकचिक्यस्य जालम् 15.जीवितरसस्य हरणम् 16. प्रस्तरस्य तले 17.मानवजीवनम् 18 जीवते मरणम् 19 मलेन सहितम् 20 लताः च तरवः च गुल्माः च 21 निर्मलम्

**पाठे आगताः प्रत्ययान्तशब्दाः**

1. **बाष्पयानमाला** संधावति वितरन्ती ध्वानम्। (टाप् प्रत्ययः)
2. **नवमालिका** रसालं मिलिता रुचिरं संगमनम्। (टाप् प्रत्ययः)
3. हरिततरूणां ललितलतानां **माला** रमणीया। (टाप् प्रत्ययः)
4. ) इयं कुसुमावलिः समीरेण **चालिता** अस्ति। (टाप् प्रत्ययः)

## द्वितीयः पाठः

# बुद्धिर्बलवती सदा

# द्वितीय: पाठ: - बुद्धिर्बलवती सदा

**प्रथम: अनुच्छेद:**

अस्ति देउलाख्यो ग्राम: । तत्र राजसिंह: नाम राजपुत्र: वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेट्या प्रहृत्य जगाद - " कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ: ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चात् अन्यो द्वितीय: कश्चिल्लक्ष्यते । " इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो व्याकुलचित्तो नष्ट: ।

**एकपदेन उत्तरत**

| | |
|---|---|
| १. ग्रामस्य नाम किम् ? | देउल |
| २. राजपुत्रस्य नाम किम् ? | राजसिंह: |
| ३.राजपुत्रस्य भार्याया: नाम किम् ? | बुद्धिमती |
| ४. मार्गे गहनकानने सा कं ददर्श ? | एकं व्याघ्रं |

**एकवाक्येन उत्तरत**

१ बुद्धिमती व्याघ्रमागच्छन्तं दृष्ट्वा धार्ष्ट्यात् पुत्रौ चपेट्या प्रहृत्य किम् जगाद ?

२. क: राजपुत्र: वसति स्म ?

३. का इति मत्वा व्याघ्रो नष्ट: ?

**उत्तराणि**

१. कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुत ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चात् अन्यो द्वितीय: कश्चिल्लक्ष्यते ।

२. राजसिंह: नाम राजपुत्र: वसति स्म ।

३. व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो नष्ट: ।

**सन्धिकार्यम्**

देवलाख्य: + ग्राम: = देवलाख्यो ग्राम:

अयम् + एक: + तावत् + विभज्य = अयमेकस्तावद्विभज्य

क: + चित् = कश्चित्

**समास:**

व्याकुलचित्त: = व्याकुलं चित्तं यस्य स: (बहुव्रीहि:)

**प्रत्ययः**

| | | | | |
|---|---|---|---|---|
| बुद्धिमती | = | बुद्धि | + | मतुप् |
| बुद्धिमती | = | बुद्धिमत् | + | ङीप् |
| चलिता | = | चलित | + | टाप् |

**द्वितीयः अनुच्छेदः**

श्लोक:

निजबुद्ध्या विमुक्ता सा भयात् व्याघ्रस्य भामिनी ।
अन्यो अपि बुद्धिमान् लोके मुच्यते महतो भयात् ॥

अन्वय: - सा भामिनी निजबुद्ध्या व्याघ्रस्य भयात् विमुक्ता । लोके अन्य: अपि बुद्धिमान् महतो भयात् विमुच्यते।

**एकपदेन उत्तरत**

| | |
|---|---|
| १ भामिनी कया व्याघ्रस्य भयात् विमुक्ता ? | निजबुद्ध्या |
| २ भामिनी निजबुद्ध्या कस्य भयात् विमुक्ता ? | व्याघ्रस्य |
| ३ लोके अन्य: अपि बुद्धिमान् कस्मात् विमुच्यते ? | महतो भयात् |

**सन्धिकार्यम्**

महतो भयात् = महत: + भयात्

**प्रत्ययः**

| | | |
|---|---|---|
| बुद्धिमान् | = | बुद्धि: + मतुप् |
| विमुक्ता | = | विमुक्त + टाप् |

**तृतीयः अनुच्छेदः**

भयाकुलम् व्याघ्रं दृष्ट्वा कश्चित् धूर्त:श्रृगाल: हसन् आह- भवान् कुत: भयात् पलायित: ?

व्याघ्र: - गच्छ जम्बूक त्वमपि किंचित् गूढप्रदेशं यत: व्याघ्रमारीति शास्त्रे श्रूयते तया अहं हन्तुं आरब्ध: परं गृहीतजीवित: नष्ट: शीघ्रं तत् अग्रत: ।

श्रृगाल: - व्याघ्र ! त्वया महत्कौतुकम् आवेदितम् यन्मानुषादपि बिभेषि ?

व्याघ्र: - प्रत्यक्षमेव मया सात्मपुत्रौ एकैकश: मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा।

**एकपदेन उत्तरत**

1. गच्छ जम्बूक त्वमपि किञ्चित् गूढप्रदेशम् । इति क: वद्ति ? व्याघ्र:
2. क: भयाकुल: ? व्याघ्र:

**एकवाक्येन उत्तरत**

1. कश्चित् धूर्त:श्रृगाल: हसन् किम् आह ?

कश्चित् धूर्त:श्रृगाल: हसन् आह यत् भवान् कुत: भयात् पलायित: ? इति ।

**सन्धिकार्यम्**

यन्मानुषादपि = यत् + मानुषात् + अपि

**समास:**

गृहीतकरजीवित: = गृहीतं जीवितं करे येन स: (बहुव्रीहि:)

**प्रत्यय:**

दृष्टा = दृष्ट + टाप्

**चतुर्थ: अनुच्छेद:**

जम्बूक: - स्वामिन् यत्रास्ते सा धूर्ता तत्र गम्यताम् । व्याघ्र ! तव पुन: तत्र गतस्य सा सम्मुखमपीक्षते यदि, तर्हि त्वया अहं हन्तव्य: इति ।

व्याघ्र: - श्रृगाल! यदि त्वं मां मुक्त्वा यासि तदा वेला अपि अवेला स्यात् ।

जम्बुक: - यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् । स: व्याघ्र: तथा कृत्वा काननं ययौ । शृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती - जम्बुककृतोत्साहात् व्याघ्रात् कथम् मुच्यताम् । परं प्रत्युत्पन्नमति: सा जम्बुकम् आक्षिपन्ती अंगुल्या तर्जयन्ती उवाच

**एकपदेन उत्तरत**

1. यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् - इति क: वदति? जम्बुक:
2. सा कम् आक्षिपन्ती अंगुल्या तर्जयन्ती उवाच ? जम्बुकम्
3. स: व्याघ्र: तथा कृत्वा कुत्र ययौ ? काननम्

**सन्धिकार्यम्**

पुनरायान्तम् = पुन: + आयान्तम्

**समास:**

प्रत्युत्पन्नमति: = प्रत्युतपनन्ना मति: यस्या: सा (बहुव्रीहि)

**पञ्चम: अनुच्छेद:**

रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।
विश्वास्याद्यैकमानीय कथं यासि वदाधुना॥
इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयंकरा।
व्याघ्रो अपि सहसा नष्ट: गलबद्धश्रृगालक: ॥

एवं प्रकारेण बुद्धिमती व्याघ्रजात् भयात् पुनरपि मुक्ता अभवत्।

अत: एव उच्यते-

बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा।

**एकपदेन उत्तरत**

१. इति उक्त्वा कीदृशी व्याघ्रमारी तूर्णं धाविता ? — भयङ्करा

२. सर्वकार्येषु का बलवती ? — बुद्धि:

**एकवाक्येन उत्तरत**

१. कीदृश: व्याघ्रो अपि सहसा नष्ट:?

गलबद्धश्रृगालक: व्याघ्रो अपि सहसा नष्ट: ।

**अन्वय:** - रे रे धूर्त ! पुरा त्वया मह्यं व्याघ्रत्रयं दत्तम्। विश्वास्य अद्य एकम् आनीय अधुना कथं यासि इति वद। इति उक्त्वा भयंकरा व्याघ्रमारी तूर्णं धाविता। गलबद्धश्रृगालक: व्याघ्रो अपि सहसा नष्ट:।

**सन्धिकार्यम्**

| | | |
|---|---|---|
| व्याघ्रोऽपि | = | व्याघ्र: + अपि |
| पुनरपि | = | पुन: + अपि |

**प्रत्यय:**

| | | |
|---|---|---|
| बलवती | = | बल + मतुप् |
| मुक्ता | = | मुक्त + टाप् |

| **समानार्थक/पर्यायशब्दा:** | | | **विलोमशब्दा:** | | |
|---|---|---|---|---|---|
| लोके | = | विश्वे | हसन् | - | क्रन्दन् |
| बुद्धिमान् | = | विवेकी | आगच्छ | - | गच्छ |
| श्रृगाल: | = | जम्बुक: | हन्तुम् | - | रक्षितुम् |
| गूढप्रदेशम् | = | रहस्य देशम् | शनै: | - | शीघ्रम् |
| शीघ्रम् | = | सत्वरम् | अग्रत: | - | पृष्ठत:: |

| | | | | | |
|---|---|---|---|---|---|
| कौतुकम् | = | कुतूहलम् | शीघ्रम् | - | मन्दम् |
| प्रहरन्ती | = | मारयन्ती | दत्तम् | - | स्वीकृतम् |
| बिभेषि | = | भयं करोषि | सर्वदा | - | सदा |
| ईक्षते | = | पश्यति वेला-अवेला | | | |
| हन्तव्य: | = | मारयितव्य: | | | |
| वेला | = | अवसर: | | | |
| निजगले | = | स्वकण्ठे | | | |
| सत्वरम् | = | शीघ्रम् | | | |
| प्रत्युत्पन्नमति: | = | बुद्धिमती | | | |
| यासि | = | गच्छसि | | | |
| अधुना | = | सम्प्रति /इदानीम् | | | |
| वद | = | कथय | | | |
| भयंकरा | = | भीकरा | | | |
| सहसा | = | सत्वरम् | | | |
| बुद्धि: | = | मनीषा | | | |
| बलवती | = | शक्तिमती | | | |

**घटनाक्रमानुसारं वाक्यानि ( अभ्यासार्थम् )**

1 राजसिंह: नाम राजपुत्र: वसति स्म।
2 तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितृगृहं प्रति चलिता।
3 मार्गे गहनकानने सा एकं व्याघ्रं ददर्श।
4 सा पुत्रौ जगाद –"कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुत ?
5 व्याघ्रमारी कानिचित् इयं इति मत्वा व्याघ्रो व्याकुलचित्तो नष्ट:।
6 धूर्त:श्रृगाल: हसन् आह- भवान कुत: भयात् पलायित: ?'
7 जम्बूक त्वमपि किंचित् गूढप्रदेशं गच्छ।
8 व्याघ्र त्वया महत् कौतुकम् आवेदितम् यन्मानुषादपि बिभेषि ?
9 यत्रास्ते सा धूर्ता तत्र गम्यताम्।
10 श्रृगाल ,यदि त्वं मां मुक्त्वा यासि तदा वेला अपि अवेला स्यात्।
11 यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।
12 पुनरायान्तम् व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती।
13 जम्बुककृतोत्साहात् व्याघ्रात् कथम् मुच्यताम्।
14 प्रत्युत्पन्नमति: सा जम्बुकं आक्षिपन्ती अंगुल्या तर्जयन्ती उवाच।

15 भयंकरा व्याघ्रमारी  तूर्णं धाविता।

16 गलबद्धश्रृगालक:  व्याघ्रो अपि सहसा नष्ट:।

17 एवं प्रकारेण बुद्धिमती व्याघ्रजात् भयात्  पुनरपि मुक्ता अभवत्।

18 अत: एव उच्यते- हे तन्वी ! सर्वदा सर्वकार्येषु बुद्धि: बलवती।

## अभ्यासप्रश्ना:

**अधोलिखितवाक्येषु कर्तृपदं लिखत।**

**<u>वाक्यानि</u>**

1. तत्र राजसिंह: नाम राजपुत्र: वसति स्म।

2 लोके अन्य: अपि बुद्धिमान् महतो भयात् विमुच्यते।

३ स: व्याघ्र: तथा कृत्वा काननं ययौ।

४ इति उक्त्वा भयंकरा व्याघ्रमारी  तूर्णं धाविता।

**अधोलिखित वाक्येषु क्रियापदं लिखत।**

१ भवान् कुत: भयात् पलायित: ?

२ मार्गे गहन कानने सा एकं व्याध्रं ददर्श।

३ सा निजबुद्ध्या व्याघ्रस्य भयात् विमुक्ता।

४ लोके अन्य: अपि बुद्धिमान् महतो भयात् विमुच्यते।

**अधोलिखित वाक्येषु विशेषणपदं लिखत।**

१ इति उक्त्वा **भयंकरा व्याघ्रमारी** तूर्णं धाविता।

२ श्रृगाल:- व्याघ्र  त्वया **महत् कौतुकम्** आवेदितम् ।

**३** लोके अन्य: अपि बुद्धिमान् **महतो भयात्** विमुच्यते।

४ इति श्रुत्वा व्याघ्रमारी काचित् इयं इति मत्वा **व्याघ्रो व्याकुलचित्तो** नष्ट:।

५ बुद्धिमती **व्याघ्रजात् भयात्**  पुनरपि मुक्ता अभवत्।

**अधोलिखितवाक्येषु रेखांकितपदानां समानार्थकपदम् लिखत।**

१ एकदा केनापि आवश्यककार्येण तस्य **<u>भार्या</u>** ।

२ **<u>लोके</u>** अन्य: अपि बुद्धिमान् महतो भयात् विमुच्यते।

३ **<u>जम्बूक: -</u>** स्वामिन्  यत्रास्ते सा धूर्ता तत्र गम्यताम्।

४ स: व्याघ्र: तथा कृत्वा **<u>काननं</u>** ययौ।

## उत्तरकुञ्चिका

**प्रथम: अनुच्छेद: - एकपदेन उत्तरत**

१. देउल २. राजसिंह: ३. बुद्धिमती ४. एकं व्याघ्रम्

**एकवाक्येन उत्तरत**

१. कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुत ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चात् अन्यो द्वितीय: कश्चिल्लक्ष्यते ।

२. राजसिंह: नाम राजपुत्र: वसति स्म ।

३. व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो नष्ट: ।

**द्वितीय: अनुच्छेद: - एकपदेन उत्तरत**

१. निजबुद्ध्या २. व्याघ्रस्य ३. महतो भयात्

**तृतीय: अनुच्छेद: - एकपदेन उत्तरत**

1. व्याघ्र: 2. व्याघ्र:

**एकवाक्येन उत्तरत**

1. कश्चित् धूर्त:श्रृगाल: हसन् आह यत् भवान् कुत: भयात् पलायित: ? इति ।

**चतुर्थ: अनुच्छेद: - एकपदेन उत्तरत**

1. जम्बुक: 2. जम्बुकम् 3.काननम्

**पञ्चम: अनुच्छेद: - एकपदेन उत्तरत**

१. भयङ्करा २. बुद्धि:

**एकवाक्येन उत्तरत**

१. गलबद्धश्रृगालक: व्याघ्रो अपि सहसा नष्ट: ।

## अभ्यासप्रश्नानाम् उत्तराणि

**अधोलिखितवाक्येषु कर्तृपदं लिखत ।**

1. राजपुत्र: 2. बुद्धिमान् 3. व्याघ्र: 4. व्याघ्रमारी

**अधोलिखित वाक्येषु क्रियापदं लिखत ।**

१. पलायित: २. ददर्श ३. विमुक्ता ४. विमुच्यते

**अधोलिखित वाक्येषु विशेषणपदं लिखत।**

१. भयंकरा २. महत् 3. महत: ४. व्याकुलचित्त: ५ व्याघ्रजात्

**अधोलिखितवाक्येषु रेखांकितपदानां समानार्थकपदम् लिखत ।**

१. पत्नी २. विश्वे ३. श्रृगाल: ४. वनम्

नाट्यांशः

# शिशुलालनम्

## चतुर्थः पाठः

## चतुर्थः पाठः - शिशुलालनम् ( नाट्यांशः )

**अनुच्छेदः - 1**

( सिंहासनस्थः रामः । ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ । )

विदूषकः - इत इत आर्यौ!

कुशलवौ - ( रामम् उपसृत्य प्रणम्य च ) अपि कुशलं महाराजस्य ?

रामः - युष्मद्दर्शनात् कुशलमिव । भवतोः किम् वयमत्र कुशलप्रश्नस्य भाजनम् एव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य । ( परिष्वज्य ) अहो हृदयग्राही स्पर्शः ।

( आसनार्धमुपवेशयति । )

उभौ - राजासनं खल्वेतत्, न युक्तमध्यासितुम् ।

रामः - सव्यवधानं न चारित्रलोपाय । तस्मादङ्कव्यवहितमध्यास्यतां सिंहासनम् ।

( अङ्कमुपवेशयति )

उभौ - ( अनिच्छां नाटयतः ) राजन् ! अलमतिदाक्षिण्येन ।

**एकपदेन उत्तरत**

1) हृदयग्राहिस्पर्शं कः अनुभवति ?

2) विदूषकेन सह कौ प्रविशतः ?

3) तापसौ कौ ?

4) क: सिंहासनस्थः भवति ?

5) कौ अनिच्छां नाटयतः ?

**पूर्णवाक्येन उत्तरत ।**

1) रामः लवकुशौ कुत्र उपवेशयति ?

2) किम् चारित्रलोपाय न भवति ?

3) कण्ठाश्लेषं प्राप्तुं रामः किं कथयति ?

**निर्देशानुसारम् उत्तराणि लिखत ।**

1) ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ । अत्र प्रयुक्तम् क्रियापदं किम् ?

2) प्रविशतः इति कर्तृपदस्य क्रियापदं किम् ?

3) तस्मादङ्कव्यवहितम् अध्यास्यताम् सिंहासनम् - अत्र क्रियापदं किम् ?

4) हृदयग्राही इति पदस्य विशेष्यपदं किम् ?

5) युष्मद्दर्शनात् कुशलमिव - अत्र युष्मद् पदं काभ्याम् प्रयुक्तम् ?

6) पात्रम् इत्यस्य किं समानार्थपदम् अत्र प्रयुक्तम् ?

7) क्रोडम् इति पदस्य किं समानार्थपदम् अत्र प्रयुक्तम् ?

8) उभौ इति पदम् काभ्यां प्रयुक्तम् ?

9) "ततः प्रविशतः तापसौ कुशलवौ " अत्र क्रियापदं किम् ?

10) अङ्कमुपवेशयति - अत्र क्रियापदं किम् ?

**अनुच्छेदः - 2**

रामः - अलमतिशालीनतया भवति। शिशुजनो वयो अनुरोधात् गुणमहतामपि लालनीय एव।

व्रजति हिमकरो अपि बालभावात्
पशुपति - मस्तक - केतकच्छदत्वम्

एष भवतोः सौन्दर्यावलोकजनितेन कौतूहलेन पृच्छामि –
क्षत्रियकुलपितामहयोःसूर्यचन्द्रयोः को वा भवतोर्वंशस्य कर्ता ?

लवः - भगवन् सहस्रदीधितिः

रामः - कथमस्मत्समानाभिजनौ संवृत्तौ ?

विदूषकः - किम् द्वयोरप्येकमेव प्रतिवचनम् ?

लवः - भ्रातरावावौ सोदर्यौ।

रामः - समरूपः शरीरसन्निवेशः। वयसस्तु न किञ्चिदन्तरम्।

लवः - आवाम् यमलौ।

रामः - सम्प्रति युज्यते। किम् नामधेयम् ?

लवः - आर्यस्य वन्दनायां लव इत्यात्मानं श्रावयामि। (कुशम् निर्दिश्य ) आर्यो अपि गुरुचरणवन्दनायां --------

कुशः - अहमपि कुश इत्यात्मानं श्रावयामि।

रामः - अहो ! उदात्तरम्यः समुदाचारः। किम् नामधेयो भवतोर्गुरुः ?

लवः - ननु भगवान् वाल्मीकिः।

रामः - केन सम्बन्धेन ?

लवः - उपनयनोपदेशेन।

**एकपदेन उत्तरत।**

1) कः लालनीयः एव भवति ?

2) कः पशुपतिमस्तककेतकच्छदत्वं व्रजति ?

3) बालभावात् हिमकरः कुत्र विराजते ?

4) कुशलवयोः वंशस्य कर्ता कः ?

5) कौ यमलौ ?

6) वाल्मीकिः कयोः गुरुः ?

7) समुदाचारः कीदृशः?

**पूर्णवाक्येन उत्तरत।**

1) हिमकरः पशुपतिमस्तककेतकच्छदत्वं कथं व्रजति ?

2) केन सम्बन्धेन वाल्मीकिः कुशलवयोः गुरुः आसीत् ?

3) रामः लवकुशौ किम् पृच्छति?

**निर्देशानुसारम् उत्तराणि लिखत।**

1. "कौतूहलेन पृच्छामि " इत्यत्र कर्तृपदम् किम् ?
2. भवति शिशुजनो वयो अनुरोधात् - अत्र क्रियापदं किम् ?
3. किं नामधेयो भवतोर्गुरुः? अत्र भवतोः इति पदं कस्मै प्रयुक्तम् ?
4. भ्रातरावावाम् सौदर्यौ - इत्यत्र विशेष्यपदं किम् ?
5. चन्द्रः पदस्य किं समानार्थपदम् अत्र प्रयुक्तम् ?
6. अहमपि कुश इत्यात्मानं श्रावयामि - अत्र अहम् इति पदं कस्मै प्रयुक्तम् ?
7. सूर्यः इति अर्थे अत्र किं पदं प्रयुक्तम् ?
8. लव इत्यात्मानं श्रावयामि - अत्र क्रियापदं किम् ?
9. उदात्तरम्यः समुदाचारः - अत्र विशेष्यपदं किम् ?
10. "व्रजति हिमकरो अपि बालभावात् " अत्र क्रियापदं किम् ?

**अनुच्छेदः - 3**

रामः - अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।

लवः - न हि जानाम्यस्य नामधेयम्।

रामः - अहो माहात्म्यम्।

कुशः - जानाम्यहम् तस्य नामधेयम् ।

रामः - कथ्यताम् ।

कुशः - निरनुक्रोशो नाम ----

रामः - वयस्य ! अपूर्वं खलु नामधेयम् ।

विदूषकः - ( विचिन्त्य ) एवम् तावत् पृच्छामि निरनुक्रोश इति क एवम् भणति ?

कुशः - अम्बा ।

विदूषकः - किं कुपिता एवम् भणति, उत प्रकृतिस्था ?

कुशः - यद्यावयोर्बालभावजनितं किञ्चिदविनयम् पश्यति तदा एवम् अधिक्षिपति निरनुक्रोशस्य पुत्रौ, मा चापलं इति ।

विदूषकः - एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति ।

रामः - ( स्वगतं ) धिङ् मामेवंभूतम् l सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवम् मन्युगर्भैरक्षरैर्निर्भर्त्सयति ।
( सबाष्पमवलोकयति । )

रामः - अतिदीर्घः प्रवासो अयं दारुणश्च । (विदूषकमवलोक्य जनान्तिकम् ) कुतूहलेनाविष्टो मातरमनयोर्नामतो वेदितुमिच्छामि । न युक्तं च स्त्रीगतमनुयोक्तुम् , विशेषतस्तपोवने । तत् को अत्राभ्युपायः ?

**एकपदेन उत्तरत**

1) कः दारुणः अतिदीर्घः च ?
2) रामः कयोः पितुः नाम वेदितुम् इच्छति ?
3) तपोवने कस्य नाम न व्यवह्रियते ?
4) निरनुक्रोशो नाम इति कः कथयति ?
5) केन आविष्टः रामः कुशलवयोः मातरं नामतो वेदितुमिच्छति ?
6) अत्र दारकौ कौ ?

**पूर्णवाक्येन उत्तरत**

1) लवः स्वजनकस्य नाम कथं न जानाति ?
2) तपोवने कश्चिदपि कस्य नाम न व्यवहरति ?
3) किं न युक्तम् ?

**निर्देशानुसारम् उत्तराणि लिखत।**

1. जनकं नामतो वेदितुमिच्छामि – अत्र क्रियापदं किम् ?
2. तपोवने तस्य नाम व्यवहरति - अत्र क्रियापदं किम् ?
3. निरनुक्रोश इति क एवम् भणति - अत्र क्रियापदं किम् ?
4. किम् कुपिता एवम् भणति - अत्र क्रियापदं किम् ?
5. एतयोर्जननी तेनावमानिता अत्र एतयोः पदम् काभ्यां प्रयुक्तम् ?
6. मातरमनयोर्नामतो वेदितुमिच्छामि - अत्र कर्तृपदं किम् ?
7. सा तपस्विनी इति कर्तृपदस्य क्रिया पदम् किम् ?
8. अपूर्वं खलु नामधेयम् – अत्र विशेषणपदम् किम् ?
9. अतिदीर्घः प्रवासः अयं दारुणश्च – अत्र विशेष्यपदं किम् ?
10. यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति -अत्र क्रियापदं किम् ?

**अनुच्छेदः - 4**

विदूषकः - ( जनान्तिकम् )अहं पुनः पृच्छामि। ( प्रकाशं ) किम् नामधेया युवयोर्जननी?

लवः - तस्याः द्वे नामनी।

विदूषकः - कथमिव ?

लवः - तपोवनवासिनो देवीति नाम्नाह्वयति , भगवान् वाल्मीकिर्वधूरीति।

रामः - अपि च इतस्तावद् वयस्य ! मुहूर्त्तमात्रम्।

विदूषकः - ( उपसृत्य ) आज्ञापयतु भवान्।

रामः - अपि कुमारयोरनयोरस्माकं च सर्वदा समरूपः कुटुम्बवृत्तान्तः ?

( नेपथ्ये )

इयती वेला सञ्जाता रामायणगानस्य नियोगः किमर्थं न विधीयते ?

उभौ - राजन्! उपाध्यायदूतो अस्मान् त्वरयति।

रामः - मयापि सम्माननीय एव मुनिनियोगः। तथाहि -

भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिर्
गिरां संदर्भो अयं प्रथममवतीर्णो वसुमतीम्।
कथा चेयं श्लाघ्या सरसिरुह नाभस्य नियतं
पुनाति श्रोतारं रमयति च सोऽयं परिकरः॥

वयस्य! अपूर्वोयम् मानवतानां सरस्वत्यवतारः , तदहं सुहृज्जनसाधारणं श्रोतुमिच्छामि l संनिधीयन्तां सभासदः प्रेष्यतामस्मदन्तिकं सौमित्रिः, अहमप्येतयो श्चिरासनपरिखेदं विहरणं कृत्वा अपनयामि l

( इति निष्क्रान्ताः सर्वे )

**एकपदेन उत्तरत ।**

1) वधू इति नाम्ना कः आह्वयति ?

2) रामायणस्य पुराणः व्रतनिधिः कविः कः ?

3) अयं मानवानां सरस्वत्यवतारः कीदृशः ?

4) गिराम् संदर्भो अयं प्रथमम् कुत्र अवतीर्णः ?

5) कुशलवयोः मातरं वाल्मीकिः केन नाम्ना आह्वयति ?

6) तपोनिधिः पुराणः मुनिः कः ?

7) अयं रामायणस्य गानं कां पुनाति रमयति च ?

**पूर्णवाक्येन उत्तरत ।**

1) केषाम् कुटुम्बवृत्तान्तः समरूपः अस्ति ?

2) कस्य वेला सञ्जाता ?

3) इयं कथा कीदृशी अस्ति ?

4) रामः कम् आह्वयति ?

**निर्देशानुसारम् उत्तराणि लिखत ।**

1) अहम् पुनः पृच्छामि - अत्र कर्तृ पदं किम् ?

2) आह्वयन्ति इति क्रियापदस्य कर्तृपदं किम् ?

3) कुमारयोरनयोरस्माकम् - अत्र विशेषणपदं किम् ?

4) सो अयं परिकरः श्रोतारम् पुनाति - अत्र क्रियापदं किम् ?

5) कथा चेयं श्लाघ्या - अत्र विशेषणपदं किम् ?

6) अत्र विषमरूपः इत्यस्य किं विलोमपदं प्रयुक्तम् ?

7) विहरणं कृत्वा अपनयामि - अत्र क्रियापदं किम् ?

8) अध्यापकः इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

9) तदहं सुहृज्जनसाधारणं श्रोतुमिच्छामि – अत्र कर्तृपदं किम् ?

10) मित्र इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

**अभ्यासप्रश्नाः**

1. जानामि अहम् तस्य नामधेयम् - अस्मिन् वाक्ये कर्तृपदम् किम् ?

क ) तस्य | ख ) अहम्
ग ) जानामि | घ ) नामधेयम्

2. किं कुपिता एवं भणति उत प्रकृतिस्था ? अत्र हर्षिता पदस्य किं विलोमपदम् अस्ति ?

क ) प्रकृतिस्था | ख ) भणति
ग ) कुपिता | घ ) उत

3. इयती वेला - अत्र विशेष्यपदं किम् ?

क ) सञ्जाता | ख ) नियोगः
ग ) किमर्थं | घ ) वेला

4. ततः तापसौ कुशलवौ प्रविशतः - अत्र क्रियापदं किम् ?

क ) तापसौ | ख ) ततः
ग ) प्रविशतः | घ ) कुशलवौ

5. व्रजति हिमकरः अपि बालभावात् - अत्र क्रियापदं किम् ?

क ) व्रजति | ख ) हिमकरः
ग ) बालभावात् | घ ) अपि

6. लव इत्यात्मानं श्रावयामि - इति वाक्ये 'अन्यम्' इत्यस्य विलोमपदं किं प्रयुक्तम् ?

क ) श्रावयामि | ख ) इति
ग ) आत्मानम् | घ ) लव

7. अतिदीर्घः प्रवासः अयं दारुणश्च - इत्यत्र विशेष्यपदं किम् ?

क ) अतिदीर्घः | ख ) दारुणः
ग ) अयम् | घ ) प्रवासः

8. अहम् तावत् पृच्छामि - अत्र कर्तृपदं किम् ?

क ) पृच्छामि | ख ) अहम्
ग ) तावत् | घ ) एवम्

9. वयस्य अपूर्वं खलु नामधेयम् - अत्र विशेषणपदम् किम् ?

क ) वयस्य | ख ) अपूर्वम्
ग ) खलु | घ ) नामधेयम्

10. प्रेष्यतामस्मदन्तिकं सौमित्रिः - अत्र दूरम् इत्यस्य किं विलोमपदं प्रयुक्तम् ?

क ) अस्मत् ख ) सौमित्रि

ग ) अन्तिकम् घ ) प्रेष्यतां

11. तस्याः द्वे नामनी - अत्र विशेषणपदं किम् ?

क ) तस्याः ख ) द्वे

ग ) नामनी घ ) सा

12. रामायणकथा श्रोतारम् पुनाति - अत्र प्रयुक्तम् क्रियापदं किम् ?

क ) पुनाति ख ) श्रोतारम्

ग ) रामायणकथा घ ) रामः

13. अहो हृदयग्राही स्पर्शः - अत्र विशेष्यपदं किम् ?

क ) अहो ख) स्पर्शः

ग ) हृदयग्राही घ ) परिष्वज्य

14. हिमकरः अपि बालभावात् पशुपतिमस्तककेतकच्छदत्वम् व्रजति - अत्र शिव इत्यर्थे किं पदं प्रयुक्तम् ?

क ) हिमकरः ख ) पशुपति

ग ) अपि घ ) व्रजति

15. प्रविशतः इति क्रियापदस्य कर्तृपदं किम् ?

क ) विदूषकः ख ) कुशलवौ

ग ) रामः घ ) लवः

16. आसनार्धमुपवेशयति - अत्र प्रयुक्तम् क्रियापदं किम् ?

क ) आसनम् ख ) रामः

ग ) उपवेशयति घ ) अर्धम्

17. तपोवनवासिनो देवीति नाम्नाह्वयन्ति – अत्र प्रयुक्तं क्रियापदं किम् ?

क ) देवी ख ) तपोवनम्

ग ) आह्वयन्ति घ ) इति

18. राजन् उपाध्यायदूतो अस्मान् त्वरयति - अत्र अध्यापकः इति अर्थे किं पदं प्रयुक्तम् ?

क ) राजन् ख ) दूतः

ग ) उपाध्यायः घ ) त्वरयति

19. अहो उदात्तरम्यः समुदाचारः - अत्र विशेषणपदं किम् ?

क ) समुदाचारः　　　　ख ) अहो

ग ) उदात्तरम्यः　　　　घ ) आचारः

20. सरसिरुहनाभस्य इयम् श्लाघ्या कथा - अत्र प्रशंसनीया इति अर्थे किं पदं प्रयुक्तम् ?

क ) सरसिरुह　　　　ख ) श्लाघ्या

ग ) इयम्　　　　घ ) कथा

## चतुर्थः पाठः - शिशुलालनम् ( उत्तरकुञ्चिका )

**अनुच्छेदः - 1**

**एकपदेन उत्तरत**

1) रामः 2) लवकुशौ 3) लवकुशौ 4) रामः 5) लवकुशौ

**पूर्णवाक्येन उत्तरत ।**

1. रामः लवकुशौ अर्धासनम् उपवेशयति ।
2. सव्यवधानं सिंहासनोपवेशनं चारित्रलोपाय न भवति ।
3. कण्ठाश्लेषं प्राप्तुं रामः कथयति यत् भवतोः किम् वयमत्र कुशलप्रश्नस्य भाजनम् एव न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य इति ।

**निर्देशानुसारम् उत्तराणि लिखत ।**

1. प्रविशतः 2. कुशलवौ 3. अध्यास्यताम् 4. स्पर्शः 5. कुशलवाभ्याम्
6. भाजनम् 7. अङ्कम् 8. लवकुशाभ्याम् 9. प्रविशतः 10. उपवेशयति

**अनुच्छेदः - 2**

**एकपदेन उत्तरत ।**

1) शिशुजनः 2) हिमकरः 3) पशुपतिमस्तके 4) सहस्रदीधितिः
5) लवकुशौ 6) लवकुशयोः 7) उदात्तरम्यः

**पूर्णवाक्येन उत्तरत ।**

1. हिमकरः पशुपतिमस्तककेतकच्छदत्वं बालभावात् एव व्रजति ।
2. उपनयनोपदेशेन वाल्मीकिः कुशलवयोः गुरुः आसीत् ।
3. क्षत्रियकुलपितामहयोः सूर्यचन्द्रयोः को वा तयोः वंशस्य कर्ता इति पृच्छति ।

**निर्देशानुसारम् उत्तराणि लिखत।**

1. रामः 2. भवति 3. कुशलवाभ्याम् 4. भ्रातरौ 5. हिमकरः 6. कुशाय 7. सहस्रदीधितिः 8. श्रावयामि 9. समुदाचारः 10. व्रजति

**अनुच्छेदः - 3**

**एकपदेन उत्तरत**

1) प्रवासः 2) लवकुशयोः 3) जनकस्य 4) कुशः 5) कुतूहलेन 6) कुशलवौ

**पूर्णवाक्येन उत्तरत**

1. यतोहि तपोवने तस्य नाम न कश्चित् व्यवहरति।

2. तपोवने कश्चिदपि जनकस्य नाम न व्यवहरति

3. स्त्रीगतमनुयोक्तुं न युक्तम्।

**निर्देशानुसारम् उत्तराणि लिखत।**

1. इच्छामि 2. व्यवहरति 3. भणति 4. भणति 5. लवकुशाभ्याम् 6. रामः 7. निर्भर्त्सयति 8. अपूर्वम् 9. प्रवासः 10. पश्यति

**अनुच्छेदः - 4**

**एकपदेन उत्तरत।**

1) वाल्मीकिः 2) वाल्मीकिः 3) अपूर्वः 4) वसुमतीम् 5) वधूः 6) वाल्मीकिः 7) श्रोतारम्

**पूर्णवाक्येन उत्तरत।**

1. लवकुशयोः रामस्य च कुटुम्बवृत्तान्तः समरूपः अस्ति।

2. रामायणगानस्य वेला सञ्जाता।

3. इयं कथा श्लाघ्या अस्ति।

4. रामः सौमित्रिम् आह्वयति।

**निर्देशानुसारम् उत्तराणि लिखत।**

1. अहम् 2. तपोवनवासिनः 3. अनयोः 4. पुनाति 5. श्लाघ्या 6. समरूपः 7. अपनयामि 8. उपाध्यायः 9. अहम् 10. वयस्य

**अभ्यासप्रश्नाः**

1) अहम् 2) कुपिता 3) वेला 4) प्रविशतः 5) व्रजति 6) आत्मानम् 7) प्रवासः 8) अहम् 9) अपूर्वम् 10) अन्तिकम् 11) द्वे 12) पुनाति 13) स्पर्शः 14) पशुपतिः 15) कुशलवौ 16) उपवेशयति 17) आह्वयति 18) उपाध्यायः 19) उदात्तरम्यः 20) श्लाघ्या

# पञ्चमः पाठः

# जननी तुल्यवत्सला





**पञ्चम: पाठ: - जननी तुल्यवत्सला**

**अनुच्छेद: -1**

कश्चित् कृषक: बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयो: बलिवर्दयो: एक: शरीरेन दुबल: जवेन गन्तुमशक्ताश्चासीत् । अत: कृषक: तं दुर्बलं वृषभं तोदनेन नुद्यमान: अवर्तत । स: ऋषभ: हलमूढ्वा गन्तुमशक्त: क्षेत्रे पपात । क्रुद्ध : कृषीवल: तमुद्धापयितुं बहुवारं यत्नमकरोत् । तथापि वृष : नोत्थित: ।

**1 एकपदेन उत्तरत ।**

1 क: क्षेत्रकर्षणं कुर्वन्नासीत् ?

2 क: क्षेत्रे पपात ?

3 कृषक: काभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ?

4 तयो: एक: कीदृश: आसीत् ?

**2 पूर्णवाक्येन उत्तरत ।**

1 क्रुद्ध : कृषीवल: किम् अकरोत् ?

**3 निर्देशानुसारम् उत्तरत ।**

1 बलेन नीयमान: इति अर्थे किम् पदं प्रयुक्तम् ?

2 कृषक: इति पदस्य विशेषणपदं किम् ?

3 बहुवारं यत्नम् अकरोत् - अत्र क्रियापदं किम् ?

4 उत्थित: इति क्रियापदस्य कर्त्तृपदं किम् ?

**अनुच्छेद: - 2**

भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातु: सुरभे: नेत्राभ्यां अश्रूणि आविरासन् । सुरभेरिमाम् अवस्थां दृष्ट्वा सुराधिप: तामपृच्छत् - अयि शुभे किमेवं रोदिषि ? उच्यताम् इति ।

**1 एकपदेन उत्तरत ।**

1 सर्वधेनूनां माता का ?

2 सुरभे: नेत्राभ्यां कानि आविरासन् ?

3 किमेवं रोदिषि इति क: वदति ?

4 सुरभि: केषां जननी ?

**2 पूर्णवाक्येन उत्तरत ।**

1 माता सुरभि: किमर्थं अश्रूणि अमुञ्चत् ?

**3 निर्देशानुसारम् उत्तरत ।**

1 देवेन्द्र : इति अर्थे किम् पदम् अत्र प्रयुक्तम् ?

2 रोदिषि इति क्रियापदस्य कर्तृपदं किम् ?

3 अवस्थाम् इति पदस्य विशेषणपदं किम् ?

**अनुच्छेद: - 3**

भो वासव! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि । स: दीन: इति जानन्नपि कृषक: तं बहुधा पीडयति । स: कृच्छ्रेण भारमुद्वहति । इतरमिव धुरं वोढुं स: न शक्नोति । एतत् भवान् पश्यति न ? इति प्रत्यवोचात् । भद्रे ! नूनं सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वाल्सल्यं कथं ? इति इन्द्रेण पृष्टा सुरभि: प्रत्यवोचत् ।

**1 एकपदेन उत्तरत ।**

1 स: कथं भारं वहति ?

2 कस्य दैन्यं दृष्ट्वा सा रोदिति ?

**2 पूर्णवाक्येन उत्तरत ।**

1 इन्द्र: सुरभिं किम् अपृच्छत् ?

**3 निर्देशानुसारम् उत्तरत ।**

1 दीनावस्थाम् इति अर्थे अत्र किं पदं प्रयुक्तम् ?

2 प्रत्यवोचत् इति क्रियापदस्य कर्तृपदं किम् ?

3 सरलतया इति पदस्य विपर्ययं चिनुत ।

**अनुच्छेद: - 4**

बहून्यपत्यानि मे सन्तीति सत्यम् । तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनाम् अनुभवामि। यतो हि अयमन्येभ्यो दुर्बल: । सर्वेष्वपत्येषु जननी तुल्यवल्सला एव । तथापि दुर्बले सुते मातु: अभ्यधिका कृपा सहजैव इति । सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयम् अद्रवत् । स: च तामेवमसान्त्वयत् - “गच्छ वत्से ! सर्वं भद्रं जायेत ।”

**1. एकपदेन उत्तरत ।**

1 सर्वेष्वपत्येषु जननी कीदृशी भवति ?

2 कस्मिन् मातु: अधिका कृपा ?

**2 पूर्णवाक्येन उत्तरत ।**

1 इन्द्र: किम् अवदत् ?

**3 निर्देशानुसारम् उत्तरत ।**

1 दुर्बले सुते - अत्र विशेषणपदं किम् ?

2 माता इति अर्थे अत्र किं पदं प्रयुक्तम् ?

3 अनुभवामि इति क्रियापदस्य कर्तृपदं किम् ?

**4) श्लोकस्य अन्वयम् उचितपदै: पूरयत ।**

अपत्येषु च सर्वेषु जननी तुल्यवत्सला ।
पुत्रे दीने तु सा माता कृपार्द्रहृदया भवेत् ॥

मञ्जूषा :- ( पुत्रे , अपत्येषु , आर्द्रहृदया , सा )

**अन्वय**: :- सर्वेषु ___________ च जननी तुल्यवल्सला । दीने _________ तु ___________ माता _________ भवेत् ।

**अनुच्छेद: - 5**

अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्ष: समजायत । लोकानां पश्यतां एव सर्वत्र जलोपप्लव: सञ्जात : । कृषक: हर्षातिरेकेण कर्षणविमुख : सन् वृषभौ नीत्वा गृहमगात् ।

**1. एकपदेन उत्तरत ।**

1 अचिरादेव चण्डवातेन मेघरवैश्च सह किम् समजायत ?

2 सर्वत्र किम् सञ्जात : ?

**2. पूर्णवाक्येन उत्तरत ।**

1 कृषक: किम् अकरोत् ?

**3. निर्देशानुसारम् उत्तरत ।**

1 समजायत इति क्रियापदस्य कर्त्तृपदं किम्?

2 चिरात् इति पदस्य विपर्यं चिनुत ?

3 शीघ्रम् इति अर्थे किम् पदं प्रयुक्तम् ?

## अभ्यासप्रश्ना:

**1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

बहून्यपत्यानि मे सन्तीति सत्यम् । तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनाम् अनुभवामि । यतो हि अयमन्येभ्यो दुर्बल: । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव । तथापि दुर्बले सुते मातु: अभ्यधिका कृपा सहजैव इति सुरभिवचनं श्रुत्वा भृशम् विस्मितस्याखण्डलस्यापि हृदयं अद्रवत् । स च तामेवमसान्त्वयत् - गच्छ वत्से ! सर्वं भद्रं जायेत ।

**1. एकपदेन उत्तरत ।**

1. बहून्यपत्यानि मे सन्तीति का कथयति ?
2. केषु जननी तुल्यवत्सला एव ?

**2. पूर्णवाक्येन उत्तरत ।**

1. इन्द्र: च तां कथमसान्त्वयत् ?

**3. निर्देशानुसारम् उत्तरत ।**

1. दुर्बले सुते अत्र विशेषण पदं किम् ?
2. तुल्यवत्सला एव अत्र अव्यय पदं किम् ?
3. अनुभवामि इति क्रियापदस्य कर्तृपदं किम् ?
4. अधिकम् इति अर्थे किं पदम् अत्र प्रयुक्तम् ?

**2. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत -**

विनिपातो न: व : कश्चित् दृश्यते त्रिदशाधिप ।
अहं तु पुत्रं शोचामि तेन रोदिमि कौशिक ॥

**1. एकपदेन उत्तरत ।**

1. का पुत्राय शोचति ?
2 .त्रिदशधिप: क : अस्ति ?

**2. पूर्णवाक्येन उत्तरत ।**

1. माता किमर्थं रोदिति ?

**3. निर्देशानुसारम् उत्तरत ।**

1. शोचामि इति क्रियापदस्य कर्तृपदं किं ?
2. देवानां राजा इत्यस्य पर्यायपदं किम् ?

**3. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत -**

यदि पुत्रसहस्रं मे सर्वत्र सममेव मे ।
दीनस्य तु सत: शक्र ! पुत्रस्याभ्यधिका कृपा ॥

**1. एकपदेन उत्तरत।**

1 कस्याः पुत्रसहस्रम् अस्ति ?

2 श्लोके सम्बोधनपदं किम् अस्ति ?

**2. पूर्णवाक्येन उत्तरत।**

1. मातुः अधिका कृपा कस्मिन् भवति ?

**3. निर्देशानुसारम् उत्तरत।**

1. 'दु:खितस्य' इत्यर्थे किं पदं प्रयुक्तम् ?
2. 'पुत्रस्य' इति पदस्य विशेषणपदं किम् ?
3. 'भिन्नम्' इति पदस्य विलोमपदं किम् ?

## पञ्चम: पाठ: - जननी तुल्यवत्सला - उत्तरकुञ्चिका

**अनुच्छेद: - 1**

**1. एकपदेन उत्तरत।** 1 कृषक: 2 वृषभ: 3 बलीवर्दाभ्याम् 4 दुर्बल:

**2. पूर्णवाक्येन उत्तरत।** 1 क्रुद्ध: कृषीवल: तमुत्थापयितुं बहुवारं यत्नमकरोत्।

**3. निर्देशानुसारम् उत्तरत।** 1 नुद्यमान: 2 कश्चित् 3 अकरोत् 4 वृष :

**अनुच्छेद: - 2**

**1. एकपदेन उत्तरत।** 1 सुरभि: 2 अश्रूणि 3 इन्द्र: 4 सर्वधेनूनाम्

**2. पूर्णवाक्येन उत्तरत।** 1 भूमौ पतिते स्वपुत्रं दृष्ट्वा सुरभि: अश्रूणि अमुञ्चत्।

**3. निर्देशानुसारम् उत्तरत।** 1 सुराधिप: 2 त्वम् 3 इमाम्

**अनुच्छेद: - 3**

**1. एकपदेन उत्तरत।** 1. कृच्छ्रेण 2 पुत्रस्य

**2. पूर्णवाक्येन उत्तरत।** 1 भद्रे नूनं सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथं ? इति इन्द्र: सुरभिम् अपृच्छत्।

**3. निर्देशानुसारम् उत्तरत।** 1 दैन्यम् 2 सुरभि: 3 कृच्छ्रेण

**अनुच्छेद: - 4**

**1. एकपदेन उत्तरत।** 1. तुल्यवत्सला 2. दुर्बले सुते

**2. पूर्णवाक्येन उत्तरत।** 1. इन्द्र: तां "गच्छ वत्से ! सर्वं भद्रं जायेत" इति अवदत्।

**3. निर्देशानुसारम् उत्तरत।** 1. दुर्बले 2. जननी 3. अहम्

**4) श्लोकस्य अन्वयम् उचितपदैः पूरयत।**

1. अपत्येषु 2. पुत्रे 3. सा 4. आर्द्रहृदया

**अनुच्छेदः - 5**

**1. एकपदेन उत्तरत।** 1 प्रवर्षः 2 जलोपप्लवः

**2. पूर्णवाक्येन उत्तरत।** 1 कृषकः हर्षातिरेकेण कर्षणविमुख : सन् वृषभौ नीत्वा गृहमगात्।

**3. निर्देशानुसारम् उत्तरत।** 1 प्रवर्षः 2 अचिरात् 3 अचिरात्

## अभ्यासप्रश्नाः - उत्तरकुञ्चिका

**प्रश्नः - 1 ( अनुच्छेदः )**

**1. एकपदेन उत्तरत।**

1. सुरभिः 2. सर्वेष्वपत्येषु

**2. पूर्णवाक्येन उत्तरत।**

1. गच्छ वत्से ! सर्वं भद्रं जायेत इति इन्द्रः तामसान्त्वयत्।

**3. निर्देशानुसारम् उत्तरत।**

1. दुर्बले 2. एव 3. अहम् 4. भृशम्

**प्रश्नः - 2 ( श्लोकः )**

**1. एकपदेन उत्तरत।**

1. सुरभिः 2. इन्द्रः

**2. पूर्णवाक्येन उत्तरत।**

1. पीडितं पुत्रं दृष्ट्वा माता रोदिति।

**3. निर्देशानुसारम् उत्तरत।**

1. अहम् 2. त्रिदशाधिपः

**प्रश्नः - 3 ( श्लोकः )**

**1. एकपदेन उत्तरत।**

1. सुरभेः 2. शक्र!

**2. पूर्णवाक्येन उत्तरत।**

1. दीने पुत्रे मातुः अधिका कृपा भवति।

**3. निर्देशानुसारम् उत्तरत।**

1. दीनस्य 2. दीनस्य 3. समम्

# षष्ठः पाठः

# सुभाषितानि

# षष्ठ: पाठः - सुभाषितानि

**श्लोकः - 1**

आलस्यं हि मनुष्याणां शरीरस्थो महारिपुः ।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति ॥

**क) एकपदेन उत्तरत ।**

1. आलस्यं केषां रिपुः?
2. महारिपुः कः भवति ?
3. केन समः बन्धुः न अस्ति ?

**ख) पूर्णवाक्येन उत्तरत ।**

1.मनुष्यः किं कृत्वा न अवसीदति ?

**ग) भाषिककार्यम् ।**

1.अत्र परिश्रमः इत्यस्य किं समानार्थकपदं प्रयुक्तम् ?
2. अत्र शत्रुः इत्यस्य किं समानार्थकपदं प्रयुक्तम् ?
3. बन्धुः कृत्वा यं नावसीदति। अस्मिन् वाक्ये क्रियापदं किं भवति ?
4.अत्र बन्धुः इत्यस्य किं विशेषणं भवति ?
5.परिश्रमम् इत्यस्य किं विपरीतपदं प्रयुक्तम् भवति ?

**श्लोकः - 2**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः ॥

**क) एकपदेन उत्तरत ।**

1. कः गुणं वेत्ति ?
2. गुणी किं वेत्ति ?
3. गुणं कः न वेत्ति ?
4. कः बलं वेत्ति ?
5. बली किं वेत्ति ?
6. बलं कः न वेत्ति ?
7. कः सिंहस्य बलं जानाति ?
8. कः वसन्तस्य गुणं जानाति ?

**ख) पूर्णवाक्येन उत्तरत।**

1. सिंहस्य बलं कः जानाति, कः न जानाति ?
2. कः वसन्तस्य गुणं जानाति, कः न जानाति ?
3. मूषक: कस्य बलं न वेत्ति ?
4. वायस: कस्य गुणं न जानाति ?

**ग) भाषिककार्यम्।**

1. अत्र काकः इत्यस्य किं समानार्थकपदं प्रयुक्तम् ?
2. अत्र कोकिलः इत्यस्य पर्यायपदं किम् ?
3. गुणी गुणं वेत्ति - अत्र वेत्ति इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?
4. निर्गुणः इत्यस्य किं विपर्ययपदं प्रयुक्तम् ?
5. बली इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम् ?

**श्लोक: - 3**

निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै
कथं जनस्तं परितोषयिष्यति ॥

**क) एकपदेन उत्तरत।**

1. नर: किम् उद्दिश्य प्रकुप्यति ?
2. मन: कीदृशम् ?

**ख) पूर्णवाक्येन उत्तरत।**

1. मनुष्यः कदा प्रसीदति ?
2. जन: कं न परितोषयितुं न शक्नोति ?

**ग) भाषिककार्यम्**

1. कथं जनस्तं परितोषयिष्यति। अस्मिन् वाक्ये क्रियापदं किं भवति ?
2. निश्चयेन इत्यर्थे किं पदम् उपयुक्तं भवति ?
3. सन्तोषयिष्यति इत्यस्य किं समानार्थकपदं श्लोके प्रयुक्तम् भवति ?

**श्लोकः - 4**

उदीरितोऽर्थः पशुनापि गृह्यते
हयाश्च नागाश्च वहन्ति बोधिताः ।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः ॥

**क) एकपदेन उत्तरत ।**

1. पशुना किं गृह्यते ?
2. के बोधिताः वहन्ति ?
3. कः अनुक्तमप्यूहति ?
4. केन उदीरितोर्थः गृह्यते ?

**ख) पूर्णवाक्येन उत्तरत ।**

1. पण्डितो जनः किम् ऊहति ?
2 .कीदृशा: नागाः वहन्ति ?
3. बुद्धयः कीदृशाः भवन्ति ?

**ग) भाषिककार्यम् ।**

1. उदीरितोऽर्थः पशुनापि गृह्यते । अत्र किं क्रियापदं प्रयुक्तम् ?
2. अत्र अश्वा: इत्यर्थे किं पदं प्रयुक्तम् ?
3. अस्मिन् श्लोके गजस्य पर्यायपदं किम् ?
4. मूढः इत्यस्य किं विपरीतपदं प्रयुक्तम् ?
5. ऊहति इत्यस्य कर्तृपदं किं भवति ?

**श्लोकः - 5**

क्रोधो हि शत्रुः प्रथमो नराणां
देहस्थितो देहविनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः
स एव वह्निर्दहते शरीरम् ॥

**क) एकपदेन उत्तरत।**

1. नराणां प्रथमः शत्रुः कः भवति ?

2. क्रोधः कुत्र स्थितः ?

3. कः शरीरं दहते ?

4 .वह्निः किं दहते ?

**ख) पूर्णवाक्येन उत्तरत।**

1. कीदृशः वह्निः शरीरं दहते ?

2. कः नराणां प्रथमः शत्रुः भवति ?

**ग) भाषिककार्यम्।**

1. शरीरम् इत्यर्थे किं पदं श्लोके प्रयुक्तम् ?

2. अग्निः इत्यस्य समानार्थकपदं किं भवति ?

3. शत्रुः इत्यस्य किं विशेषणं प्रयुक्तम् ?

**श्लोकः - 6**

मृगा मृगैः सङ्गमनुव्रजन्ति
गावश्च गोभिः तुरगास्तुरङ्गैः।
मूर्खाश्च मूर्खैः सुधियः सुधीभिः
समानशीलव्यसनेषु सख्यम्॥

**क) एकपदेन उत्तरत।**

1.मृगा: कैः सङ्गमनुव्रजन्ति ?
2.के मृगैः सङ्गमनुव्रजन्ति ?
3.के मूर्खैः सङ्गमनुव्रजन्ति ?
4 मूर्खाः कैः सङ्गमनुव्रजन्ति ?
5.के गोभिः सङ्गमनुव्रजन्ति ?
6. गावः कैः सङ्गमनुव्रजन्ति ?
7.तुरगा: कैः सङ्गमनुव्रजन्ति ?
8. के तुरङ्गैः सङ्गमनुव्रजन्ति ?
9. केषु सख्यम् भवति ?
10. के सुधीभिः सङ्गमनुव्रजन्ति ?
11. सुधियः कैः सङ्गमनुव्रजन्ति ?

**ख) पूर्णवाक्येन उत्तरत।**

1. के कैः सङ्गमनुव्रजन्ति ?

2. केषु सख्यं भवति ?

**ग) भाषिककार्यम्।**

1.पण्डिता: इत्यस्य समानार्थकपदं किम् ?

2.अश्वः इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

3.अत्र मूर्खा: इत्यस्य विपरीतपदं किं भवति ?

4.शत्रुता इति पदस्य विलोमपदं किं भवति ?

5. मृगा मृगैः सङ्गमनुव्रजन्ति। अत्र किं क्रियापदम् उपयुक्तम् भवति ?

**श्लोकः - 7**

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।

यदि दैवात् फलं नास्ति छाया केन निवार्यते॥

**क) एकपदेन उत्तरत।**

1. कः सेवितव्यः ?

2. कीदृशः महावृक्षः सेवितव्यः ?

3. का केनापि न निवार्यते ?

4. कस्मात् फलं नास्ति ?

5. दैवात् किं नास्ति ?

**ख) पूर्णवाक्येन उत्तरत।**

1. कः सेवितव्यः ?

2. सेवितव्यस्य महावृक्षस्य का न निवार्यते ?

**ग) भाषिककार्यम्।**

1. अत्र महावृक्षः इत्यस्य किं विशेषणं प्रयुक्तम् भवति ?

2. अत्र नास्ति इत्यस्य कर्तृपदं किं भवति ?

**श्लोकः - 8**

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम् ।

अयोग्यः पुरुषः नास्ति, योजकस्तत्र दुर्लभः ।।

**क) एकपदेन उत्तरत ।**

1. अमन्त्रं किं नास्ति ?
2. अनौषधं किं नास्ति ?
3. अयोग्यः कः नास्ति ?
4. तत्र कः दुर्लभः ?
5. कीदृशम् अक्षरं नास्ति ?
6. कीदृशं मूलं नास्ति ?
7. कीदृशः पुरुषः नास्ति ?

**ख) पूर्णवाक्येन उत्तरत ।**

1. क: दुर्लभः वर्तते ?
2. अमन्त्रं किं नास्ति ?
3. अनौषधं किं नास्ति ?
4. अयोग्यः कः नास्ति ?

**ग) भाषिककार्यम् ।**

1. सुलभः इत्ययस्य किं विलोमपदं प्रयुक्तम् ?
2. अयोग्यः इति पदं कस्य विशेषणं भवति ?
3. अमन्त्रमक्षरं नास्ति - अत्र नास्ति इति पदस्य कर्तृपदं किम् भवति ?

**श्लोकः - 9**

संपत्तौ च विपत्तौ च महतामेकरूपता ।

उदये सविता रक्तो रक्तश्चास्तमये तथा ।।

**क) एकपदेन उत्तरत ।**

1. केषां संपत्तौ विपत्तौ च एकरूपता भवति ?
2. कः उदये रक्तः भवति ?
3. कः अस्तमये रक्तः भवति ?
4. महतां कुत्र एकरूपता भवति ?
5. सविता उदयास्तमये कीदृशः भवति ?

**ख) पूर्णवाक्येन उत्तरत।**

1. महतां कुत्र एकरूपता भवति ?
2. सविता कदा रक्तवर्णः भवति ?

**ग) भाषिककार्यम्**

1. सूर्यः इत्यर्थे किं पदं प्रयुक्तम् ?
2. आपदः इति पदस्य किं समानार्थकपदं श्लोके प्रयुक्तम् ?
3. महात्मनाम् इति पदस्य पर्यायपदं किम् भवति ?
4. विपदः इति पदस्य विलोमपदं किम् भवति ?

**श्लोकः 10**

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम्।
अश्वश्चेद् धावने वीरः भारस्य वहने खरः ॥

**क) एकपदेन उत्तरत।**

1. कुत्र किञ्चित् निरर्थकम् नास्ति ?
2. संसारः कीदृशः अस्ति ?
3. कः भारस्य वहने वीरः ?
4. कः धावने वीरः ?
5. अश्वः कुत्र वीरः ?
6. खरः कुत्र वीरः ?
7. संसारे किं नास्ति ?

**ख) पूर्णवाक्येन उत्तरत।**

1. संसारः कीदृशः अस्ति ?
2. संसारे किं नास्ति ?
3. कः धावने वीरः कश्च भारस्य वहने वीरः ?

**ग) भाषिककार्यम्।**

1. गर्दभः इत्यस्य समानार्थकपदं किं भवति ?
2. सार्थकम् इत्यस्य किं विलोमपदं अत्र प्रयुक्तम् ?
3. संसारे इत्यस्य विशेषणं किम् ?
4. विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् - अत्र क्रियापदं किं भवति ?

# षष्ठः पाठः - सुभाषितानि - उत्तरकुञ्चिका

**उत्तराणि (श्लोकः-1)**

क) 1.मनुष्याणाम् 2.आलस्यम् 3.उद्यमेन

ख) 1.मनुष्यः उद्यमं कृत्वा न अवसीदति।

ग) 1.उद्यमः 2.रिपुः 3.अवसीदति 4.उद्यमसमः 5.आलस्यम्

**उत्तराणि (श्लोकः-2)**

क) 1.गुणी 2.गुणम् 3.निर्गुणः 4.बली 5.बलम् 6.निर्बलः 7.करी 8.पिकः

ख) 1.सिंहस्य बलं करी जानाति, मूषकः न जानाति।

2.वसन्तस्य गुणं पिकः जानाति,वायसः न जानाति।

3.मूषकः सिंहस्य बलं न वेत्ति।

4.वायसः वसन्तस्य गुणं न जानाति।

ग) 1.वायसः 2.पिकः 3.गुणी 4.गुणी 5.वेत्ति

**उत्तराणि (श्लोकः-3)**

क) 1.निमित्तम् 2.अकारणद्वेषि

ख)1.मनुष्यः कोपस्य अपगमे प्रसीदति।

2.यस्य मन: अकारणद्वेषि अस्ति जन: तं परितोषयितुं न शक्नोति।

ग) 1. परितोषयिष्यति 2.ध्रुवम् 3. परितोषयिष्यति

**उत्तराणि (श्लोकः-4)**

क) 1.उदीरितोर्थः 2.हयाः नागाः च 3.पण्डितो जनः 4.पशुना

ख) 1. पण्डितो जनः अनुक्तम् अपि ऊहति।

2.बोधिताः नागाः वहन्ति।

3.बुद्धयः परेङ्गितज्ञानफलाः भवन्ति।

ग) 1. गृह्यते 2.हयाः 3.नागः 4.पण्डितः 5.पण्डितोजनः

**उत्तराणि (श्लोकः-5)**

क) 1.क्रोधः 2.देहे 3.वह्निः 4.शरीरम्

ख) 1.काष्ठगतः वह्निः शरीरं दहते।

2.नराणां प्रथमः शत्रुः देहस्थितः क्रोधः भवति।

ग) 1.देह: 2.वह्निः 3.प्रथमः

**उत्तराणि (श्लोकः-6)**

क) 1.मृगैः 2.मृगाः 3.मूर्खाः 4.मूर्खैः 5.गावः 6.गोभिः 7.तुरङ्गैः
8.तुरगाः 9.समान-शील-व्यसनेषु 10.सुधियः 11.सुधीभिः

ख) 1.मृगाः मृगैः गावः गोभिः तुरगाः तुरङ्गैः मूर्खाः मूर्खैः सुधियः सुधीभिः च सङ्गमनुव्रजन्ति।

2.समानशीलव्यसनेषु सख्यम् भवति।

ग) 1. सुधियः 2. तुरगः 3. सुधियः 4.सख्यम् 5.अनुव्रजन्ति

**उत्तराणि (श्लोक:-7)**

क) 1.महावृक्षः 2.फलच्छायासमन्वितः 3.छाया 4.दैवात् 5.फलम्

ख) 1.फलच्छायासमन्वितः महावृक्षः सेवितव्यः।

2.सेवितव्यस्य महावृक्षस्य छाया न निवार्यते।

ग) 1. फलच्छायासमन्वितः 2.फलम्

**उत्तराणि (श्लोक:-8)**

क) 1.अक्षरम् 2.मूलम् 3.पुरुषः 4.योजकः 5.अमन्त्रम् 6.अनौषधम् 7.अयोग्यः

ख) 1.योजकः दुर्लभःवर्तते।

2.अमन्त्रम् अक्षरं नास्ति।

3.अनौषधं मूलं नास्ति।

4.अयोग्यः पुरुषः नास्ति।

ग) 1. दुर्लभः 2.पुरुषः 3.अक्षरम्

**उत्तराणि (श्लोक:-9)**

क)1.महतां 2.सविता 3.सविता 4.संपत्तौ विपत्तौ च 5.रक्तवर्णः

ख)1.महतां संपत्तौ विपत्तौ च एकरूपता भवति।

2.सविता उदये अस्तमये च रक्तवर्णः भवति।

ग)1.सविता 2.विपदः 3.महताम् 4.सम्पदः

**उत्तराणि (श्लोक:-10)**

क) 1.संसारे 2.विचित्रः 3.खरः 4.अश्वः 5.धावने 6.भारवहने 7.निरर्थकम्

ख) 1.संसारः विचित्रः अस्ति।

2.संसारे किञ्चित् निरर्थकं नास्ति।

3.अश्वः धावने वीरःखरः भारस्य वहने वीरः।

ग) 1.खरः 2.निरर्थकम् 3.विचित्रे 4.अस्ति

# सप्तमः पाठः

# सौहार्दं प्रकृतेः शोभा



# सप्तमः पाठः - सौहार्दं प्रकृतेः शोभा

**अनुच्छेदः - 1**

वनस्य दृश्यम् । समीपे एवैका नदी वहति । एकः सिंहः सुखेन विश्राम्यति । तदैव एकः वानरः आगत्य तस्य पुच्छं धुनाति । क्रुद्धः सिंहः तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढः । तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति । एवमेव वानराः वारं वारं सिंहं तुदन्ति ।

**एकपदेन उत्तरत :-**

1. कस्य दृश्यम् अस्ति ?
2. का वहति ?
3. एका नदी कुत्र वहति ?

**पूर्णवाक्येन उत्तरत :-**

1. कः विश्रामं करोति ?
2. यदा एकः सिंहः सुखेन विश्रामं करोति तदा एव कः पुच्छं धुनाति ?
3. अपरः वानरः किं करोति ?

**निर्देशानुसारम् उत्तरत :-**

1. आरूढः इत्यस्य कर्तृपदं किम् ?
2. अन्यस्मात् वृक्षात् - अत्र विशेषणपदं किम् ?

**अभ्यासप्रश्नाः (एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते ) ।**

1. एकः वानरः कस्य पुच्छं धुनाति ?
2. कः आरोहणं कृतवान् ?
3. वानरः कम् आरूढवान् ?
4. वानरः किं कृत्वा वृक्षम् आरूढवान् ?
5. अपरः वानरः कम् आकृष्य वृक्षोपरि आरोहति ?
6. अपरः वानरः कस्य कर्णम् आकृष्य वृक्षोपरि आरोहति ?
7. अपरः वानरः कस्मात् सिंहस्य कर्णम् आकृष्य वृक्षोपरि आरोहति ?
8. कः वानरं प्रहर्तुम् इच्छति ?

**अनुच्छेदः - 2**

क्रुद्धः सिंहः इतस्ततः धावति, गर्जति परं किमपि कर्तुमसमर्थः एव तिष्ठति। वानराः हसन्ति। वृक्षोपरि च विविधाः पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।

**एकपदेन उत्तरत :-**

1. कः धावति ?
2. कीदृशः सिंहः वानरं प्रहर्तुम् इच्छति ?
3. क्रुद्धः सिंहः किं कर्तुम् इच्छति ?

**पूर्णवाक्येन उत्तरत :-**

1. क्रुद्धः सिंहः कं प्रहर्तुम् इच्छति ?
2. कः असमर्थः एव तिष्ठति ?
3. विविधाः पक्षिणः कीदृशं कलरवं कुर्वन्ति ?

**निर्देशानुसारम् उत्तरत :-**

1. कुर्वन्ति इत्यस्य कर्तृपदं किम् ?
2. कलरवम् - इत्यस्य विशेषणपदं किम् ?

**अभ्यासप्रश्नाः (एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते )।**

1. के सिंह पीडयन्ति ?
2. वानराः कं पीडयन्ति ?
3. के हसन्ति ?
4. के कलरवं कुर्वन्ति ?
5. कतिविधाः पक्षिणः कलरवं कुर्वन्ति ?
6. कुत्र विविधाः पक्षिणः हर्षमिश्रितं कलरवं कुर्वन्ति ?
7. वृक्षोपरि विविधाः पक्षिणः कां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ?
8. वृक्षोपरि विविधाः पक्षिणः कस्य दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ?

**अनुच्छेदः - 3**

निद्राभङ्गदुःखेन वनराजः सन्नपि तुच्छजीवैः आत्मनः एतादृश्या दुरवस्थया श्रान्तः सर्वजन्तून् दृष्ट्वा पृच्छति -

सिंहः - (क्रोधेन गर्जन्) भोः ! अहं वनराजः किं भयं न जायते ? किमर्थं मामेवं तुदन्ति सर्वे मिलित्वा ?

**एकपदेन उत्तरत :-**

1. कः पृच्छति ?
2. वनराजः कः अस्ति ?
3. सिंहः कीदृशः सन् पृच्छति ?

**पूर्णवाक्येन उत्तरत :-**

1. सिंहः आत्मनः दुरवस्थया श्रान्तः भूत्वा सर्वजन्तून् दृष्ट्वा किं पृच्छति ?
2. सिंहः कया श्रान्तः भूत्वा पृच्छति ?
3. सिंहः क्रोधेन गर्जन् किं पृच्छति ?

**निर्देशानुसारम् उत्तरत :-**

1. वनराजः इत्यस्य क्रियापदं किम् ?
2. एतादृश्या दुरवस्थया - अत्र विशेष्यपदं किम् ?

**अभ्यासप्रश्ना: ( एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते )**

1. सिंहः वनराजः सन् अपि पुनः कैः कृतया दुरवस्थया श्रान्तः भूत्वा पृच्छति ?
2. सिंहः कस्य दुरवस्थया श्रान्तः भूत्वा पृच्छति ?
3. सिंहः आत्मनः दुरवस्थया श्रान्तः भूत्वा कान् दृष्ट्वा पृच्छति ?
4. कः पृच्छति ?
5. सिंहः कथं गर्जन् पृच्छति ?
6. कः श्रान्तः अस्ति ?

**अनुच्छेदः - 4**

एकः वानरः - यतः त्वं वनराजः भवितुं तु सर्वथा अयोग्यः । राजा तु रक्षकः भवति परं भवान् तु भक्षकः । अपि च स्वरक्षायामपि समर्थः नासि तर्हि कथमस्मान् रक्षिष्यसि ?

अन्यः वानरः - किं न श्रुता त्वया पञ्चतन्त्रोक्तिः -

यो न रक्षति वित्रस्तान् पीड्यमानान्परैः सदा ।
जन्तून् पार्थिवरूपेण स कृतान्तो न संशयः ॥

**एकपदेन उत्तरत :-**

1. कः वदति ?
2. सिंहः कीदृशः अस्ति ?
3. राजा रक्षकः भवति परं भवान् तु भक्षकः - अत्र भवान् इत्यनेन कः निर्दिष्टः ?

**पूर्णवाक्येन उत्तरत :-**

1. राजा तु रक्षकः भवति परं भवान् भक्षकः अस्ति इति कः वदति ?
2. एकः वानरः किं वदति ?
3. कः पार्थिवरूपेण यमराजः भवति ?

**निर्देशानुसारम् उत्तरत :-**

1. रक्षकः इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
2. राजा इत्यस्य समानार्थपदं किम् ?

**अभ्यासप्रश्नाः ( एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते )**

1. अन्यः वानरः किं वदति ?
2. यः परैः पीड्यमानान् भीतान् जन्तून् न रक्षति सः कः भवति ?
3. कथम् अस्मान् रक्षिष्यसि इति कः पृच्छति ?

**अनुच्छेदः - 5**

काकः - आम्, सत्यं कथितं त्वया - वस्तुतः वनराजः भवितुं तु अहमेव योग्यः ।

पिकः - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणम् आकुलीकरोषि। न रूपम्, न ध्वनिरस्ति। कृष्णवर्णं मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

**एकपदेन उत्तरत :-**

1. अन्यस्य वानरस्य वचनं सत्यम् इति कः वदति ?
2. केन कथितं सत्यम् इति काकः वदति ?
3. कः उपहसन् वदति ?

**पूर्णवाक्येन उत्तरत :-**

1. कथं त्वं योग्यः वनराजः भवितुम् ? इति कः पृच्छति ?
2. कथं त्वं योग्यः वनराजः भवितुम् ? इति पिकः कं पृच्छति ?
3. काकः कीदृशः भवति ?

**निर्देशानुसारम् उत्तरत :-**

1. मेध्यः इत्यस्य विलोमपदं किम् ?
2. मन्यामहे इत्यस्य कर्तृपदं किम् ?

**अभ्यासप्रश्नाः ( एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते )**

1. क: कर्कशध्वनिना वातावरणम आकुलीकरोति ?
2. काकस्य किं न अस्ति इति पिक: वदति ?
3. क: मेध्यामध्यस्य भक्षणं करोति ?
4. काकः कीदृशः भवति ?
5. त्वां कथं वनराजं मन्यामहे वयम् ? इति कः वदति ?

**अनुच्छेद: - 6**

काकः- अरे ! अरे ! किं जल्पसि ? यदि अहं कृष्णवर्ण: तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा - अनृतं वदसि चेत् काकः दशेत् - इति प्रकारेण । अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् । अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते ।

**एकपदेन उत्तरत :-**

1. अरे ! अरे ! किं जल्पसि ? इति कः प्रश्नं करोति ?
2. त्वं किं गौराङ्गः ? इति प्रश्नं काकः कं पृच्छति ?
3. कीदृशः छात्र: आदर्शच्छात्रः भवति ?

**पूर्णवाक्येन उत्तरत :-**

1. काकः कदा दशति ?
2. केषां परिश्रम: ऐक्यं च विश्वप्रथितम् ?
3. कस्य सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा ?

**निर्देशानुसारम् उत्तरत :-**

1. असत्यम् इत्यर्थे किं पदं प्रयुक्तम् ?
2. काकचेष्टः विद्यार्थी - अत्र विशेष्यपदं किम् ?

**अनुच्छेद: - 7**

पिक: - अलम् अलम् अतिविकत्थनेन । किं विस्मयते यत् -

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ।।

**एकपदेन उत्तरत :-**

1. अलम् अलम् अतिविकत्थनेन इति कः वदति ?
2. पिक: अलम् अलम् अतिविकत्थनेन इति कं वदति ?
3. किं विस्मर्यते इति कः पृच्छति ?

**पूर्णवाक्येन उत्तरत :-**

1. काकः कीदृशः भवति ?
2. पिकस्य वर्ण: क: भवति ?
3. पिककाकयो: भेदः कदा ज्ञायते ?

**निर्देशानुसारम् उत्तरत :-**

1. कोकिल: - इत्यस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?
2. काक: कृष्ण: - अत्र विशेषणपदं किम् ?

**अनुच्छेद: - 8**

काकः - रे परभृत् ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिका: ? अत: अहम् एव करुणापरः पक्षिसम्राट् काकः ।

**एकपदेन उत्तरत :-**

1. रे परभृत् इति सम्बोधनपदं कस्य कृते प्रयुक्तम् ?
2. अत्र कः करुणापरः अस्ति ?
3. अहम् इति पदं कस्मै प्रयुक्तम् ?

**पूर्णवाक्येन उत्तरत :-**

1. कोकिलस्य सन्ततिं कः पालयति ?
2. काकः किमर्थं पक्षिसम्राट् भवितुं योग्यः इति वदति ?
3. रे परभृत् इति क: कं संबोधयति ?

**निर्देशानुसारम् उत्तरत :-**

1. पिक: इत्यर्थे अत्र किंपदं प्रयुक्तम् ?
2. करुणापरः इत्यस्य विशेष्यपदं किम् ?

**अनुच्छेदः - 9**

गजः - (समीपत: एवागच्छन्) अरे ! अरे ! सर्वं सम्भाषणं शृण्वन्नेवाहम् अत्रागच्छम् । अहं विशालकाय:, बलशाली पराक्रमी च । सिंहः वा स्यात् अथवा अन्यः कोऽपि, वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि । किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी । अत: अहमेव योग्य: वनराजपदाय ।

वानरः - अरे ! अरे ! एवं वा (शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति)

**एकपदेन उत्तरत :-**

1. कः समीपतः आगच्छन् वदति ?
2. कयो: सम्भाषणं श्रुत्वा गजः आगच्छति ?
3. गजः कुतः आगच्छन् वदति ?

**पूर्णवाक्येन उत्तरत :-**

1. गजः कीदृशं जन्तुं स्वशुण्डेन पोथयित्वा मारयिष्यामि इति उक्तवान् ?
2. गजः किं कुर्वन् पिककाकयो: समीपम् आगच्छति ?
3. अरे ! अरे ! एवं वा ? इति कः प्रश्नं करोति ?

**निर्देशानुसारम् उत्तरत :-**

1. किमन्यः कोऽप्यस्ति एतादृशः पराक्रमी - अत्र विशेषणपदं किम् ?
2. अयोग्य: इत्यस्य विलोमपदं किम् ?

**अभ्यासप्रश्ना: (एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते )**

1. वानरः किं कृतवान् ?
2. वानरः कस्य पुच्छं विधूय वृक्षम् आरोहति ?
3. गज: वनराजपदाय कः योग्य: इति वदति ?
4. वानरः गजस्य पुच्छं विधूय कुत्र आरोहति ?
5. गज: केन पोथयित्वा मारयिष्यति ?

**अनुच्छेदः - 10**

(गजः तं वृक्षमेव स्वशुण्डेन आलोडयितुमिच्छति परं वानरस्तु कुर्दित्वा अन्यं वृक्षमारोहति । एवं गजं वृक्षात् वृक्षं प्रति धावन्तं दृष्ट्वा सिंहः अपि हसति वदति च)

सिंहः - भो: गज ! मामप्येवमेवातुदन् एते वानराः ।

वानरः - एतस्मादेव तु कथयामि यदहमेव योग्यः वनराजपदाय येन विशालकायं पराक्रमिणं भयङ्करं चापि सिंह गजं वा पराजेतुं समर्था अस्माकं जाति: । अत: वन्यजन्तूनां रक्षायै वयमेव क्षमाः ।

**एकपदेन उत्तरत :-**

1. गजः वृक्षं केन आलोडयितुम् इच्छति ?
2. कः कूर्दित्वा अन्यं वृक्षम् आरोहति ?
3. कः हसति ?

**पूर्णवाक्येन उत्तरत :-**

1. गज: किम् इच्छति ?
2. सिंहः किं दृष्ट्वा हसति ?
3. वृक्षात् वृक्षं प्रति कः धावति ?

**निर्देशानुसारम् उत्तरत :-**

1. कपि: - इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
2. धावन्तम् - इत्यस्य विशेषणपदं किम् ?

**अभ्यासप्रश्ना: ( एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते )**

1. वानराणां जाति: कं पराजेतुं समर्था ?
2. वानराणां जातिः कीदृशं सिंहं गजं वा पराजेतुं समर्था ?
3. केषां रक्षायै वानराः समर्थाः ?
4. वन्यजन्तूनां रक्षायै वयमेव क्षमाः इति कः वदति ?
5. माम् अपि एवम् एव अतुदन् एते इति कः वदति ?
6. भो: गज ! इति कः सम्बोधनं करोति ?

**अनुच्छेदः - 11**

बकः - अरे! अरे! मां विहाय कथमन्यः कोऽपि राजा भवितुमर्हति। अहं तु शीतले जले बहुकालपर्यन्तम् अविचल: ध्यानमग्नः स्थितप्रज्ञः इव स्थित्वा सर्वेषां रक्षायाः उपायान् चिन्तयिष्यामि, योजनां निर्मीय च स्वसभायां विविधपदमलंकुर्वाणैः जन्तुभिश्च मिलित्वा रक्षोपायान् क्रियान्वितान् कारयिष्यामि, अतः अहमेव वनराजपदप्राप्तये योग्यः।

मयूरः - *(वृक्षोपरित:-अट्टहासपूर्वकम्)* विरम विरम आत्मश्लाघायाः किं न जानासि यत्-

यदि न स्यान्नरपति: सम्यङ्नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥

को न जानाति तव ध्यानावस्थाम् ? 'स्थितप्रज्ञ:' इति व्याजेन वराकान् मीनान् छलेन अधिगृह्य क्रूरतया भक्षयसि। धिक् त्वाम्। तव कारणात् तु सर्वं पक्षिकुलमेवावमानितं जातम्।

**क) एकपदेन उत्तरत।**

1. कः शीतले जले तिष्ठति ?
2. कीदृशी नौका जलधौ विप्लवेत ?
3. कस्य कारणात् सर्वं पक्षिकुलम् अवमानितं जातम् ?

**ख) पूर्णवाक्येन उत्तरत।**

1. कः ध्यानमग्नः स्थितप्रज्ञः इव तिष्ठति ?
2. बकः केषां रक्षायाः उपायान् चिन्तयिष्यति ?
3. बकः कीदृशान् मीनान् भक्षयति ?

**ग) निर्देशानुसारम् उत्तरत।**

1. विना इत्यर्थे अत्र किं पदं प्रयुक्तम् ?
2. चिन्तयिष्यामि इति क्रियापदस्य कर्तृपदं किम् ?
3. ध्यानमग्न: स्थितप्रज्ञ: - अत्र विशेषणपदं किम् ?

**अनुच्छेदः - 12**

वानरः- (सगर्वम्) अत एव कथयामि यत् अहमेव योग्यः वनराजपदाय। शीघ्रमेव मम राज्याभिषेकाय तत्पराः भवन्तु सर्वे वन्यजीवाः।

मयूरः- अरे वानर! तूष्णीं भव। कथं त्वं योग्य: वनराजपदाय ? पश्यतु पश्यतु मम शिरसि राजमुकुटम् इव शिखां स्थापयता विधात्रा एवाहं पक्षिराजः कृतः, अतः वने निवसन्तं मां वनराजरूपेणापि द्रष्टुं सज्जाः भवन्तु अधुना। यतः कथं कोऽप्यन्यः विधातुः निर्णयम् अन्यथाकर्तुं क्षमः।

काकः - (सव्यङ्ग्यम्) अरे अहिभुक्! नृत्यातिरिक्तं का तव विशेषता यत् त्वां वनराजपदाय योग्यं मन्यामहे वयम्।

मयूर: - यतः मम नृत्यं तु प्रकृतेः आराधना। पश्य! पश्य! मम पिच्छानामपूर्वं सौन्दर्यम्। (पिच्छानुद्घाट्य नृत्यमुद्रायां स्थितः सन्) न कोऽपि त्रैलोक्ये मत्सदृशः सुन्दरः। वन्यजन्तूनामुपरि आक्रमणं कर्तारं तु अहं स्वसौन्दर्येण नृत्येन च आकर्षितं कृत्वा वनात् बहिष्करिष्यामि। अतः अहमेव योग्यः वनराजपदाय।

**क) एकपदेन उत्तरत ।**

1. कस्य शिरसि राजमुकुटम् अस्ति ?
2. मयूरम् अहिभुक् इति कः सम्बोधयति ?
3. कस्य पिच्छानां सौन्दर्यम् अपूर्वम् ?
4. नृत्यमुद्रायां कः तिष्ठति ?

**ख) पूर्णवाक्येन उत्तरत ।**

1. काकः मयूरं किं वदति ?
2. मयूरस्य नृत्यं कस्याः आराधना भवति ?
3. केन मयूरः पक्षिराजः कृतः ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. असुन्दर: इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
2. बहिष्करिष्यामि इति क्रियापदस्य कर्तृपदं किम् ?
3. पूजा इत्यर्थे किं पदमत्र प्रयुक्तम् ?

**अनुच्छेदः - 13**

(एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एतं विवादं श्रृणुतः वदतः च)

व्याघ्रचित्रकौ - अरे किं वनराजपदाय सुपात्रं चीयते? एतदर्थं तु आवामेव योग्यौ। यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या।

सिंहः - तूष्णीं भव भोः। युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ। एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते । अत एव विचारविमर्श: प्रचलति।

बकः - सर्वथा सम्यगुक्तं सिंहमहोदयेन। वस्तुतः एव सिंहेन बहुकालपर्यन्तं शासनं कृतम् परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाशः एव नास्ति।

सर्वे पक्षिणः - (*उच्चैः*) आम् आम् कश्चित् खगः एव वनराजः भविष्यति इति।

( परं कश्चिदपि खगः आत्मानं विना नान्यं कमपि अस्मै पदाय योग्यं चिन्तयति तर्हि कथं निर्णय*:* भवेत् तदा तैः सर्वैः गहननिद्रायां निश्चिन्तं स्वपन्तम् उलूकं वीक्ष्य विचारितं यदेषः आत्मश्लाघाहीनः पदनिर्लिप्तः उलूकः एवास्माकं राजा भविष्यति। परस्परमादिशन्ति च तदानीयन्तां नृपाभिषेकसम्बन्धिनः सम्भाराः इति।)

**क) एकपदेन उत्तरत ।**

1. कौ नदीजलं पातुम् आगतौ ?

2. कः वदति "सम्यगुक्तम् सिंहमहोदयेन" ?

3. केन बहुकालपर्यन्तं शासनं कृतम् ?

**ख) पूर्णवाक्येन उत्तरत ।**

1. सर्वे पक्षिणः किं वदन्ति ?

2. कः राजेति निश्चेतव्यम् ?

3. व्याघ्रचित्रकौ किं कथयति ?

4. कौ सिंहसदृशौ भक्षकौ ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. खगः एव वनराजः भविष्यति - अत्र कर्तृपदं किम् ?

2. स्वपन्तम् उलूकम् - अत्र विषेष्यपदं किम् ?

3. काननराज: - इत्यर्थे किं पदमत्र प्रयुक्तम् ?

**अनुच्छेदः - 14**

सर्वे पक्षिणः - सज्जायै गन्तुमिच्छन्ति तर्हि सहसा एव-

काकः - *(अट्टहासपूर्णोन-स्वरेण)* सर्वथा अयुक्तमेतत् यन्मयूर-हंस-कोकिल चक्रवाक-शुक-सारसादिषु पक्षिप्रधानेषु विद्यमानेषु दिवान्धस्यास्य करालवक्त्रस्याभिषेकार्थं सर्वे सज्जाः । पूर्णं दिनं यावत् निद्रायमाण: एषः कथमस्मान् रक्षिष्यति । वस्तुतस्तु-

स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम् ।
उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति ।।

**क) एकपदेन उत्तरत ।**

1. कः दिवान्धः अस्ति ?

2. कः करालवक्त्र: अस्ति ?

3. पूर्णं दिनं यावत् निद्रायमाणः क: ?

**ख) पूर्णवाक्येन उत्तरत ।**

1. काकः केन स्वरेण कथयति ?

2. उलूकस्य स्वभावः कीदृशः अस्ति ?

3. कम् नृपतिं कृत्वा सिद्धिः भविष्यति ?

**ग) निर्देशानुसारम् उत्तरत।**

1. अपूर्णम् इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
2. एषः कथमस्मान् रक्षिष्यति - अत्र क्रियापदं किम् ?
3. शीघ्रम् - इत्यर्थे किं पदमत्र प्रयुक्तम् ?

**अनुच्छेदः - 15**

(ततः प्रविशति प्रकृतिमाता)

प्रकृतिमाता - (सस्नेहम्) भो: भोः प्राणिनः। यूयम् सर्वे एव मे सन्ततयः। कथं मिथः कलहं कुरुथ। वस्तुतः सर्वे वन्यजीविनः अन्योन्याश्रिताः। सदैव स्मरत-

ददाति प्रतिगृह्णाति, गुह्यमाख्याति पृच्छति।
भुङ्क्ते भोजयते चैव षड्-विधं प्रीतिलक्षणम्।।

(सर्वे प्राणिनः समवेतस्वरेण)

मातः! कथयति तु भवती सर्वथा सम्यक् पर वयं भवतीं न जानीमः। भवत्याः परिचयः कः?

प्रकृतिमाता - अहं प्रकृतिः युष्माकं सर्वेषां जननी। यूयं सर्वे एव मे प्रियाः। सर्वेषामेव मत्कृते महत्त्वं विद्यते यथासमयम्। न तावत् कलहेन समयं वृथा यापयन्तु अपि तु मिलित्वा एव मोदध्वं जीवनं च रसमयं कुरुध्वम्।

**क) एकपदेन उत्तरत।**

1. का: प्रकृतिमातुः सन्ततयः ?
2. के मिथः कलहं कुर्वन्ति ?
3. कति विधं प्रीतिलक्षणम् ?
4. का सर्वेषां जननी ?
5. किम् रसमयं कुरुध्वम् ?

**ख) पूर्णवाक्येन उत्तरत।**

1. के अन्योन्याश्रिताः ?
2. प्राणिनः केन समयं वृथा यापयन्ति ?
3. प्रीतेः लक्षणानि कानि ?

**ग) निर्देशानुसारम् उत्तरत।**

1. मिलित्वा एव मोदध्वम् - अत्र मोदध्वम् इति क्रियापदस्य कर्तृपदं किम् ?
2. जनक: इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?
3. कथं मिथः कलहं कुरुथ - अत्र क्रियापदं किम् ?

**अनुच्छेदः - 16**

तद्यथा कथितम्-

प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम् ।
नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥

अपि च

अगाधजलसञ्चारी न गर्वं याति रोहितः ।
अङ्गुष्ठोदकमात्रेण शफरी फुर्फुरायते ॥

**क) एकपदेन उत्तरत ।**

1. प्रजा सुखे कस्य हितं विद्यते ?
2. राज्ञः सुखं कुत्र भवति ?
3. कासां हिते हितम् ?

**ख) पूर्णवाक्येन उत्तरत ।**

1.कासां हिते राज्ञः हितम् ?
2. केन शफरी फुर्फुरायते ?
3.अगाधजलसञ्चारी कः गर्वं न याति ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. अहितम् इत्यस्य किं विलोमपदं प्रयुक्तम् ?
2. अगाधसञ्चारी इत्यस्य किं विशेष्यदम् अत्र प्रयुक्तम् ?
3. शफरी इति कर्तृपदस्य क्रियापदं किम् ?

**अनुच्छेदः - 17**

अत: भवन्तः सर्वेऽपि शफरीवत् एकैकस्य गुणस्य चर्चां विहाय, मिलित्वा प्रकृतिसौन्दर्याय वनरक्षायै च प्रयतन्ताम् । सर्वे प्रकृतिमातरं प्रणमन्ति मिलित्वा दृढसंकल्पपूर्वकं च गायन्ति-

प्राणिनां जायते हानिः परस्परविवादतः ।
अन्योन्यसहयोगेन लाभस्तेषां प्रजायते ॥

**क) एकपदेन उत्तरत ।**

1. परस्परविवादतः केषां हानिः जायते ?
2. प्राणिनां लाभः केन प्रजायते ?
3. कस्य गुणस्य चर्चा विहाय, मिलित्वा प्रकृतिसौन्दर्याय वनरक्षायै च प्रयतन्ताम् ?

**ख) पूर्णवाक्येन उत्तरत ।**

1. सर्वे कां प्रणमन्ति ?

2. सर्वे शफरीवत् किम् कुर्वन्ति ?

3.सर्वे मिलित्वा किमर्थं प्रयतन्ताम् ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. सर्वे प्रकृतिमातरं प्रणमन्ति - अत्र क्रियापदं किम् ?

2. दोषस्य इत्यस्य किं विपरीतपदम् अत्र प्रयुक्तम् ?

3. विना अत्यर्थे अत्र किं पदं प्रयुक्तम् ?

**सन्धिं वा सन्धिविच्छेदं वा कुरुत ।**

| | | | | |
|---|---|---|---|---|
| 1. इतस्ततः | | | = | ____________________ |
| 2. ध्वनिः | + | अस्ति | = | ____________________ |
| 3. यदहम् | | | = | __________ + ________ |
| 4. यदेषः | | | = | __________ + ________ |
| 5. सम्यक् | + | नेता | = | ____________________ |
| 6. एतत् | + | अर्थम् | = | ____________________ |
| 7. वस्तुतस्तु | | | = | __________ + ________ |
| 8. यत् | + | मयूरः | = | ____________________ |

**समस्तपदं विग्रहवाक्यं वा लिखत ।**

| | | |
|---|---|---|
| 1. हर्षेण मिश्रितम् । | = | ________________________ |
| 2. विशालःकायःयस्य सः । | = | ________________________ |
| 3. साट्टहासम् | = | ________________________ |
| 4. पक्षिसम्राट् | = | ________________________ |
| 5. स्थिता प्रज्ञा यस्य सः । | = | ________________________ |
| 6. वनराजः | = | ________________________ |

**प्रकृतिप्रत्ययविभागं कुरुत ।**

| | | |
|---|---|---|
| 1. महत्वम् | = | _____________ + ___________ |
| 2. सत्यप्रियता | = | _____________ + ___________ |

# सप्तमः पाठः - उत्तरकुञ्चिका

**अनुच्छेदः - 1**

**एकपदेन उत्तरत।**

1. वनस्य 2. नदी 3. समीपे।

**पूर्णवाक्येन उत्तरत।**

1. सिंहः विश्रामं करोति।
2. यदा एकः सिंहः सुखेन विश्रामं करोति तदा एव एकः वानरः पुच्छं धुनाति।
3. अपरः वानरः वृक्षोपरि आरोहति।

**निर्देशानुसारम् उत्तरत।**

1. वानरः 2. अन्यस्मात्

**अभ्यासप्रश्नाः (एकपदेन / पूर्णवाक्येन वा उत्तरं दातुं शक्यते)।**

1. एकः वानरः सिंहस्य पुच्छं कम्पयति।
2. वानरः आरोहणं कृतवान्।
3. वानरः वृक्षम् आरूढवान्।
4. वानरः कूर्दित्वा वृक्षम् आरूढवान्।
5. अपरः वानरः कर्णम् आकृष्य वृक्षोपरि आरोहति।
6. अपरः वानरः सिंहस्य कर्णम् आकृष्य वृक्षोपरि आरोहति।
7. अपरः वानरः अन्यस्मात् वृक्षात् सिंहस्य कर्णम् आकृष्य वृक्षोपरि आरोहति।
8. सिंहः वानरं प्रहर्तुम् इच्छति।

**अनुच्छेदः - 2**

**एकपदेन उत्तरत।**

1. सिंहः 2. क्रुद्धः 3. प्रहर्तुम्

**पूर्णवाक्येन उत्तरत।**

1. क्रुद्धः सिंहः वानरं प्रहर्तुम् इच्छति।
2. सिंहः असमर्थः एव तिष्ठति।
3. विविधाः पक्षिणः हर्षमिश्रितं कलरवं कुर्वन्ति।

**निर्देशानुसारम् उत्तरत।**

1. पक्षिणः 2. हर्षमिषितम्

**अभ्यासप्रश्नाः।**

1. वानराः सिंहं पीडयन्ति।
2. वानराः सिंहं पीडयन्ति।

3. वानराः हसन्ति ।

4. पक्षिणः कलरवं कुर्वन्ति ।

5. विविधाः पक्षिणः कलरवं कुर्वन्ति ।

6. वृक्षोपरि विविधाः पक्षिणः हर्षमिश्रितं कलरवं कुर्वन्ति ।

7. वृक्षोपरि विविधाः पक्षिणः सिंहस्य दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ।

8. वृक्षोपरि विविधाः पक्षिणः सिंहस्य दशां दृष्ट्वा हर्षमिश्रितं कलरवं कर्वन्ति ।

**अनुच्छेदः - 3**

**एकपदेन उत्तरत ।**

1. सिंहः 2. सिंहः 3.गर्जन्

**पूर्णवाक्येन उत्तरत ।**

1. सिंहः आत्मनः दूरवस्थया श्रान्तः भूत्वा सर्वजन्तून दृष्ट्वा निद्राभङ्ग दुःखेन पृच्छति ।

2. सिंहः एतादृश्या दुरवस्थया श्रान्तः भूत्वा पृच्छति ।

3. सिंहः क्रोधेन गर्जन् "अहं वनराजः । किं भयं न जायते ?" इति पृच्छति ।

**निर्देशानुसारम् उत्तरत ।**

1. पृच्छति 2. दुरवस्थया

**अभ्यासप्रश्नाः ।**

1. सिंहः वनराजः सन् अपि तुच्छजीवैः कृतया दुरवस्थया श्रान्तः भूत्वा पृच्छति ।

2. सिंहः आत्मनः दुरवस्थया श्रान्तः भूत्वा पृच्छति ।

3. सिंहः आत्मनः दरवस्थया श्रान्तः भूत्वा सर्वजन्तून् दृष्ट्वा पृच्छति ।

4. सिंहः पृच्छति ।

5. सिंहः क्रोधेन गर्जन् पृच्छति ।

6. सिंहः श्रान्तः अस्ति ।

**अनुच्छेदः - 4**

**एकपदेन उत्तरत ।**

1. वानरः 2. भक्षकः 3. सिंहः

**पूर्णवाक्येन उत्तरत ।**

1. राजा तू रक्षकः भवति परं भवान् भक्षकः अस्ति इति एकः वानरः वदति ।

2. यतः त्वं सर्वथा वनराजः भवितुं तु अयोग्यः इति एकः वानरः वदति ।

3. यः परैः पीड्यमानान् वित्रस्तान् जन्तून् न रक्षति सः पार्थिवरूपेण कृतान्तः भवति ।

**निर्देशानुसारम् उत्तरत ।**

1. भक्षकः 2. पार्थिवः

**अभ्यासप्रश्नाः ।**

1. किं न श्रुता त्वया पञ्चतन्त्रोक्तिः ? इति अन्यः वानरः वदति ।
2. यः परैः पीड्यमानान् भीतान् जन्तून् न रक्षति सः यमराजः भवति ।
3. कथम् अस्मान् रक्षिष्यसि इति एकः वानरः पृच्छति ।

**अनुच्छेदः - 5**

**एकपदेन उत्तरत ।**

1. काकः 2. वानरेण 3. पिकः

**पूर्णवाक्येन उत्तरत ।**

1. कथं त्वं योग्यः वनराजः भवितुम् ? इति पिकः पृच्छति ।
2. कथं त्वं योग्यः वनराजः भवितुम् ? इति पिकः काकं पृच्छति ।
3. काकः कृष्णवर्णीयः मेध्यामध्यभक्षकः च भवति ।

**निर्देशानुसारम् उत्तरत ।**

1. अमेध्यः 2. वयम्

**अभ्यासप्रश्नाः ।**

1. काकः कर्कशध्वनिना वातावरणम् आकुलीकरोति ।
2. काकस्य रूपं ध्वनिः च न अस्ति इति पिकः वदति ।
3. काकः मेध्यामध्यस्य भक्षणं करोति ।
4. काकः कृष्णवर्णीयः मेध्यामध्यभक्षकः च भवति ।
5. त्वां कथं वनराजं मन्यामहे वयम् - इति पिकः वदति ।

**अनुच्छेदः - 6**

**एकपदेन उत्तरत ।**

1. काकः 2. पिकम् 3. काकचेष्टः

**पूर्णवाक्येन उत्तरत ।**

1. जनः अनृतं वदति चेत् काकः दशति ।
2. काकानां परिश्रमः ऐक्यं च विश्वप्रसिद्धम् ।
3. काकस्य सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा ।

**निर्देशानुसारम् उत्तरत ।**

1. अनृतम् 2. विद्यार्थी

**अनुच्छेदः - 7**

**एकपदेन उत्तरत ।**

1. पिकः 2. काकम् 3. पिकः

**पूर्णवाक्येन उत्तरत।**

1. काकः कृष्णवर्णीय:भवति।

2. पिकस्य वर्ण: कृष्ण: भवति।

3. पिककाकयोः भेदः वसन्तसमये ज्ञायते।

**निर्देशानुसारम् उत्तरत।**

1. पिक: 2. कृष्ण:

**अनुच्छेद: - 8**

1. कोकिलस्य कृते 2. काक: 3. काकाय

**पूर्णवाक्येन उत्तरत।**

1. कोकिलस्य सन्ततिं काक: पालयति।

2. काकः करुणापरः अस्ति अतः सः पक्षिसम्राट् भवितुं योग्यः इति वदति।

3. रे परभृत् इति काक: पिकं संबोधयति

**निर्देशानुसारम् उत्तरत।**

1. परभृत्! 2. पक्षिसम्राट्

**अनुच्छेद: - 9**

**एकपदेन उत्तरत।**

1. गज: 2. पिक-काकयो: 3. समीपत:

**पूर्णवाक्येन उत्तरत।**

1. गजः वन्यपशून् तुदन्तं जन्तुं स्वशुण्डेन पोथयित्वा मारयिष्यामि इति उक्तवान्।

2. गज: पिककाकयोः सर्वं सम्भाषणं शृण्वन् समीपम् आगच्छति।

3. अरे ! अरे ! एवं वा ? इति वानरः प्रश्नं करोति।

**निर्देशानुसारम् उत्तरत।**

1. एतादृश: 2. योग्य:

**अभ्यासप्रश्ना: ।**

1. वानरः शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहणं कृतवान्।

2. वानरः गजस्य पुच्छं विधूय वृक्षम् आरोहति।

3. "अहम् एव वनराजपदाय योग्यः" इति गजः वदति।

4. वानरः गजस्य पुच्छं विधूय वृक्षोपरि आरोहति।

5. गज: स्वशुण्डेन पोथयित्वा मारयिष्यति।

**अनुच्छेदः - 10**

**एकपदेन उत्तरत ।**

1. स्वशुण्डेन 2. वानरः 3. सिंहः

**पूर्णवाक्येन उत्तरत ।**

1. गजः वृक्षम् एव स्वशुण्डेन आलोडयितुम् इच्छति ।

2. सिंहः वृक्षात् वृक्षं प्रति धावन्तं गजं दृष्ट्वा हसति ।

3. वृक्षात् वृक्षं प्रति गज: धावति ।

**निर्देशानुसारम् उत्तरत ।**

1. वानर: 2. गजम्

**अभ्यासप्रश्नाः ।**

1. वानराणां जाति: सिंहं गजं वा पराजेतुं समर्था ।

2. वानराणां जाति: विशालकायं पराक्रमिणं भयङ्करं च सिंहं गजं वा पराजेतुं समर्था ।

3. वन्यजन्तूनां रक्षायै वानराः समर्थाः ।

4. वन्यजन्तूनां रक्षायै वयमेव क्षमाः इति वानरः वदति ।

5. माम् अपि एवम् एव अतुदन् एते इति सिंह: वदति ।

6. भो: गज ! इति सिंहः सम्बोधनं करोति ।

**अनुच्छेदः - 11**

**एकपदेन उत्तरत ।**

1. बकः, 2. अकर्णधारा, 3. बकस्य

**पूर्णवाक्येन उत्तरत ।**

1.बकः ध्यानमग्नः स्थितप्रज्ञः इव तिष्ठति ।

2.बकः सर्वेषां रक्षायाः उपायान् चिन्तयिष्यति ।

3.बकः वराकान् मीनान् भक्षयति ।

**निर्देशानुसारम् उत्तरत ।**

1. विहाय 2. अहम् 3. ध्यानमग्न:

**अनुच्छेदः - 12**

**एकपदेन उत्तरत ।** 1. मयूरस्य 2. बकः 3. मयूराणाम् 4. बकः

**पूर्णवाक्येन उत्तरत ।**

1.काकः मयूरं प्रति एवं वदति - नृत्यातिरिक्तं का तव विशेषता इति ।

2. मयूरस्य नृत्यं प्रकृतेः आराधना भवति ।

3.विधात्रा मयूरं पक्षिराजः कृतः ।

**निर्देशानुसारम् उत्तरत।**

1. सुन्दरः 2. अहम् 3. आराधना

**अनुच्छेदः - 13**

**एकपदेन उत्तरत।**

1.व्याघ्रचित्रकौ 2.बकः 3.सिंहेन

**पूर्णवाक्येन उत्तरत।**

1.कश्चित् खगः एव वनराजः भविष्यति इति सर्वे पक्षिणः वदन्ति।

2.कोऽपि पक्षिः राजेति निश्चेतव्यम्।

3.अग्रे किं वनराजपदाय सुपात्रं ------- सर्वसम्मत्या। इति व्याघ्रचित्रकौ कथयतः।

4.व्याघ्रचित्रकौ सिंहसदृशौ भक्षकौ स्तः।

**निर्देशानुसारम् उत्तरत।**

1. खगः 2. उलूकम् 3. वनराजः

**अनुच्छेदः - 14**

**एकपदेन उत्तरत।**

1.उलूकः 2.उलूकः 3. उलूकः

**पूर्णवाक्येन उत्तरत।**

1. काकः अट्टहासपूर्णेन स्वरेण कथयति।

2. रौद्रं, उग्रं, क्रूरम्, अप्रियवादि।

3. उलूकं नृपतिं कृत्वा सिद्धिः भविष्यति।

**निर्देशानुसारम् उत्तरत।**

1. पूर्णम् 2. रक्षिष्यति 3. सहसा

**अनुच्छेदः - 15**

**एकपदेन उत्तरत।**

1. प्राणिनः 2. प्राणिनः 3. षड्विधम् 4. प्रकृतिः 5. जीवनम्

**पूर्णवाक्येन उत्तरत।**

1. सर्वे वन्यजीविनः अन्योन्याश्रिताः।

2. प्राणिनः कलहेन समयं वृथा यापयन्ति।

3. ददाति, प्रतिगृह्णाति, गुह्यमाख्याति- पृच्छति, भुङ्क्ते, योजयते च।

**निर्देशानुसारम् उत्तरत।**

1. यूयम् 2. जननी 3. कुरुथ

**अनुच्छेदः - 16**

**एकपदेन उत्तरत ।**

1.राज्ञः 2.प्रजासुखे 3. प्रजानाम्

**पूर्णवाक्येन उत्तरत ।**

1.प्रजानां हिते राज्ञः हितम् ।

2.अङ्गुष्ठोदकमात्रेण शफरी फुर्फुरायते ।

3.अगाधजलसंचारी रोहितः गर्वं न याति ।

**निर्देशानुसारम् उत्तरत ।**

1. हितम् 2. रोहित: 3. फुर्फुरायते

**अनुच्छेदः - 17**

**एकपदेन उत्तरत ।**

1. प्राणिनां 2.अन्योन्यसहयोगेन 3. एकैकस्य

**पूर्णवाक्येन उत्तरत ।**

1. सर्वे मातरं प्रणमन्ति ।

2. सर्वे शफरीवत् एकैकस्य गुणस्य चर्चां कुर्वन्ति ।

3. सर्वे मिलित्वा प्रकृतिसौन्दर्याय वनरक्षायै प्रयतन्ताम् ।

**निर्देशानुसारम् उत्तरत ।**

1. प्रणमन्ति 2. गुणस्य 3. विहाय

**सन्धिं वा सन्धिविच्छेदं वा कुरुत** ।

1. इत: + तत: 2. ध्वनिरस्ति 3.यत् + अहम् 4. यत् + एष:

5. सम्यङ्नेता 6. एतदर्थम् 7. वस्तुत: + तु 8. यन्मयूर:

**समस्तपदं विग्रहवाक्यं वा लिखत ।**

1. हर्षमिश्रितम् 2. विशालकाय: 3. अट्टहासेन सहितम्

4. पक्षिणां सम्राट् 5. स्थितप्रज्ञ: 6. वनस्य राजा

**प्रकृतिप्रत्ययविभागं कुरुत ।**

1. महत् + त्व 2. सत्यप्रिय + तल्

# अष्टमः पाठः

# विचित्रः साक्षी

## अष्टमः पाठः - विचित्रः साक्षी

विचित्रः = आश्चर्यजनकः / विस्मयकरः । वस्तुतः जीवन् नरः साक्षी ,परन्तु अस्मिन् पाठे निर्दिष्टः साक्षी एकः शवः अस्ति अतः सः साक्षी विचित्रः इति कथितः ।

### पाठान्तर्गतं सन्धिकार्यम्

- कः + चन = कश्चन
- निर्धनः + जन = निर्धनो जनः
- सफलः + जातः = सफलो जातः
- तत्र + एव = तत्रैव
- व्याकुलः + जातः = व्याकुलो जातः
- पदातिः + एव = पदातिरेव
- स पिता = सः + पिता
- समयोऽपि = समयः + अपि
- प्रबुद्धोऽतिथिः = प्रबुद्धः + अतिथिः
- चौरोऽयम् = चौरः + अयम्
- मत्वा + अभर्त्सयन् = मत्वाभर्त्सयन्
- यदि + अपि = यद्यपि
- चौरः + अयम् = चौरोऽयम्
- ततः + असौ = ततोऽसौ
- तदा + एव = तदैव
- केन + अपि = केनापि
- तत्र + उपेत्य = तत्रोपेत्य
- सुपुष्टदेहः + आसीत् = सुपुष्टदेह आसीत्

- मुदित + आरक्षीः = मुदितः + आरक्षी
- त्वया + अहम् = त्वयाहम्
- पुनः + तौ = पुनस्तौ
- सः + शवः = स शवः
- अतः + एव = अत एव
- एव + उच्यते = एवोच्यते

**समासः**

| | | |
|---|---|---|
| ➢ निर्गतं धनं यस्मात् सः | - निर्धनः | (बहूव्रीहि) |
| ➢ स्वस्य पुत्रः स्वपुत्रः, तम् | - स्वपुत्रम् | (द्वितीया तत्पुरुषः) |
| ➢ तस्य तनयः | - तत्तनयः | (षष्ठीतत्पुरुषः ) |
| ➢ छात्राणाम् आवासः तस्मिन् | - छात्रावासे | (षष्ठीतत्पुरुषः) |
| ➢ महान् च असौ विद्यालयः तस्मिन् | - महाविद्यालये | (कर्मधारयः) |
| ➢ तन्वाः जायते इति तनूजः तस्य | - तनूजस्य | (षष्ठीतत्पुरुषः) |
| ➢ अर्थस्य कार्श्यम् | - अर्थकार्श्यम् | (षष्ठीतत्पुरुष) |
| ➢ निशायाः अन्धकारः निशान्धकारः तस्मिन् | - निशान्धकारे | (षष्ठीतत्पुरुष) |
| ➢ पद्भ्यां यात्रा | - पदयात्रा | (तृतीयातत्पुरुषः) |
| ➢ रात्रौ निवासः | - रात्रिनिवासः | (सप्तमीतत्पुरुषः) |
| ➢ गृहे तिष्ठति इति | - गृहस्थः | (उपपदसमासः) |
| ➢ करुणायां परः | - करुणापरः | (सप्तमी तत्पुरुषः) |
| ➢ करुणा परा यस्य सः | - करुणापरः | (बहूव्रीहि ) |
| ➢ दैवस्य गतिः | - दैवगतिः | (षष्ठीतत्पुरुषः) |
| ➢ गृहस्य अभ्यन्तरम् | - गृहाभ्यन्तरम् | (षष्ठी तत्पुरुषः) |
| ➢ पादयोः ध्वनिः पादध्वनिः, तेन | - पादध्वनिना | (षष्ठी तत्पुरुषः) |
| ➢ चौरस्य शङ्का चौरशङ्का,तया | - चौर्यशङ्कया | (षष्ठी तत्पुरुषः) |

- तारः च असौ स्वरःच तेन - तारस्वरेण (कर्मधारयः)
- ग्रामे वसन्ति इति - ग्रामवासी (उपपदसमासः)
- रक्षायै पुरुषः - रक्षापुरुषः (चतुर्थी तत्पुरुषः
- चैर्यस्य अभियोगः - चौर्याभियोगः (षष्ठीतत्पुरुषः)
- न्यायस्य अधीशः - न्यायाधीशः (षष्ठीतत्पुरुषः)
- प्रमाणस्य अभावः - प्रमाणाभावः (षष्ठीतत्पुरुषः)
- मृतं च तत् शरीरम् च - मृतशरीरम् (कर्मधारयः)
- राज्ञः मार्गः - राजमार्गः (षष्ठीतत्पुरुषः)
- काष्ठस्य पटलम् - काष्ठपटलम् (षष्ठीतत्पुरुषः)
- पटेन आच्छादितम् - पटाच्छादितम् (तृतीयातत्पुरुषः)
- न्यायस्य अधिकरणम् - न्यायाधिकरणम् (षष्ठीतत्पुरुषः)
- सुपुष्टः देहः यस्य सः - सुपुष्टदेहः (बहुव्रीहिः)
- तस्य कृते - तत्कृते (षष्ठीतत्पुरुषः)
- निजं कृत्यम् - निजकृत्यम् (कर्मधारयः)
- मान्येषु वरः - मान्यवरः ( सप्तमीतत्पुरुषः)

## विचित्रः साक्षी

पठितावबोधनाभ्यासाय प्रश्नोत्तराणि

**अनुच्छेदः - 1**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चित् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत् । एकदा स: पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः । परमर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत् ।

**i) एकपदेन उत्तरत ।**

1. निर्धनः जनः भूरि परिश्रम्य किञ्चित् किम् उपार्जितवान् ?
2. निर्धनस्य पुरुषस्य पुत्रः छात्रावासे कुत्र संलग्नः अभवत् ?
3. कस्य रुग्णतां ज्ञात्वा निर्धनः व्याकुलो जातः ?
4. निर्धनो जनः कं द्रष्टुं पद्भ्यां प्रस्थितवान् ?
5. अर्थकार्श्येन पीडितः कः ?
6. किम् विहाय निर्धनो जनः पद्भ्यां गन्तुं निश्चितवान् ?
7. केन पीडितः सः निर्धनो जनः बस्यानं त्यक्तवान् ?
8. कः प्राचलत् ?
9. कस्य तनयः छात्रावासे वसति ?
10. कः व्याकुलो जातः ?

**ii) पूर्णवाक्येन उत्तरं लिखत ।**

1. निर्धनो जनः कुत्र सफलो जातः ?
2. किमर्थं निर्धनो जनः पुत्रं द्रष्टुं गतवान् ?
3. किमर्थं निर्धनो जनः पद्भ्याम् गतवान् ?

**iii) निर्देशानुसारम् उत्तरं लिखत ।**

1 'पुत्रस्य' इत्यर्थे अनुच्छेदे किं पर्यायपदं प्रयुक्तम् ?
2 'निर्धनो ' इत्यस्य पदस्य किं विशेष्यपदम् अत्र प्रयुक्तम् ?
3 'पीडितः सः'अनयोः विशेषणपदं किम् ?
4 'तनयम्' इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम् ?
5 'प्राचलत्' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

**अनुच्छेदः - 2**

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत् । "निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा, एवं विचार्य सः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपगतः । करुणापरो गृही तस्मै आश्रयं प्रायच्छत् । विचित्रा खलु दैवगतिः । तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः । चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौर्यशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत । चौरः एव उच्चैः क्रोशितुम् आरभत "चौरोऽयम् चौरोऽयम्" इति । तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन् । यद्यपि ग्रामस्य आरक्षी एव चौर: आसीत् । तत्क्षणमेव राजपुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागारे प्राक्षिपत् ।

**i) एकपदेन उत्तरं लिखत ।**

1. का विचित्रा ?
2. रात्रिनिवासं कर्तुं निर्धनः कम् उपागतः ?
3. गृही कीदृशः आसीत् ?
4. करुणापरः गृही कस्मै आश्रयं प्रायच्छत् ?
5. चौरः कुत्र प्रविष्टः ?
6. चौरः गृहात् काम् आदाय पलायितः ?
7. अतिथिः कस्य पदध्वनिना प्रबुद्धः अभवत् ?
8. अतिथिः चौरशङ्कया कम् अन्वधावत् ?
9. अतिथिः कम् अगृह्णात् ?
10. कः उच्चैः क्रोशितुम् आरभत ?
11. "चौरोऽयम् चौरोऽयम्" इति कः क्रोशितुमारभत ?
12. ग्रामवासिनः केन प्रबुद्धाः ?
13. ग्रामवासिनः कस्माद् निष्क्रम्य तत्र आगच्छन् ?
14. 'वराक' इति अनेन कः विवक्षितः ?
15. ग्रामवासिनः चौरं मत्वा कम् अभर्त्सयन् ?
16. आरक्षी कं कारागृहे प्राक्षिपत् ?
17. चौरः कीदृशीं पेटिकाम् आदाय पलायितवान् ?

**ii) पूर्णवाक्येन उत्तरं लिखत ।**

1. पदातिक्रमेण संचलन् सायं काले निर्धनः जनः किम् अचिन्तयत् ?
2. वस्तुतः कः चोरः आसीत् ?

**iii) निर्देशानुसारम् उत्तरं लिखत ।**

1. 'आसीत्' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?
2. 'विजने' इति पदस्य विशेष्यपदम् अनुच्छेदात् स्वीकृत्य लिखत ?
3. 'करुणापरो गृही' अनयोः विशेष्यपदं किम् ?
4. 'प्रायच्छत्' इति क्रियापदस्य कि कर्तृपदम् अनुच्छेदे प्रयुक्तम् ?
5. 'तस्करः' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

6.‘मञ्जूषाम्’ इति पदस्य कि विशेषणपदम् अनुच्छेदे प्रयुक्तम् ?

7.‘अगृह्णात्’ इति क्रियापदस्य किं कर्तृपदम् अनुच्छेदे प्रयुक्तम् ?

8.‘ग्रामवासिनः’ इति पदस्य किं विशेषणपदम् अनुच्छेदे प्रयुक्तम् ?

9.‘अतिथिम्’ इति पदस्य किं विशेषणपदम् अनुच्छेदे प्रयुक्तम् ?

10.‘निहितामेकां मञ्जूषाम्’ अत्र विशेष्यपदं किम् अस्ति ?

**अनुच्छेदः – 3**

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान्। न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक्-पृथक् विवरणं श्रुतवान्। सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्। किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत्। ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान्। अन्येद्युः तौ न्यायालये स्व-स्व-पक्षं पुनः स्थापितवन्तौ। तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् “इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः। तस्य मृतशरीरं राजमार्गं निकषा वर्तते। आदिश्यतां किं करणीयमिति।” न्यायाधीशः आरक्षिणम् अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान्।

**i) एकपदेन उत्तरं लिखत।**

1.आरक्षी चौर्याभियोगे तं कुत्र नीतवान् ?

2.न्यायाधीशः कः आसीत् ?

3.सर्वं वृत्तान्तम् अवगत्य न्यायाधीशः कं निर्दोषम् अमन्यत ?

4. सर्वं वृत्तान्तम् अवगत्य न्यायाधीशः कं दोषभाजनम् अमन्यत ?

5. कः समागत्य न्यायाधीशं हत्याविषयं न्यवेदयत् ?

6.मृतशरीरं कं निकषा वर्तते ?

7. कस्य अभावात् न्यायाधीश: निर्णेतुं नाशक्नोत् ?

8.तत्रत्यः कर्मचारी आगत्य कं न्यवेदयत् ?

9.तौ आरक्षिरभियुक्तौ कम् आनेतुं न्यायाधीशः अवदत् ?

10. तौ आरक्षिरभियुक्तौ शवं कुत्र आनेतुं न्यायाधीशः अवदत् ?

**ii) पूर्णवाक्येन उत्तरं लिखत।**

1. न्यायाधीशम् उपेत्य कर्मचारी किम् अवदत् ?

2.न्यायाधीशः मृतशरीरमानेतुम् कौ आदिष्टवान् ?

**iii) निर्देशानुसारम् उत्तरं लिखत**

1.‘दिवसे’ इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

2.‘ज्ञात्वा’ इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम् अस्ति ?

3.‘मृतशरीरम्’ इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम् अस्ति ?

4.‘निकटे’ इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम् अस्ति ?

5. ‘दिने’ इति पदस्य कि विशेषणपदम् अत्र प्रयुक्तम् ?

6. ‘अशक्नोत्’ इति क्रियपदस्य कर्तृपदं किम् अनुच्छेदे प्रयुक्तम् ?

**अनुच्छेदः - 4**

आदेशं प्राप्य उभौ प्राचलताम् । तत्रोपेत्य काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति प्रस्थितौ । आरक्षी सुपुष्टदेहः आसीत्, अभियुक्तश्च अतीव कृशकायः । भारवतः शवस्य स्कन्धेन वहनं तत्कृते दुष्करम् आसीत् । स भारवेदनया क्रन्दति स्म । तस्य क्रन्दनं निशम्य मुदितः आरक्षी तमुवाच - रे दुष्ट ! तस्मिन् दिने त्वयाऽहं चोरिताया मञ्जूषाया ग्रहणाद् वारितः । इदानीं निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे” इति प्रोच्य उच्चैः अहसत् । यथाकथञ्चिद् उभौ शवमानीय एकस्मिन् चत्वरे स्थापितवन्तौ ।

**i) एकपदेन उत्तरं लिखत ।**

1.कं प्राप्य उभौ प्राचलताम् ?

2.काष्ठपटले निहितं पटाच्छादितं कं तौ अपश्यताम् ?

3. काष्ठपटले निहितं पटाच्छादितं देहं तौ केन वहन्तौ अभवताम् ?

4.पुष्टदेहः कः ?

5. कः भारवेदनया क्रन्दति स्म ?

6. कृशकायः कः ?

7..निर्धनस्य क्रन्दनं श्रुत्वा कः मुदितः अभवत् ?

8. स्कन्धेन कस्य वहनं तत्कृते दुष्करमासीत् ?

9.कः उच्चैः अहसत् ?

10.उभौ शवमानीय कुत्र स्थापितवन्तौ ?

**ii) पूर्णवाक्येन उत्तरं लिखत ।**

1) शवं वहन् आरक्षी निर्धनं किमवदत् ?

2) चौर्याभियोगे निर्धनः कति वर्षाणि यावत् कारादण्डं लप्स्यते इति आरक्षी अवदत् ?

**iii) निर्देशानुसारम् उत्तरं लिखत ।**

1.‘स्थापितम्’ इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

2.‘श्रुत्वा’ इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् अस्ति ?

3.‘रोदनम्’ इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् अस्ति ?

4.‘प्रसन्नः’ इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् अस्ति ?

5.‘चतुष्पदे’ इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् अस्ति ?

6.‘देहम्’ इत्यस्य विशेषणपदं चित्वा लिखत ?

7.‘आरक्षी’ इत्यस्य विशेषणपदं चित्वा लिखत ?

8.‘चोरितायाः’ इत्यस्य विशेष्यपदं चित्वा लिखत ?

9.‘एकस्मिन् चत्वरे’ अनयोः विशेष्यपदं किम् अस्ति ?

10.’कृशकायः’ इत्यस्य किं विशेषणपदमत्र प्रयुक्तम् ?

11. ‘आदेशं प्राप्य उभौ प्राचलताम्।’ अस्मिन् वाक्ये क्रियापदं किम् ?

12. ‘आरक्षी सुपुष्टदेहः आसीत्’ अस्मिन् वाक्ये क्रियापदं किम् ?

13. ‘क्रन्दति’ इति क्रियपदस्य कर्तृपदम् किम् अनुच्छेदे प्रयुक्तम् ?

14. ‘लप्स्यसे’ इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

15. ‘उवाच’ इति क्रियापदस्य किं कर्तृपदम् अनुच्छेदे प्रयुक्तम् अस्ति ?

**अनुच्छेदः – 5**

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ । आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् स शव: प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् - मान्यवर! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि ‘त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः, अत: निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे’ इति। न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससस्मानं मुक्तवान्। अत एवोच्यते-

दुष्कराण्यपि कर्माणि मतिवैभवशालिनः ।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते ॥

**i) एकपदेन उत्तरत ।**

1. कः प्रवारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् ?

2.न्यायाधीशः कस्मै कारादण्डं आदिष्टवान् ?

3.न्यायाधीशः कं ससम्मानम् मुक्तवान् ?

4.दुष्कराणि अपि कार्याणि के लीलया प्रकुर्वते ?

**ii) पूर्णवाक्येन उत्तरं लिखत ।**

1.आरक्षी अध्वनि किमुक्तवान् ?

2.न्याया

धीशः कं जनं ससम्मानम् मुक्तवान् ?

**iii) निर्देशानुसारम् उत्तरत ।**

1. 'आच्छादनवस्त्रम्' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?
2. 'नमस्कृत्य ' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?
3. 'मार्गे' इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?
4. तं जनम् अनयोः विशेष्यपदं किम् ?
5. 'स शवः' अनयोः विशेषणपदं किम् ?
6. 'वर्णयामि' इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

**श्लोकस्य अन्वयः**

मतिवैभवशालिनः नीतिं युक्तिं समालम्ब्य दुष्कराणि अपि कर्माणि लीलया एव प्रकुर्वते ।

**भावार्थः**

मतिवैभवसम्पन्नाः जनाः नीतिं युक्तिं च समालम्ब्य कठिनानि अपि कार्याणि सहजतया एव कुर्वन्ति ।

## अष्टम: पाठ: - विचित्र: साक्षी - उत्तरकुञ्चिका

**अनुच्छेदः - 1**

**i) एकपदेन उत्तरत ।** 1.धनम् 2.अध्यने 3.पुत्रस्य 4.पुत्रम् 5निर्धनः 6.बस् यानम्
7.अर्थकार्श्येन 8 निर्धनः 9.निर्धनस्य 10. निर्धनः

**ii) पूर्णवाक्येन उत्तरं लिखत ।**

1. निर्धनो जनः पुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः ।
2. निर्धनो जनः पुत्रस्य रुग्णताम् आकर्ण्य तं पुत्रं द्रष्टुं गतवान् ।
3. अर्थकार्श्येन पीडितः सः जनः बस् यानं विहाय पद्भ्यां गतवान् ।

**iii) निर्देशानुसारम् उत्तरं लिखत** - 1 तनूजस्य 2 जनः 3 पीडितः 4 पुत्रम् 5 सः

**अनुच्छेदः - 2**

**i) एकपदेन उत्तरत** – 1.दैवगतिः 2गृहस्थम् 3 करुणापरः 4 निर्धनाय 5 गृहाभ्यन्तरम्
6 मञ्जूषाम् 7 चौरस्य 8.तम् (चौरम्) 9.चौरम् 10.चौरः 11 चौरः 12 तारस्वरेण
13.गृहात् 14 निर्धनः / अतिथिः 15 निर्धनम् / अतिथिम् । 16 निर्धनम् / अतिथिम्
17. गृहे निहिताम्

**ii) पूर्णवाक्येन उत्तरं लिखत ।**

1.पदातिक्रमेण संचलन् सायं काले निर्धनः जनः अचिन्तयत् यत् निशान्धकारे प्रसृते विजने प्रवेशे पदयात्रा न शुभावहा इति ।

2. वस्तुतः आरक्षी एव चौरः आसीत् ।

**iii) निर्देशानुसारम् उत्तरं लिखत** - 1.असौ 2.प्रदेशे 3.गृही 4 गृही 5 चौरः
6.निहिताम् /एकाम् 7 अतिथिः 8 प्रबुद्धाः 9. वराकम् 10. मञ्जूषाम्

**अनुच्छेदः - 3**

**i) एकपदेन उत्तरं लिखत -** 1.न्यायालयम् 2 बंकिमचन्द्र: 3.निर्धनम् / अतिथिम् 4.आरक्षिणम्
5.कर्मचारी 6.राजमार्गम् 7. प्रमाणस्य 8. न्यायाधीशम् 9 शवम् 10 न्यायालयम्

**ii) पूर्णवाक्येन उत्तरं लिखत -** 1. न्यायाधीशं उपेत्य कर्मचारी अवदत् यत् इतः क्रोशद्वयाभ्यन्तरे कश्चित् जनः केनापि हतः इति ।

2.न्यायाधीशः मृतशरीरमानेतुम् आरक्षिणं अभियुक्तं च आदिष्टवान् ।

**iii) निर्देशानुसारम् उत्तरं लिखत -** 1.दिने 2 अवगत्य 3.शवम् 4.निकषा 5. अग्रिमे 6. सः

**अनुच्छेदः - 4**

**i) एकपदेन उत्तरं लिखत।**

1.आदेशम् 2.देहम् 3.स्कन्धेन 4.आरक्षी 5. निर्धनः

6. निर्धनः/अतिथिः/अभियुक्तः 7.आरक्षी 8. शवस्य 9.आरक्षी 10.चत्वरे

**ii) पूर्णवाक्येन उत्तरं लिखत।**

1. शवं वहन् आरक्षी निर्धनं अवदत् यत् - रे दुष्ट! तस्मिन् दिने त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणात् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे इति।

2. चौर्याभियोगे निर्धनः त्रीणि वर्षाणि यावत् कारादण्डं लप्स्यते इति आरक्षी अवदत्।

**iii) निर्देशानुसारम् उत्तरं लिखत।**

1.निहितम् 2.निशम्य 3.क्रन्दनम् 4 मुदितः 5.चत्वरे 6. निहितं / पटाच्छादितं 7.सुपुष्टदेहः 8. मञ्जूषायाः 9.चत्वरे 10.अभियुक्तः 11. प्राचलताम् 12.आसीत् 13 सः 14. त्वम् 15.आरक्षी

**अनुच्छेदः - 5**

**i) एकपदेन उत्तरत –**

1.शवः 2आरक्षिणे 3. निर्धनम् 4.मतिवैभवशालिनः

**ii) पूर्णवाक्येन उत्तरं लिखत।**

1. त्वयाऽहं चोरितायाः मञ्जूषायाः ग्रहणात् वारितः। इदानीं निजकृत्यस्य फलं भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे इति।

2.न्याधीशः निर्धनं जनं ससम्मानम् मुक्तवान्

**iii) निर्देशानुसारम् उत्तरत –**

1.प्रवारकम् 2.अभिवाद्य 3.अध्वनि 4.जनम् 5.सः 6.अहम्

# नवमः पाठः

# सूक्तयः

**नवमः पाठः - सूक्तयः**

**ग्रन्थपरिचयः**

अयं पाठः मूलतः तमिलभाषायाः "तिरुक्कुरल्" नामकग्रन्थात् गृहीतः अस्ति । अयं ग्रन्थः तमिलभाषायाः वेदः इति कथ्यते।

**कविपरिचयः**



अस्य प्रणेता भवति श्रीमान् तिरुवल्लुवर् महोदयः।
अयं तमिलभाषायाः सिद्धकविः इति अङ्गीक्रियते।

**श्लोकः - 1**

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

**क) एकपदेन उत्तरत ।**

1. कः पुत्राय विद्याधनं यच्छति ?
2. पिता पुत्राय किं यच्छति ?
3. पिता कीदृशं विद्याधनं यच्छति ?

**ख) एकवाक्येन उत्तरत ।**

1. पिता महत् विद्याधनं कस्मै यच्छति ?
2. पिता महत् विद्याधनं पुत्राय कदा यच्छति ?
3. का उक्तिः अस्ति ?
4. कः तपः तेपे ?
5. कस्य पिता तपः तेपे ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. 'पिता' इति कर्तृपदस्य क्रियापदं किमस्ति ?
2. 'यच्छति' इति क्रियापदस्य कर्तृपदं किमस्ति ?

3. 'शैशवे' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

4. 'विद्याधनम्' इति पदस्य विशेषणपदं किमस्ति ? .

5. 'किं तप: तेपे' अत्र क्रियापदं किमस्ति ?

6. 'जनक:' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

**श्लोक: - 2**

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।

तदेवाहुः महात्मानः समत्वमिति तथ्यतः।।

**क) एकपदेन उत्तरत ।**

1. के आहु: ?

2. अवक्रता कुत्र भवेत् ?

**ख) एकवाक्येन उत्तरत ।**

1. महात्मान: किं आहु: ?

2. समत्वं किं भवति ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. "अवक्रता " इति कर्तृपदस्य क्रियापदं किमस्ति ?

2. "आहु:" इति क्रियापदस्य कर्तृपदं किमस्ति ?

3. "वस्तुत:" इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

4. "वाण्याम्" इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

5. " मनसि" इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

6. "वक्रता" इति पदस्य विलोमपदं किं प्रयुक्तम् ?

7. "ऋजुता" इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

**श्लोक: - 3**

त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।

परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः।।

**क) एकपदेन उत्तरत ।**

1. काम् अभ्युदीरयेत् ?

2. विमूढधीः कीदृशीं वाचं अभ्युदीरयेत् ?

3. विमूढधीः कीदृशीं वाचं त्यक्त्वा परुषाम् अभ्युदीरयेत् ?

4. क: अपक्वं फलं भुङ्क्ते ?

5. विमूढधीः किं भुङ्क्ते ?

**ख) एकवाक्येन उत्तरत।**

1. विमूढधीः कां त्यक्त्वा परुषां वाचं अभ्युदीरयेत् ?

2. विमूढधीः कीदृशं फलं भुङ्क्ते ?

3. विमूढधीः किं परित्यज्य अपक्वं फलं भुङ्क्ते ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. 'य:' इति कर्तृपदस्य क्रियापदं किमस्ति ?

2. 'भुङ्क्ते' इति क्रियापदस्य कर्तृपदं किमस्ति ?

3. 'परित्यज्य' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

4. 'वाचम्' इति पदस्य विशेषणपदं किमस्ति ?

5. 'अपक्वं फलम्' अत्र विशेष्यपदं किमस्ति ?

6. 'कठोराम्' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

7. 'वदेत्' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?

8. 'पक्वम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**श्लोक: - 4**

विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ।
अन्येषां वदने ये तु ते चक्षुर्नामनी मते ॥

**क) एकपदेन उत्तरत।**

1. के प्रकीर्तिताः ?

2. विद्वांस: कथं प्रकीर्तिता: ?

**ख) एकवाक्येन उत्तरत।**

1.कुत्र विद्वांस: चक्षुष्मन्तः प्रकीर्तिता: ?

2.केषां वदने ये तु ते चक्षुर्नामनी मते ?

3. अन्येषां वदने ये तु ते किं नामनी मते ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. 'विद्वांस एव चक्षुष्मन्त: प्रकीर्तिता:' अत्र क्रियापदं किमस्ति ?
2. 'मुखे' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?
3. 'लोके अस्मिन्' अत्र विशेष्यपदं किमस्ति ?
4. 'नेत्रवन्त:' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?
5. 'मूर्खा:' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**श्लोक: - 5**

यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः ।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः ॥

**क) एकपदेन उत्तरत ।**

1. किं कर्तुं शक्य: भवेत् ?
2. स: किम् इति ईरित: ?

**ख) एकवाक्येन उत्तरत ।**

1.विवेक: इति क: ईरित: ?
2. कस्य तत्त्वार्थनिर्णय: विवेकेन कर्तुं शक्यो भवेत् ?

**ग) निर्देशानुसारम् उत्तरत ।**

1.'कर्त्तुं शक्यो भवेद्येन' अत्र क्रियापदं किमस्ति ?
2. 'कथित:' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?
3. 'स विवेक:' अत्र विशेष्यपदं किमस्ति ? .
4. 'अनुक्तम्' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**श्लोक: - 6**

वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।
स केनापि प्रकारेण परैर्न परिभूयते॥

**क) एकपदेन उत्तरत ।**

1. क: परै: न परिभूयते ?
2. मन्त्री केन न परिभूयते ?
3. वाक्पटुर्धैर्यवान् मन्त्री कुत्र अकातर: भवति ?

**ख) एकवाक्येन उत्तरत ।**

1. कीदृश: मन्त्री परै: न परिभूयते?

**ग) निर्देशानुसारम् उत्तरत ।**

1. 'स केनापि प्रकारेण परैर्न परिभूयते' अत्र क्रियापदं किमस्ति ?
2. 'अन्यै:' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?
3. 'धैर्यवान् मन्त्री ' अत्र विशेषणपदं किमस्ति ?
4. 'कातर:' इति पदस्य विलोमपदं किं प्रयुक्तम् ?

**श्लोक: - 7**

य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।
न कुर्यादहितं कर्म स परेभ्यः कदापि च ॥

**क) एकपदेन उत्तरत ।**

1. किं न कुर्यात् ?
2. कीदृशं कर्म न कुर्यात् ?
3. केभ्य: न कुर्यात् ?

**ख) एकवाक्येन उत्तरत ।**

1. क: अहितं कर्म न कुर्यात् ?
2. (मनुष्य:) किं इच्छति ?
3. कस्य श्रेय: इच्छति ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. 'य' इति कर्तृपदस्य क्रियापदं किमस्ति ?
2. 'कुर्यात्' इति क्रियापदस्य कर्तृपदं किमस्ति ?
3. 'अन्येभ्य:' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?
4. 'सुखानि' इति पदस्य विशेषणपदं किमस्ति ?
5. 'अहितं कर्म' अत्र विशेष्यपदं किमस्ति ?
6. 'दु:खानि' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?

**श्लोक: - 8**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।

तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥

**क) एकपदेन उत्तरत ।**

1. क: प्रथमो धर्म: ?
2. एतत् केषां वच: भवति?
3. कं रक्षेत् ?
4. सदाचारं केभ्योऽपि विशेषत: संरक्षेत् ?

**ख) एकवाक्येन उत्तरत ।**

1. विदुषां वच: किं भवति ?
2. आचार: कथं रक्षेत् ?

**ग) निर्देशानुसारम् उत्तरत ।**

1. 'तस्माद् रक्षेत् सदाचारम्' अत्र क्रियापदं किमस्ति ?
2. 'पण्डितानाम्' इति अर्थे श्लोके किं पदं प्रयुक्तम् ?
3. 'धर्म:' इति पदस्य विशेषणपदं किमस्ति ?
4. "एतत् वच:" अत्र विशेष्यपदं किमस्ति ?
5. "दुराचारम्" इति पदस्य विलोमपदं किं प्रयुक्तम् ?

## नवम: पाठ: - सूक्तय: - उत्तरकुञ्चिका

**(श्लोक: - 1)**

**क) एकपदेन उत्तरत ।**

1. पिता 2. विद्याधनम् 3. महत्

**ख) एकवाक्येन उत्तरत ।**

1. पिता महत् विद्याधनं पुत्राय यच्छति ।
2. पिता महत् विद्याधनं पुत्राय बाल्ये यच्छति ।
3. "अस्य पिता किं तप: तेपे" इति उक्ति: अस्ति ।
4. पिता तप: तेपे ।
5. अस्य ( पुत्रस्य ) पिता तप: तेपे ।

**ग) निर्देशानुसारम् उत्तरत ।**

1.यच्छति 2. पिता 3.बाल्ये 4.महत् 5.तेपे 6.पिता

**(श्लोक: - 2)**

**क) एकपदेन उत्तरत ।**

1. महात्मान: 2. चित्ते / वाचि

**ख) एकवाक्येन उत्तरत ।**

1. यदि अवक्रता यथा चित्ते तथा वाचि भवेद् तदेव समत्वम् इति आहु:।
2. यदि अवक्रता यथा चित्ते तथा वाचि यदि भवेत् तर्हि तत् समत्वम् इति आहु:।

**ग) निर्देशानुसारम् उत्तरत ।**

1.भवेत् 2. महात्मान: 3.तथ्यत: 4.वाचि 5. चित्ते 6.अवक्रता 7. अवक्रता

**(श्लोक: - 3)**

**क) एकपदेन उत्तरत ।**

1. वाचं 2. परुषाम् 3. धर्मप्रदाम् 4. विमूढधीः 5. अपक्व-फलं

**ख) एकवाक्येन उत्तरत ।**

1. धर्मप्रदां वाचं त्यक्त्वा परुषां वाचं अभ्युदीरयेत्।
2. विमूढधीः अपक्वं फलं भुङ्क्ते।
3. विमूढधीः पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते।

**ग) निर्देशानुसारम् उत्तरत ।**

1.अभ्युधीरयेत् 2. विमूढधी: 3.त्यक्त्वा 4.धर्मप्रदाम् / परुषाम् 5. फलम्
6. परुषाम् , 7.अभ्युदीरयेत् 8. अपक्वम्

**(श्लोक: - 4)**

**क) एकपदेन उत्तरत ।**

1. विद्वांस: 2. चक्षुष्मन्तः

**ख) एकवाक्येन उत्तरत ।**

1. अस्मिन् लोके विद्वांस: चक्षुष्मन्तः प्रकीर्तिता: ।
2. अन्येषां वदने ये तु ते चक्षुर्नामनी मते ।
3. अन्येषां वदने ये तु ते चक्षुर्नामनी मते ।

**ग) निर्देशानुसारम् उत्तरत ।**

1.प्रकीर्तिता: 2.वदने 3. लोके 4. चक्षुष्मन्त: 5.विद्वांस: ।

**(श्लोक: - 5)**

**क) एकपदेन उत्तरत ।**

1. तत्त्वार्थनिर्णयः 2. विवेक:

**ख) एकवाक्येन उत्तरत ।**

1. येन केनापि यत् प्रोक्तं तस्य तत्त्वार्थनिर्णयः कर्तुं येन शक्य: स: विवेक: इति ईरित: ।

2. येन केनापि यत्प्रोक्तं तस्य तत्त्वार्थनिर्णय: विवेकेन कर्तुं शक्यो भवेत् ।

**ग) निर्देशानुसारम् उत्तरत ।**

1.भवेत् 2.ईरित: 3.विवेक: 4. प्रोक्तम्

**(श्लोक: - 6)**

**क) एकपदेन उत्तरत ।**

1. मन्त्री 2. परै: 3. सभायाम्

**ख) एकवाक्येन उत्तरत ।**

1. वाक्पटु: धैर्यवान् सभायामप्यकातरः च मन्त्री परै: न परिभूयते।

**ग) निर्देशानुसारम् उत्तरत ।**

1.परिभूयते 2. परै: 3.धैर्यवान् 4. अकातर:

**(श्लोक: - 7)**

**क) एकपदेन उत्तरत ।**

1. कर्म 2. अहितम् 3. परेभ्य:

**ख) एकवाक्येन उत्तरत ।**

1. य: आत्मन: श्रेय: प्रभूतानि सुखानि च इच्छति स: अहितं कर्म न कुर्यात्।

2. मनुष्य: आत्मन: श्रेय: प्रभूतानि सुखानि च इच्छति।

3. आत्मन: श्रेय: इच्छति।

**ग) निर्देशानुसारम् उत्तरत ।**

1. इच्छति 2.स: 3.परेभ्य: 4.प्रभूतानि 5.कर्म 6.सुखानि

**(श्लोक: - 8)**

**क) एकपदेन उत्तरत ।** 1. आचार: 2. विदुषाम् 3. सदाचारम् 4. प्राणेभ्य:

**ख) एकवाक्येन उत्तरत ।**

1. इति विदुषां वच: ‘आचार: प्रथम: धर्म:’ इति भवति ।

2. आचार: प्राणेभ्यो अपि विशेषत: रक्षेत् ।

**ग) निर्देशानुसारम् उत्तरत**

1.रक्षेत् 2.विदुषाम् 3. प्रथम: 4.वच: 5.सदाचारम्

# द्वादशः पाठः

# अन्योक्तयः

## द्वादश: पाठः - अन्योक्तयः

अन्येषां कृतिषु याः उक्तयः वर्तन्ते ता उक्तयः अन्योक्तयः कथ्यन्ते । अत्र तथाविधाः काश्चन अन्योक्तयः सङ्कलिता वर्तन्ते । अस्मिन् पाठे षष्ठश्लोकम् सप्तमश्लोकम् च अतिरिच्य ये श्लोकाः सन्ति ते पण्डितराजजगन्नाथस्य 'भामिनीविलास' इति गीतिकाव्यात् सङ्कलिताः सन्ति । षष्ठः श्लोकः महाकविमाघस्य 'शिशुपालवधम्' इति महाकाव्यात् गृहीतः अस्ति । सप्तमः श्लोकः महाकविभर्तृहरेः नीतिशतकात् उद्धृतः अस्ति ।

**निम्नलिखितान् श्लोकान् पठित्वा तदाधारितानां प्रश्नानामुत्तराणि लिखत ।**

**श्लोकः - 1**

एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ॥

**(क) एकपदेन उत्तरत ।**

1. केन सरसः शोभा भवति ?
2. सरसः तीरे के वसन्ति ?
3. कस्य शोभा एकेन राजहंसेन भवति ?

**(ख) एक वाक्येन उत्तरत ।**

1. केन सरसः शोभा न भवति ?
2 सरसः शोभा केन भवति ?
3.बकसहस्रेण कस्य शोभा न भवेत् ?

**(ग) निर्देशानुसारम् उत्तरत ।**

1 'एकेन राजहंसेन' अनयोः पदयोः विशेषणपदं किमस्ति ?
2. 'एकेन राजहंसेन' अनयोः पदयोः विशेष्यपदं किमस्ति ?
3. ''शोभा' भवेत्' अत्र क्रियापदं किम् ?
4.'सरोवरस्य ' इत्यर्थे किं पदं प्रयुक्तम् ?

**श्लोकः - 2**

भुक्ता मृणालपटली भवता निपीता
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस! वद तस्य सरोवरस्य
कृत्येन केन भवितासि कृतोपकारः ॥

**(क) एकपदेन उत्तरत ।**

1. राजहंसः कां भुनक्ति ?

2. कानि निपीतानि ?

3. केन नलिनानि निषेवितानि ?

**(ख) एकवाक्येन उत्तरत ।**

1. राजहंस कस्य कृतोपकारः भवति ?

2. नलिनानि केन निषेवतानि ?

**(ग) निर्देशानुसारम् उत्तरत ।**

1 'यत्र भवता मृणालपाटली भुक्ता'। अत्र क्रियापदं किम् ?

2. 'तस्य सरोवरस्य 'अनयोः पदयोः विशेषणपदं किमस्ति ?

3. तस्य सरोवरस्य - अनयोः पदयोः विशेष्यपदं किमस्ति ?

4. अस्मिन् श्लोके 'जलानि' इति पदस्य कः पर्यायः आगतः ?

**श्लोकः - 3**

तोयैरल्पैरपि करुणया भीमभानौ निदाघे,
मालाकार! व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां
धारासारानपि विकिरता विश्वतो वारिदेन ॥

**(क) एकपदेन उत्तरत ।**

1. कः भीमभानौ निदाघे तरोः पुष्टिम् व्यरचयति ?

2.मालाकारः कियत् तोयै: तरोः पुष्टिं करोति ?

3. क: अल्पै: तोयैः तरो: पुष्टिं करोति ?

4.विश्वतः वारिदः कान् विकिरति ?

**(ख) एकवाक्येन उत्तरत ।**

1. क: वारां धारासारान् विकिरति ?

2. मालाकार: कै: तरो: पुष्टिं व्यरचि ?

3. तरो: पुष्टि: मालाकार: कै: करोति ?

**(ग) निर्देशानुसारम् उत्तरत ।**

1. श्लोके 'तोयैः' इति पदस्य विशेषणं किमस्ति ?

2.'भवता करुणया अस्य पुष्टि: व्यरचि ' अत्र किं क्रियापदं प्रयुक्तम् ?

3.अस्मिन् श्लोके वृक्षस्य' इति पदस्य कः पर्यायः आगतः?

4. अस्मिन् श्लोके आतपे इति पदस्य किं पर्यायपदम् आगतम् ?

**श्लोक: - 4**

आपेदिरेऽम्बरपथं परितः पतङ्गाः

भृङ्गा रसालमुकुलानि समाश्रयन्ते ।

सङ्कोचमञ्चति सरस्त्वयि दीनदीनो

मीनो नु हन्त कतमां गतिमभ्युपैतु ॥

**(क) एकपदेन उत्तरत ।**

1. परितः पतङ्गाः कम् आपेदिरे ?

2. के रसालमुकुलानि समाश्रयन्ते ?

3. भृङ्गा: कानि समाश्रयन्ते ?

**(ख) एकवाक्येन उत्तरत ।**

1. सरसि सङ्कोचमञ्चति कः कतमां गतिम् अभ्युपैतु ?

2. मीन: कदा दीनां गतिं प्राप्नोति ?

3. के अम्बरपथम् आपेदिरे ?

**(ग) निर्देशानुसारम् उत्तरत ।**

1. 'कतमां गतिम्' इति पदयोः विशेषणपदं किं वर्तते ?

2. 'कतमां गतिम्' इति पदयोः विशेष्यपदं किं वर्तते ?

3. अस्मिन् श्लोके 'आपेदिरे' इति क्रियायाः कर्तृपदं किम् ?

4. श्लोके 'भ्रमरा:' इत्यर्थे किं पदं प्रयुक्तम् ?

**श्लोक: - 5**

एक एव खगो मानी वने वसति चातकः ।

पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥

**(क) एकपदेन उत्तरत ।**

1 चातकः कीदृशः खगः वर्तते ?

2 कः वने वसति ?

3. क: पिपासित: म्रियते ?

4. क: मानी अस्ति ?

5. चातक: कुत्र वसति ?

**(ख) एकवाक्येन उत्तरत ।**

1.कीदृशः चातक: म्रियते ?

2. चातक: किमर्थं मानी कथ्यते ?

3. क: पुरन्दरं याचते ?

**(ग) निर्देशानुसारम् उत्तरत ।**

1. 'मानी' इति विशेषणस्य किं विशेष्यपदं श्लोके अस्ति ?

2. अस्मिन् श्लोके 'म्रियते' इत्यस्य क्रियापदस्य कर्तृपदं किम् ?

3. अस्मिन् श्लोके 'मरणं प्राप्नोति ' इत्यर्थे क: शब्द: आगतः ?

4. 'मेघम्' इत्यर्थे किं पदं प्रयुक्तम् ?

5. 'चातक: वसति' इत्यत्र क्रियापदं किम् ?

7. 'चातक: वसति' इत्यत्र कर्तृपदं किम् ?

**श्लोक: - 6**

आश्वास्य पर्वतकुलं तपनोष्णतप्त-
मुद्दामदावविधुराणि च काननानि ।
नानानदीनदशतानि च पूरयित्वा
रिक्तोऽसि यज्जलद! सैव तवोत्तमा श्रीः ॥

**(क) एकपदेन उत्तरत ।**

1. अस्मिन् श्लोके कं संबोधयति कवि: ?

2. जलदः कीदृशं पर्वतकुलम् आश्वासयति ?

3. नदीनदशतानि पूरयित्वा क: रिक्त: भवति ?

**(ख) एकवाक्येन उत्तरत ।**

1. जलदः कानि पूरयित्वा स्वयं रिक्तो भवति ?

2. नानानदीनशतानि पूरयित्वा जलद: कीदृश: भवति ?

**(3) निर्देशानुसारम् उत्तरत ।**

1. 'उत्तमा श्री ' अनयो: पदयो: विशेषणपदं किम् ?

2. उत्तमा श्री अनयो: पदयो: विशेष्यपदं किम् ?

3. अत्र श्लोके 'पर्वतकुलम्' इत्यस्य विशेष्यस्य विशेषणपदं किम्?

4. 'असि तव सा एव ' अत्र असि इति क्रियाया: कर्तृपदं किम् ?

**श्लोक: - 7**

रे रे चातक! सावधानमनसा मित्र क्षणं श्रूयता-
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

**(क) एकपदेन उत्तरत ।**

1. अम्भोदा: कुत्र सन्ति ?

2 .के वृष्टिभिः वसुधाम् आर्द्रयन्ति ?

3.कीदृशं वचः मा ब्रूहि ?

4.अम्भोदा: वृष्टिभि: काम् आर्द्रयन्ति ?

**(ख) एकवाक्येन उत्तरत ।**

1.गगने हि बहवः के सन्ति ?

2. सावधानमनसा कः शृणोतु ?

3.अत्र कवेः मित्रं कः अस्ति ?

**(ग) निर्देशानुसारम् उत्तरत ।**

1. 'त्वं दीनं वचः मा ब्रूहि' - अत्र क्रियापदं किम् ?

2. 'बहवः अम्भोदाः' - अनयोः पदयोः विशेषणपदं किम् ?

3. श्लोके 'समक्षम्' इत्यस्य पदस्य कः पर्यायः आगतोऽस्ति ?

4.'शोषयन्ति' इत्यस्य किं विलोमपदं अत्र प्रयुक्तम् ?

## नवम: पाठ: - सूक्तय: - उत्तरकुञ्चिका

**श्लोक: - 1**

**क) एकपदेन उत्तरत।**

1. राजहंसेन 2. बकसहस्रम् 4. सरस:

**ख) एकवाक्येन उत्तरत।**

i. बकसहस्रेण सरसः शोभा न भवति।
ii. सरस: शोभा राजहंसेन भवति।
iii. बकसहस्रेण सरस: शोभा न भवेत्।

**ग) निर्देशानुसारम् उत्तरत।**

1. एकेन 2. राजहंसेन 3. भवेत् 4. सरस:

**श्लोक: - 2**

**क) एकपदेन उत्तरत**

1. मृणालपटलीम् 2. अम्बूनि 3. राजहंसेन

**ख) एकवाक्येन उत्तरत**

1. राजहंसः सरोवरस्य कृतोपकारकः भवति।
2. नलिनानि राजहंसेन निषेवितानि।

**ग) निर्देशानुसारम् उत्तरत।**

1. भुक्ता 2. तस्य 3. सरोवरस्य 4. अम्बूनि ।

**श्लोक: - 3**

**क) एकपदेन उत्तरत**

1.मालाकार: 2. अल्पै: 3. मालाकार: 4.वारां धारासारान्

**ख) एकवाक्येन उत्तरत**

1. वारिद: वारां धारासारान् विकिरति।
2. मालाकार: तयौ: तरो: पुष्टिं करोति।
3. तरो: पुष्टि मालाकार: अल्पै: तोयै: करोति।

**ग) निर्देशानुसारम् उत्तरत।**

1. अल्पै: 2. व्यरचि 3.तरो: 4. निदाघे

**श्लोक - 4**

**क) एकपदेन उत्तरत**

1. अम्बरपथम् 2. भृङ्गा: 3. रसालमुकुलानि

**ख) एकवाक्येन उत्तरत**

1. सरसि सङ्कोचमञ्चति दीनदीनः मीनः कतमां गतिम् अभ्युपैतु ।

2. सरसि सङ्कोचमञ्चति मीन: दीनां गतिं प्राप्नोति ।

3. पतङ्गा: अम्बरपथम् आपदिरे ।

**ग) निर्देशानुसारम् उत्तरत ।**

1. कतमाम् 2. गतिम् 3. पतङ्गा: 4. भृङ्गा:

**श्लोक: - 5**

**क) एकपदेन उत्तरत**

1 मानी 2. चातक: 3. चातक: 4. चातक: 5. वने

**ख) एकवाक्येन उत्तरत**

1. पिपासितः चातक: म्रियते।

2. चातक: मानी कथ्यते यत: चातक: पिपासितो म्रियते ।

3. चातक: पुरन्दरं याचते।

**ग) निर्देशानुसारम् उत्तरत ।**

1. खगः 2 चातक: 3. म्रियते 4. पुरन्दरम् 5. वसति 6. चातक:

**श्लोक: - 6**

**क) एकपदेन उत्तरत**

1. जलदम् 2. तपनोष्णतप्तम् 3. जलद:

**ख) एकवाक्येन उत्तरत**

1. जलद: नानानदीनदशतानि पूरयित्वा स्वयं रिक्तो भवति ।

2. नानानदीनशतानि पूरयित्वा जलद: रिक्त: भवति ।

**ग) निर्देशानुसारम् उत्तरत ।**

1. उत्तमा 2. श्री: 3. तपनोष्णतप्तम् 4. त्वम्

**श्लोक: - 7**

**क) एकपदेन उत्तरत**

1. गगने । 2. अम्भोदा: । 3. दीनम् । 4 .वसुधाम् ।

**ख) एकवाक्येन उत्तरत**

1. गगने हि बहवः अम्भोदाः सन्ति । 2. सावधानमनसा चातकः शृणोतु ।

3. अत्र कवेः मित्रं चातकः अस्ति ।

**ग) निर्देशानुसारम् उत्तरत ।**

1.ब्रूहि 2. बहवः 3 पुरतः 4. आर्द्रयन्ति

# प्रश्ननिर्माणम्

# प्रश्ननिर्माणम्

## अवधातव्यम्

- छात्रा: किम् - शब्दस्य त्रिषु लिङ्गेषु सर्वाणि रूपाणि अर्थसहितं अवश्यं पठेयु: ।
- एतेषां सप्तविभक्तिषु अपि सर्वेषां रूपाणाम् अध्ययनं करणीयम् ।
- रूपाणि अध: दीयन्ते ।

**किम् - शब्दः पुल्लिङ्गे -**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | क: | कौ | के |
| **द्वितीया** | कम् | कौ | कान् |
| **तृतीया** | केन | काभ्याम् | कै: |
| **चतुर्थी** | कस्मै | काभ्याम् | केभ्य: |
| **पञ्चमी** | कस्मात् | काभ्याम् | केभ्य: |
| **षष्ठी** | कस्य | कयो: | केषाम् |
| **सप्तमी** | कस्मिन् | कयो: | केषु |

**किम् - शब्दः स्त्रीलिङ्गे -**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | का | के | का: |
| **द्वितीया** | काम् | के | का: |
| **तृतीया** | कया | काभ्याम् | काभि: |
| **चतुर्थी** | कस्यै | काभ्याम् | काभ्य: |
| **पञ्चमी** | कस्या: | काभ्याम् | काभ्य: |
| **षष्ठी** | कस्या: | कयो: | कासाम् |
| **सप्तमी** | कस्याम् | कयो: | कासु |

**किम् - शब्दः नपुंसकलिङ्गे -**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | किम् | के | कानि |
| **द्वितीया** | किंम् | के | कानि |
| **तृतीया** | केन | काभ्याम् | कैः |
| **चतुर्थी** | कस्मै | काभ्याम् | केभ्यः |
| **पञ्चमी** | कस्मात् | काभ्याम् | केभ्यः |
| **षष्ठी** | कस्य | कयोः | केषाम् |
| **सप्तमी** | कस्मिन् | कयोः | केषु |

रेखाङ्कितपदस्य आधारेण एव प्रश्ननिर्माणं करणीयम् । सामानयतः प्रश्ननिर्माणाय प्रथमं रेखाङ्कितपदस्य लिङ्गं विभक्तिं वचनं च दृष्ट्वा तस्य स्थाने तस्मिन् लिङ्गे तस्यां विभक्तौ तस्मिन् वचने च किं शब्दस्य रूपं लेखनीयम् । कुत्रचित् प्रश्नवाचकपदानां (सप्तककाराणां) प्रयोगः करणीयः ।

- **सप्त-ककाराः प्रश्ननिर्माणकार्ये सहायकाः।**

किम्    कुत्र    कति    कदा

कुतः    कथम्    किमर्थम्

| सप्तककाराणाम् अर्थाः | | |
|---|---|---|
| किम् | क्या | What / Is it |
| कुत्र | कहाँ | Where |
| कति | कितने | How many |
| कदा | कब | When |
| कुतः | कहाँ से / क्यों | From Where / Why |
| कथम् | कैसे | How |
| किमर्थम् | किसलिए | For What / Why |

➢ यदि वाक्ये रेखाङ्कितपदम् अन्यपदस्य विशेषणपदम् अस्ति तर्हि प्रश्ने **कीदृश** शब्दस्य प्रयोगः कर्तव्यः। पुल्लिङ्गे - कीदृशः, स्त्रीलिङ्गे - कीदृशी, नपुंसकलिङ्गे - कीदृशं च।

## पाठाधारिता: केचन अभ्यासा:

### प्रथम पाठः - शुचिपर्यावरणम्।

1. शतशकटीयानं **कज्जलमलिनं** धूमं मुञ्चति।
2. मानवजीवनाय **शुचिपर्यावरणम्** आवश्यकम्।
3. चक्रं सदा **वक्रं** भ्रमति।
4. शतशकटीयानं कज्जलमलिनं **धूमं** मुञ्चति।
5. पाषाणीसभ्यतायाम् **लतातरुगुल्मा:** प्रस्तरतले पिष्टा: भवन्ति।

### द्वितीयः पाठ: - बुद्धिर्बलवती सदा

1. व्याघ्र: **श्रुगालेन** सह पुन: आगच्छत्।
2. पुरा **त्वया** मह्यं त्रय: व्याघ्रा: दत्ता:।
3. त्वं **मानुषात्** अपि बिभेषि।
4. पुत्रौ **व्याघ्रभक्षणाय** कलहं कुरुतः।
5. मां **निजगले** बद्ध्वा चल ।

### चतुर्थ पाठ: - शिशुलालनम्

1. लवः **रामस्य** समीपम् उपसृत्य प्रणम्य च वदतः।
2. अहम् अत्र भवतो: **जनकं** नामतो वेदितुमिच्छामि।
3. तस्याः **द्वे** नामनी।
4. लव: कुश: च **भ्रातरौ** आस्ताम्।
5. बालभावात् हिमकर: **पशुपतिमस्तके** विराजते।

### पञ्चम पाठ: - जननी तुल्यवत्सला

1. स ऋषभः **क्षेत्रे** पपात।
2. दुर्बले सुते **मातु:** अत्यधिका कृपा।
3. बहूनि **अपत्यानि** सन्ति।
4. पुत्रस्य **दैन्यं** दृष्ट्वा अहं रोदिमि।
5. **धेनूनां** माता सुरभिः आसीत्।

**षष्ठपाठः - सुभाषितानि**

१ **अस्तमये** सविता रक्तः भवति।

२ वायसः **वसन्तस्य** गुणं न जानाति।

३ मानवः **निमित्तम्** उद्दिश्य प्रकुप्यति।

४ **क्रोधः** देहविनाशाय प्रथमः शत्रुः।

५ **गुणी** गुणं वेत्ति।

६ महताम् **सम्पत्तौ च विपत्तौ च** एकरूपता भवति।

७ फलच्छायासमन्वितः **महान्** वृक्षः सेवितव्यः।

**सप्तमः पाठः - सौहार्दं प्रकृतेः शोभा।**

१ मयूरः **विधात्रा** एव पक्षिराजः कृतः।

२ मयूरस्य नृत्यं तु **प्रकृतेः** आराधना।

३ **सिंहमहोदयेन** सम्यगुक्तम्।

४ बकस्य कारणेन तु सर्वं पक्षिकुलम् **अवमानितम्** जातम्।

५ **राजा** तु रक्षकः भवति।

६ **नदीमध्ये** एकः बकः आसीत्।

७ सिंहः **सर्वजन्तून्** दृष्ट्वा पृच्छति।

**अष्टमः पाठः - विचित्रः साक्षी**

१ न्यायाधीशः अतिथिं **ससम्मानं** मुक्तवान्।

२ शवः **प्रावारकम्** अपसार्य निवेदितवान्।

३ **मतिवैभवशालिनः** जनाः दुष्कराणि कर्माणि प्रकुर्वते।

४ **निशान्धकारे** पदयात्रा न शुभावहा।

५ जनाः **वराकम्** अतिथिं चौरं मत्वा अभर्त्सयन्।

६ तत्तनयः **पठनाय** छात्रावासे वसति स्म।

७ **आरक्षिणा** अध्वनि यदुक्तं तत् वर्णयामि।

**नवमः पाठः - सूक्तयः**

१ विवेकी एव **तत्वार्थनिर्णयं** करोति।

२ मनुष्यः आत्मनः **श्रेयः** इच्छति।

३ जन: **अहितं** कर्म न कुर्यात् ।

४ इदं **विद्वांस:** कथयन्ति ।

५ सदाचार: अवश्यमेव **जनै:** पालनीय: वर्तते ।

६ स: **प्राणेभ्य:** अपि विशिष्ट: भवति ।

७ **विवेकेन** यथार्थनिर्णय: भवति ।

**द्वादश: पाठ: - अन्योक्तय:**

१ एकेन एव राजहंसेन **सरस:** शोभा भवेत् ।

२ न सा परितस्तीरवासिना **बकसहस्रेण** भवेत् ।

३ एवं **नलिनानि** अनेकानि निषेवितानि ।

४ मालाकार! **भवता** करुणया तरो: अस्य तोयैरल्पैरपि पुष्टि: व्यरचि ।

५ भवता भीमभानौ निदाघे **करुणया** पुष्टि: व्यरचि ।

६ **पतङ्गा:** परित: अम्बरपथम् आपेदिरे ।

७ **एक:** चातक: वने वसति ।

८ एक: **चातक:** वने वसति ।

९ एक: चातक: **वने** वसति ।

**अभ्यासप्रश्ना:**

1. रामाय कुशलवयो: कण्ठाश्लेषस्य स्पर्श: **हृदयग्राही** आसीत् ।
2. **सहस्राधिकेषु** पुत्रेषु सत्स्वपि सा दु:खी आसीत् ।
3. **अतिदीर्घ:** प्रवासोऽयं दारुणश्च ।
4. तपोवनवासिनो देवीति **नाम्ना** आह्वयन्ति ।
5. **मया** अपि सम्माननीय: एव मुनिनियोग: ।
6. **मार्गे** सा एकं व्याघ्रं ददर्श ।
7. **अपूर्वं** खलु नामधेयम् ।
8. सः **कृच्छ्रेण** भारमुद्वहति ।
9. **सुराधिप:** तामपृच्छत् ।
10. **आर्यस्य** वन्दनायां लव इत्यात्मानं श्रावयामि ।
11. अयम् **अन्येभ्य**ः दुर्बल: ।
12. **तपोवने** तस्य नाम व्यवहरति।
13. **कृषीवल:** क्रुद्धः अभवत् ।
14. कृषकः **दीनं** तं बहुधा पीडयति ।

15. परं **प्रत्युत्पन्नमतिः** सा जम्बुकम् उवाच।
16. अपूर्वोऽयं **मानवानां** सरस्वत्यवतारः।
17. क्रुद्धः **कृषीवलः** तमुत्थापयितुम् बहुवारं यत्नमकरोत्।
18. उपाध्यायदूतः **अस्मान्** त्वरयति।
19. सर्वत्रैव **जलोपप्लवः** सञ्जातः।
20. सा तपस्विनी मत्कृतेन **अपराधेन** स्वापत्यमेव भणति।
21. रे राजहंस ! भवता **मृणालपटली** भुक्ता।
22. तस्य **सरोवरस्य** केन कृत्येन कृतोपकारः त्वं भवितासि ?
23. जनः प्रभूतानि **सुखानि** इच्छति।
24. अवक्रता यथा **चित्ते** अस्ति।
25. सः **प्राणेभ्यः** अपि विशेषः भवति।
26. मनुष्यः **आत्मनः** श्रेयः इच्छति।
27. जनः अहितं **कर्म** न कुर्यात्।
28. भारवतः शवस्य स्कन्धेन वहनं **दुष्करम्** आसीत्।
29. **पदातिक्रमेण** संचलन् सायम् अभवत्।
30. निशान्धकारे **पदयात्रा** न शुभावहा।
31. सः **भारवेदनया** क्रन्दति स्म।
32. **व्याघ्रचित्रकौ** नदीजलं पातुम् आगतौ।
33. **क्रोधः** देहविनाशाय प्रथमः शत्रुः।
34. मूर्खाः **मूर्खैः** सह अनुव्रजन्ति।
35. अमन्त्रम् **अक्षरं** नास्ति।
36. **नराणां** प्रथमः शत्रुः क्रोधः अस्ति।
37. लवः कुशः च **भ्रातरौ** आस्ताम्।
38. बालभावात् हिमकरः **पशुपतिमस्तके** विराजते।
39. **मां** निजगले बद्ध्वा चल सत्वरम्।
40. **व्याघ्रः** श्रृगालेन सह पुनः आगच्छत्।
41. पाषाणीसभ्यतायां **लतातरुगुल्माः** प्रस्तरतले पिष्टाः भवन्ति।
42. चक्रं सदा **वक्रं** भ्रमति।
43. भवता भीमभानौ निदाघे **करुणया** पुष्टिः व्यरचि।
44. मनुष्यः आत्मनः **श्रेयः** इच्छति।
45. तत्तनयः **पठनाय** छात्रावासे वसति स्म।

46. दुर्बलसुते **मातु:** अत्यधिका कृपा।

47. अहम् अत्र भवतो: **जनकं** नामतो वेदितुमिच्छामि।

48. मां **निजगले** बद्ध्वा चल सत्वरम्।

49. पाषाणीसभ्यतायाम् लतातरुगुल्मा: **प्रस्तरतले** पिष्टा: भवन्ति।

50. **पुत्रौ** व्याघ्रभक्षणाय कलहं कुरुतः।

## प्रश्ननिर्माणम् - उत्तरकुञ्चिका

### प्रथम पाठ: - शुचिपर्यावरणम्।

1. शतशकटीयानं **किं / कीदृशं** धूमं मुञ्चति ?
2. मानवजीवनाय **किम्** आवश्यकम् ?
3. चक्रं सदा **कथं** भ्रमति ?
4. शतशकटीयानं कज्जलमलिनं **कं** मुञ्चति ?
5. पाषाणीसभ्यतायाम् **के** प्रस्तरतले पिष्टा: भवन्ति ?

### द्वितीयः पाठ: - बुद्धिर्बलवती सदा

1. व्याघ्र: **केन** सह पुन: आगच्छत् ?
2. पुरा **केन** मह्यं त्रय: व्याघ्रा: दत्ता: ?
3. त्वं **कस्मात्** अपि बिभेषि ?
4. पुत्रौ **किमर्थं** कलहं कुरुतः ?
5. मां **कुत्र / कस्मिन्** बद्ध्वा चल ?

### चतुर्थ पाठ: - शिशुलालनम्

1. लवः **कस्य** समीपम् उपसृत्य प्रणम्य च वदतः ?
2. अहम् अत्र भवतो: **कं** नामतो वेदितुमिच्छामि ?
3. तस्याः **कति** नामनी ?
4. लव: कुश: च **कौ** आस्ताम् ?
5. बालभावात् हिमकर: **कुत्र / कस्मिन्** विराजते ?

### पञ्चम पाठ: - जननी तुल्यवत्सला

1. स ऋषभः **कुत्र / कस्मिन्** पपात ?
2. दुर्बले सुते **कस्या:** अत्यधिका कृपा ?
3. बहूनि **कानि** सन्ति ?
4. पुत्रस्य **किं** दृष्ट्वा अहं रोदिमि ?
5. **धेकासां** माता सुरभिः आसीत् ?

**षष्ठपाठः - सुभाषितानि**

१ **कदा** सविता रक्त: भवति ?

२ वायस: **कस्य** गुणं न जानाति ?

३ मानव: **किम्** उद्दिश्य प्रकुप्यति ?

४ **कः** देहविनाशाय प्रथम: शत्रु: ?

५ **कः** गुणं वेत्ति ?

६ महताम् **कुत्र** एकरूपता भवति ?

७ फलच्छायासमन्वित: **कीदृशः / कः** वृक्ष: सेवितव्य: ?

**सप्तमः पाठः - सौहार्दं प्रकृतेः शोभा ।**

1. मयूर: **केन** एव पक्षिराज: कृत: ?
2. मयूरस्य नृत्यं तु **कस्याः** आराधना ?
3. **केन** सम्यगुक्तम् ?
4. बकस्य कारणेन तु सर्वं पक्षिकुलम् **कीदृशं** जातम् ?
5. **कः** तु रक्षक: भवति ?
6. **कुत्र** एक: बक: आसीत् ?
7. सिंह: **कान्** दृष्ट्वा पृच्छति ?

**अष्टमः पाठः - विचित्रः साक्षी**

1. न्यायाधीश: अतिथिं **कथं** मुक्तवान् ?
2. शव: **किम्** अपसार्य निवेदितवान् ?
3. **कीदृशाः / के** जना: दुष्कराणि कर्माणि प्रकुर्वते ?
4. **कदा / कस्मिन् समये** पदयात्रा न शुभावहा ?
5. जना: **कीदृशम् / कम्** अतिथिं चौरं मत्वा अभर्त्सयन् ?
6. तत्तनय: **किमर्थं** छात्रावासे वसति स्म ?
7. **केन** अध्वनि यदुक्तं तत् वर्णयामि ?

**नवमः पाठः - सूक्तयः**

1. विवेकी एव **कं** करोति ?
2. मनुष्य: आत्मन: **किम्** इच्छति ?
3. जन: **कीदृशं / किं** कर्म न कुर्यात् ?
4. इदं **के** कथयन्ति ?
5. सदाचार: अवश्यमेव **कैः** पालनीय: वर्तते ?
6. स: **केभ्यः** अपि विशिष्ट: भवति ?
7. **केन** यथार्थनिर्णय: भवति ?

**द्वादशः पाठः - अन्योक्तयः**

1. एकेन एव राजहंसेन **कस्य** शोभा भवेत् ?
2. न सा परितस्तीरवासिना **केन** भवेत् ?
3. एवं **कानि** अनेकानि निषेवितानि ?
4. मालाकार! **केन** करुणया तरोः अस्य तोयैरल्पैरपि पुष्टिः व्यरचि ?
5. भवता भीमभानौ निदाघे **कया** पुष्टिः व्यरचि ?
6. **के** परितः अम्बरपथम् आपेदिरे ?
7. **कति** चातकः वने वसति ?
8. एकः **कः** वने वसति ?
9. एकः चातकः **कुत्र** वसति ?

**अभ्यासप्रश्नाः - उत्तरकुञ्चिका**

1. रामाय कुशलवयोः कण्ठाश्लेषस्य स्पर्शः **कीदृशः**आसीत् ?
2. **कति / केषु** पुत्रेषु सत्स्वपि सा दुःखी आसीत् ?
3. **कीदृशः / कः** प्रवासोऽयं दारुणश्च ?
4. तपोवनवासिनो देवीति **केन** आह्वयन्ति ?
5. **केन** अपि सम्माननीयः एव मुनिनियोगः ?
6. **कुत्र / कस्मिन्** सा एकं व्याघ्रं ददर्श ?
7. **किं / कीदृशम्** खलु नामधेयम् ?
8. सः **कथं / केन** भारमुद्वहति ?
9. **कः** तामपृच्छत् ?
10. **कस्य** वन्दनायां लव इत्यात्मानं श्रावयामि ?
11. अयम् **केभ्यः** दुर्बलः ?
12. **कुत्र / कस्मिन्** तस्य नाम व्यवहरति ?
13. **कः** क्रुद्धः अभवत् ?
14. कृषकः **कं / कीदृशम्** तं बहुधा पीडयति ?
15. परं **कीदृशी / का** सा जम्बुकम् उवाच ?
16. अपूर्वोऽयं **केषां** सरस्वत्यवतारः ?
17. क्रुद्धः **कः** तमुत्थापयितुम् बहुवारं यत्नमकरोत् ?
18. उपाध्यायदूतः **कान्** त्वरयति ?
19. सर्वत्रैव **कः** सञ्जातः ?
20. सा तपस्विनी मत्कृतेन **केन** स्वापत्यमेव भणति ?

21. रे राजहंस ! भवता **का** भुक्ता ?
22. तस्य **कस्य** केन कृत्येन कृतोपकार: त्वं भवितासि ?
23. जन: प्रभूतानि **कानि** इच्छति ?
24. अवक्रता यथा **कुत्र** / **कस्मिन्** अस्ति ?
25. सः **केभ्य:** अपि विशेष: भवति ?
26. मनुष्यः **कस्य** श्रेयः इच्छति ?
27. जन: अहितं **किं** न कुर्यात् ?
28. भारवत: शवस्य स्कन्धेन वहनं **कीदृशम्** / **कथाम्** आसीत् ?
29. **केन** / **कथं** संचलन् सायम् अभवत् ?
30. निशान्धकारे **का** न शुभावहा ?
31. सः **कया** / **किमर्थं** क्रन्दति स्म ?
32. **कौ** नदीजलं पातुम् आगतौ ?
33. **क:** देहविनाशाय प्रथम: शत्रु: ?
34. मूर्खाः **कै:** सह अनुव्रजन्ति ?
35. अमन्त्रम् **किं** नास्ति ?
36. **केषां** प्रथम: शत्रु: क्रोध: अस्ति ?
37. लव: कुश: च **कौ** आस्ताम् ?
38. बालभावात् हिमकर: **कुत्र** / **कस्मिन्** विराजते ?
39. मां **कुत्र** / **कस्मिन्** बद्ध्वा चल सत्वरम् ?
40. **क:** श्रृगालेन सह पुन: आगच्छत् ?
41. पाषाणीसभ्यतायां **के** प्रस्तरतले पिष्टा: भवन्ति ?
42. चक्रं सदा **कथं** / **कीदृशं** भ्रमति ?
43. भवता भीमभानौ निदाघे **कया** पुष्टि: व्यरचि ?
44. मनुष्य: आत्मन: **किम्** इच्छति ?
45. तत्तनय: **किमर्थं** / **कस्मै** छात्रावासे वसति स्म ?
46. दुर्बलसुते **कस्या:** अत्यधिका कृपा ?
47. अहम् अत्र भवतो: **कं** नामतो वेदितुमिच्छामि ?
48. **कं** निजगले बद्ध्वा चल सत्वरम् ?
49. पाषाणीसभ्यतायाम् लतातरुगुल्मा: **कुत्र** / **कस्मिन्** पिष्टा: भवन्ति ?
50. **कौ** व्याघ्रभक्षणाय कलहं कुरुतः ?


अन्वयलेखनम्
भावार्थलेखनम्

# <u>अन्वयः भावार्थः च</u>

## **<u>(अ) अन्वयः</u>**

अन्वयः नाम कः ?

वयं पद्यानि (पद्यानि - श्लोकाः / सुभाषितानि / काव्यस्य अंशाः) पठामः। पद्यानां रचनायां सौन्दर्यवर्धनाय छन्दोनियमस्य अनुसरणाय च शब्दाः इतस्ततः सुस्थापितानि भवन्ति। तेषां शब्दानां क्रमानुसारं व्यवस्थापनमेव अन्वय: कथ्यते। अथवा पद्ये स्थितानां शब्दानां सामान्यवाक्यस्य इव क्रमीकरणम् एव अन्वयः भवति। अर्थात् सामान्यवाक्ये कर्तुः विशेषणानि अनन्तरं कर्तृपदं पुनः कर्मपदस्य विशेषणं तदनन्तरं कर्मपदं पुनः क्रियाविशेषणं तदनन्तरं क्रिया इति क्रमेण लेखनम् एव अन्वय: इति कथ्यते )

**सरलरीत्या अन्वयं कथं वयं कर्तुं शक्नुमः -**

**उदाहरणम् - 1**

प्रश्नः - 1 **आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।**

| शरीरस्थः, अवसीदति, बन्धुः, आलस्यम् |
|---|

<u>अन्वय:</u> - मनुष्याणां .................. महान् रिपु: .................. हि (अस्ति)
उद्यमसम: ................. नास्ति। यं कृत्वा (मानव:) न .................।

Step 1 : सर्वप्रथमं श्लोके सन्धिविच्छेदं कर्तुं प्रयत्नं कुर्मः -

प्रश्नः - 1 आलस्यं हि मनुष्याणां शरीरस्थः महान् रिपुः।
नास्ति उद्यमसमः बन्धुः कृत्वा यं न अवसीदति।।

Step 2 : सन्धिविच्छेदस्य अनन्तरं वयम् अन्वये विद्यमानानि पदानि श्लोकतः निष्कासयामः। तद्यथा –

प्रश्नः - 1 आलस्यं ~~हि मनुष्याणां~~ शरीरस्थः ~~महान् रिपुः~~।
~~नास्ति उद्यमसमः~~ बन्धुः ~~कृत्वा~~ ~~यं~~ ~~न~~ अवसीदति।।

| शरीरस्थः, अवसीदति, बन्धुः, आलस्यम् |
|---|

<u>अन्वय:</u> - मनुष्याणां .................. महान् रिपु: .................. हि (अस्ति)
उद्यमसम: ................. नास्ति। यं कृत्वा (मानव:) न .................।

यदा वयं एवंविधं कर्तनं कुर्मः तदा चत्वारि पदानि अवशिष्टानि भवन्ति। तानि च - आलस्यं, शरीरस्थः, बन्धुः, अवसीदति। (यदि वयम् एवं प्रकारेण विकल्पान् तान् क्रमेण यदा लिखामः तदा तत् सामान्यतः 90 प्रतिशतम् उत्तरं भविष्यति। तस्य उदाहरणम् अधः दीयते) अस्माकं कृते ये विकल्पाः प्राप्ताः तान् पश्यन्तु। समानानि पदानि एव विकल्पेषु अपि सन्ति। इदानीम् अन्वयं पश्यामः ।

अन्वयः - मनुष्याणां **शरीरस्थः** महान् रिपुः **आलस्यं** हि (अस्ति)
उद्यमसमः **बन्धुः** नास्ति। यं कृत्वा (मानवः) न **अवसीदति** ।

(इदम् अवगन्तव्यं यत् अन्वये कोष्ठकान्तर्गतानि पदानि (अस्ति/मानवः) वाक्यपूर्तये स्वीकृतानि सन्ति इति।)

**उदाहरणम् - 2**

**सम्पत्तौ च विपत्तौ च महतामेकरूपता।**
**उदये सविता रक्तः रक्तश्चास्तमये तथा ॥**

| उदये, सम्पत्तौ, रक्तः, एकरूपता |
|---|

अन्वयः - महतां ................. च विपत्तौ च ................. । सविता
................. रक्तः तथा अस्तमये च ................. (भवति)।

Step 1 : सर्वप्रथमं श्लोके सन्धिविच्छेदं कर्तुं प्रयत्नं कुर्मः -

प्रश्नः - 1 सम्पत्तौ च विपत्तौ च महताम् एकरूपता।
उदये सविता रक्तः रक्तः च अस्तमये तथा ॥

Step 2 : सन्धिविच्छेदस्य अनन्तरं वयम् अन्वये विद्यमानानि पदानि श्लोकतः निष्कासयामः। तद्यथा –

प्रश्नः - 1 सम्पत्तौ ~~च विपत्तौ च~~ ~~महताम्~~ एकरूपता।
उदये ~~सविता~~ ~~रक्तः~~ रक्तः ~~च~~ ~~अस्तमये तथा~~ ॥

| उदये, सम्पत्तौ, रक्तः, एकरूपता |
|---|

अन्वयः - महतां ................. च विपत्तौ च ................. । सविता
................. रक्तः तथा अस्तमये च ................. (भवति)।

* अवशिष्टानि पदानि – सम्पत्तौ, एकरूपता, उदये, रक्तः
(एतत् एव उत्तरम्, परिशोधयन्तु)

**<u>उत्तरम्</u>** - महतां **<u>सम्पत्तौ</u>** च विपत्तौ च **<u>एकरूपता</u>**। सविता
**<u>उदये</u>** रक्त: तथा अस्तमये च **<u>रक्त:</u>** (भवति)।

* किन्तु सम्यक् मनसि धारणीयं यत् 10 प्रतिशतं श्लोकेषु एषः उपायः न चलति इति। अतः अस्माभिः अन्वयं पूरयित्वा अर्थः समीचीनः एव वा इति द्रष्टव्यम्।

* विशेषनिर्देशः - कदाचित् अस्मिन् वर्षे अन्वयः विकल्पात्मक-प्रश्नः न स्यात्। अतः उपरि निर्दिष्टा प्रक्रिया अस्माभिः आश्रयणीया भवति।

**<u>(आ) भावार्थः</u>**

भावार्थः नाम कः ?

श्लोकस्य / सुभाषितस्य अर्थस्य लेखनम् एव भावार्थः इति उच्यते। अत्र इतस्ततः विद्यमानानां शब्दानां क्रमीकरणेन अर्थस्य कथनम् एव भावार्थः कथ्यते। तन्नाम श्लोके विद्यमानानां पदानां समानार्थकपदेन सह, यत्र यत्र विवरणं प्रदेयं तेनापि युक्तं वाक्यं च भवति भावार्थः नाम। भावार्थलेखने प्रश्नेन सह विकल्पाः सामान्यतः वयं प्राप्नुमः।

**यां रीतिं वयं अन्वये अनुसृतवन्तः, तां रीतिं भावार्थे अपि कर्तुं शक्नुमः वा इति पश्यामः -**

**उदाहरणम् - 1**

**प्रश्नः - 1** **अवक्रता यथा चित्ते तथा वाचि भवेत् यदि।**
**तदेवाहु: महात्मान: समत्वमिति तथ्यत:।।**

| महाजनाः, अकथयन्, मनसि, चित्ते |
|---|

भावार्थः - यथा .................. अवक्रता वर्तते तथा .................. अपि अस्ति चेत् .................. तं समत्वं इति ..................।।

Step 1 : सर्वप्रथमं श्लोके सन्धिविच्छेदं कर्तुं प्रयत्नं कुर्मः -

प्रश्नः - 1 अवक्रता यथा चित्ते तथा वाचि भवेत् यदि।
तत् एव आहुः महात्मान: समत्वम् इति तथ्यत:।।

Step 2 : सन्धिविच्छेदस्य अनन्तरं वयम् भावार्थे विद्यमानानि पदानि श्लोकतः निष्कासयामः। तद्यथा –

प्रश्नः - 1 ~~अवक्रता~~ ~~यथा~~ चित्ते ~~तथा~~ वाचि ~~भवेत्~~ ~~यदि~~।
~~तत्~~ ~~एव~~ आहुः महात्मान: समत्वम् इति ~~तथ्यत:~~।।

| महाजनाः, अकथयन्, मनसि, वचने |
|---|

भावार्थः -   यथा .................. अवक्रता वर्तते तथा .................. अपि अस्ति चेत्
तत् एव वास्तविकरूपेण .................. समत्वम् इति ..................।

किन्तु एवं पदानि निष्कासनीयानि तर्हि समीचीनतया श्लोकानाम् अर्थस्य ज्ञानम् आवश्यकम्। चत्वारि पदानि अवशिष्टानि सन्ति। तानि च - चित्ते, वाचि, आहुः, महात्मानः। विकल्पे विद्यमानैः समानार्थपदैः सह मेलयामः। चित्ते = मनसि, वाचि = वचने, आहुः = अकथयन्, महात्मानः = महाजनाः।

* अतः भावार्थे अपि उपरि दत्ता प्रक्रिया युज्यते।

**<u>इदानीम् एकैकं पाठं स्वीकृत्य अन्वयानां भावार्थानां च परिचयं प्राप्नुमः।</u>**

## <u>प्रथमः पाठः - शुचिपर्यावरणम्</u>

**अन्वयं भावार्थं च लिखत।**

**श्लोकः - 1**

**दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम्।**
**शुचि-पर्यावरणम्॥**
**महानगरमध्ये चलदनिशं कालायसचक्रम्।**
**मनः शोषयत् तनुः पेषयद् भ्रमति सदा वक्रम्॥**
**दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्॥**

<u>अन्वयः</u> -   अत्र जीवितं दुर्वहं जातम्। शुचि पर्यावरणं (भवेत्)। महानगरमध्ये अनिशं चलत् कालायसचक्रं मनः शोषयत् तनुः पेषयत् सदा वक्रं भ्रमति। अमुना दुर्दान्तैः दशनैः जनग्रसनं न एव स्यात्।

<u>भावार्थः</u> -   अत्र लोके जीवितं कठिनं जातम् अस्ति। शुद्धं पर्यावरणं स्यात्। महानगराणां मध्ये अहर्निशं चलत् कालायसचक्रं मानसं शोषयत् शरीरं पेषयत् सर्वदा वक्रं भमति। एतैः दुर्दान्तैः मानवानां विनाशः न भवेत्।

**श्लोकः - 2**

**कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्।**
**वाष्पयानमाला संधावति वितरन्ती ध्वानम्॥**
**यानानां पङ्क्तयो ह्यनन्ताः कठिनं संसरणम्॥**

<u>अन्वयः</u> -   शतशकटीयानं कज्जलमलिनं धूमं मुञ्चति। ध्वानं वितरन्ती वाष्पयानमालाः संधावति। यानानाम् अनन्ताः पङ्क्तयः हि। संसरणं कठिनम्।

भावार्थः - शतशः यन्त्रशकटानि कज्जलम् इव मलिनं धूमं मुञ्चति । रवं वितरन्ती धूमशकटानि संधावन्ति । वाहनानाम् अनन्ताः पङ्क्तयः सन्ति । सञ्चलनं कठिनं संजातम् अस्ति ।

**श्लोकः - 3**

**वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।**
**कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥**
**करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् ॥**

अन्वयः - (अत्र) वायुमण्डलं भृशं दूषितं, निर्मलं जलं (अपि) न (अस्ति), भक्ष्यं च कुत्सितवस्तुमिश्रितं (वर्तते), धरातलं समलं हि । अन्तः बहिः (च) बहु शुद्धीकरणं करणीयम् ।

भावार्थः - अस्मिन् नगरे वायुमण्डलं बहु दूषितं अस्ति। शुद्धं जलम् अपि नास्ति। भक्ष्यं च कुत्सितवस्तुमिश्रितं वर्तते। अपि च धरातलं समलं जातम् अस्ति। अतः अन्तः बहिः च बहु शुद्धीकरणं करणीयम् अस्ति।।

**श्लोकः - 4**

**कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम् ।**
**प्रपश्यामि ग्रामान्ते निर्झर-नदी-पयःपूरम् ॥**
**एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् ॥**

अन्वयः - कञ्चित् कालं माम् अस्मात् नगरात् बहुदूरं नय । ग्रामान्ते निर्झर-नदी-पयःपूरं प्रपश्यामि । एकान्ते कान्तारे क्षणम् अपि मे सञ्चरणं स्यात् ।

भावार्थः - त्वं कञ्चित् कालं माम् अस्मात् नगरात् बहुदूरं नय । ग्रामस्य अन्ते निर्झराणां नदीनां च तडागं च पश्यामि । एकान्ते वने किञ्चित् कालं मम संचरणं स्यात् ।

**श्लोकः - 5**

**हरिततरुणां ललितलतानां माला रमणीया ।**
**कुसुमावलिः समीरचालिता स्यान्मे वरणीया ॥**
**नवमालिका रसालं मिलिता रुचिरं संगमनम् ॥**

अन्वयः - हरिततरूणां ललितलतानां माला रमणीया । समीरचालिता कुसुमावलिः मे वरणीया स्यात् । नवमालिका रसालं मिलिता । (तयोः) संगमनं रुचिरम् ।

भावार्थः - हरिततरूणां ललितानां लतानं च माला रमणीया अस्ति। समीरेण चालिता कसुमानाम् आवलिः मे वरणीया स्यात्। कुसुमिता नवमालिका आम्रैः सह मिलिता। आम्रवृक्षस्य नवमालिकाया: च संगमनं अतीव रुचिप्रदं वर्तते।

**श्लोकः - 6**

**अयि चल बन्धो! खगकुलकलरवगुञ्जितवनदेशम्।**
**पुरकलरवसम्भ्रमितजनेभ्यो धृतसुखसन्देशम्॥**
**चाकचिक्यजालं नो कुर्याज्जीवितरसहरणम्॥**

अन्वयः - अयि बन्धो! (त्वं) खगकुल-कलरव-गुञ्जित-वनप्रदेशं चल। पुर-कलरव-संभ्रमति-जनेभ्यः धृतसुखसन्देशं , चाकचिक्यजालं जीवितरसहरणं न कुर्यात्॥

भावार्थः - हे बन्धो! त्वं पक्षिणां समूहस्य कलरवैः गुञ्जितं वनप्रदेशं गच्छ। नगरे विद्यमानैः शब्दकोलाहलैः संभ्रमितजनेभ्यः जीवने सुखसन्देशं देहि। नगरस्य चाकचिक्य-जालं जीवितस्य रसहरणं न कुर्यात्।

**श्लोकः - 7**

**प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टाः।**
**पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा॥**
**मानवाय जीवनं कामये नो जीवन्मरणम्॥**

अन्वयः - लतातरुगुल्माः प्रस्तरतले पिष्टाः नो भवन्तु। निसर्गे पाषाणी सभ्यता समाविष्टा न स्यात्। मानवाय जीवनं कामये जीवन्मरणं न (कामये)।

भावार्थः - लताः वृक्षाः सस्यानि च पाषाणानां तले पिष्टाः न भवन्तु। प्रकृत्यां पाषाणी संस्कृतिः समाविष्टा न भवेत्। मानवाय जीवनं कामये, न तु जीवन्मरणम्।

## द्वितीयः पाठः – बुद्धिर्बलवती सदा

**श्लोकः - 1**

**निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी।**
**अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात्॥**

अन्वयः - सा भामिनी निजबुद्ध्या व्याघ्रस्य भयात् विमुक्ता (अभवत्)। अन्यः बुद्धिमान् अपि लोके महतः भयात् मुच्यते।

भावार्थः - सा स्त्री स्वबुद्धिशक्त्या व्याघ्रस्य भयात् विमुक्ता जाता। अन्यः बुद्धिमान् जनः अपि अस्मिन् लोके एवमेव स्वबुद्ध्या महतो भयात् मुच्यते।

**श्लोकः - 2**

**रे रे धूर्त त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा।**
**विश्वास्याद्यैकमानीय कथं यासि वदाधुना ।।**
**इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा।**
**व्याघ्रोऽपि सहसा नष्टः गलबद्धशृगालकः ।।**

अन्वयः - रे रे धूर्त! पुरा त्वया मह्यं व्याघ्रत्रयं दत्तम्। विश्वास्य अद्य एकम् आनीय कथं यासि इति अधुना वद। इति उक्त्वा भयङ्करा व्याघ्रमारी तूर्णं धाविता। गलबद्ध-शृगालकः व्याघ्रः अपि सहसा नष्टः। हे तन्वि! सर्वदा सर्वकार्येषु बुद्धिः बलवती।

भावार्थः - हे धूर्त! त्वं मह्यं पुरा व्याघ्रत्रयं दत्तवान्। किन्तु विश्वासं दत्त्वा अपि अद्य एकं व्याघ्रम् आनीय कथं गच्छसि इति इदानीं त्वं वद - इति उक्त्वा भीकरा व्याघ्रमारी शीघ्रं धावितवती। गलबद्धशृगालकः व्याघ्रः अपि सहसा विनष्टः जातः। हे तन्वि! सर्वदा सर्वेषु कार्येषु बुद्धिः बलवती भवति।

## तृतीयः पाठः - शिशुलालनम्

**श्लोकः - 1**

**भवति शिशुजनो वयोऽनुरोधाद्**
**गुणमहतामपि लालनीय एव।**
**व्रजति हिमकरोऽपि बालभावात्**
**पशुपति-मस्तक-केतकच्छदत्वम् ।।**

अन्वयः - शिशुजनः वयोऽनुरोधात् गुणमहताम् अपि लालनीयः एव भवति। (यथा) हिमकरः अपि बालभावात् पशुपति-मस्तक-केतकच्छदत्वम् व्रजति।

भावार्थः - यथा चन्द्रः अपि भगवतः शंकरस्य मस्तके केतकस्य पुष्पवत् स्वकीय-बालस्वभावात् उपविशति तथा कोऽपि बालकः वयसः कारणात् गुणैः महतां जनानां लालनीयः एव भवति।

**श्लोकः - 2**

**भवन्तौ गायन्तौ कविरपि पुराणो व्रतनिधिर्**
**गिरां सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।**
**कथा चेयं श्लाघ्या सरसिरुहनाभस्य नियतं**
**पुनाति श्रोतारं रमयति च सोऽयं परिकरः ।।**

अन्वयः - भवन्तौ गायन्तौ (स्तः), कविः अपि पुराणः व्रतनिधिः (अस्ति), अयं गिरां सन्दर्भः प्रथमं वसुमतीम् अवतीर्ण:, इयं सरसीरुहनाभस्य कथा श्लाघ्या च , सः च अयं परिकरः नियतं श्रोतारं पुनाति रमयति च ।

भावार्थः - भवन्तौ लवकुशकुमारौ गायन्तौ स्तः, अस्य काव्यस्य कर्ता कविः अपि पुराणः व्रतनिधिः च अस्ति । अयं गिरां संदर्भ: प्रथमं वसुमतीम् अवतीर्ण: । महाविष्णोः इयं कथा श्लाघनीया एव । अयं परिकरः च निश्चयेन श्रोतारं पवित्रीकरोति सन्तोषयति च ।

## <u>चतुर्थः पाठः - जननी तुल्यवत्सला</u>

**श्लोकः - 5**

**विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिप! ।**
**अहं तु पुत्रं शोचामि, तेन रोदिमि कौशिक! ।।**

<u>अन्वयः</u> - हे त्रिदशाधिप! वः विनिपातः कश्चित् न दृश्यते । अहं तु पुत्रं शोचामि । हे कौशिक! तेन रोदिमि ।

<u>भावार्थः</u> - हे देवेन्द्र, अस्माकं विनाशः केनापि न दृश्यते । अहं तु मम पुत्रं दृष्ट्वा दुःखिता अस्मि । हे इन्द्र! तेन कारणेन अहं रोदिमि ।

**श्लोकः - 6**

**यदि पुत्रसहस्रं मे, सर्वत्र सममेव मे ।**
**दीनस्य तु सतः शक्र! पुत्रस्याभ्यधिका कृपा ।।**

<u>अन्वयः</u> - यदि (अपि) मे पुत्रसहस्रं (अस्ति) (तथापि) सर्वत्र मे समम् एव। हे शक्र! दीनस्य पुत्रस्य सतः तु (मातुः) अभ्यधिका कृपा (भवति) ।

<u>भावार्थः</u> - यद्यपि मम सहस्रं पुत्राः सन्ति तथापि सर्वेषु पुत्रेषु मम समाना प्रीतिः अस्ति । हे इन्द्र! किन्तु दीने पुत्रे तु मातुः अधिका कृपा संभवति ।

## <u>षष्ठः पाठः - सुभाषितानि</u>

**अन्वयं भावार्थं च लिखत ।**

**श्लोकः - 1**

**आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।**
**नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति।।**

अन्वय: - मनुष्याणां शरीरस्थ: महान् रिपु: आलस्यं हि (अस्ति) । उद्यमसम: बन्धु: नास्ति। यं कृत्वा (मानव:) न अवसीदति ।

भावार्थ: - मनुष्याणां शरीरे स्थित: महान् शत्रु: अलसता एव। परिश्रमसमानम् मित्रं नास्ति। परिश्रमं कृत्वा नरा: दु:खिता: न भवन्ति ।

**श्लोक: - 2**

**गुणी गुणं वेत्ति न वेत्ति निर्गुण:। बली बलं वेत्ति न वेत्ति निर्बल: ।**
**पिको वसन्तस्य गुणं न वायस:। करी च सिंहस्य बलं न मूषक:॥**

अन्वय: - गुणी गुणं वेत्ति, निर्गुण: न वेत्ति । बली बलं वेत्ति, निर्बल: न वेत्ति । पिक: वसन्तस्य गुणं वेत्ति, वायस: न वेत्ति । करी च सिंहस्य बलं (वेत्ति) मूषक: न वेत्ति ।

भावार्थ: - गुणवान् गुणस्य महत्त्वं जानाति। निर्गुण: मनुष्य: गुणस्य महत्त्वं न जानाति। बलवान् बलस्य महत्त्वं जानाति, निर्बलः मनुष्यः बलस्य महत्त्वं न जानाति। कोकिल: वसन्तस्य महत्वं जानाति, काक: वसन्तस्य महत्वं न जानाति। गज: सिंहस्य बलं जानाति, मूषक: न जानाति ।

**श्लोक: - 3**

**निमित्तमद्दिश्य य: प्रकुप्यति ध्रुवं स: तस्यापगमे प्रसीदति।**
**अकारणद्वेषिमनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति।।**

अन्वय: - य: निमित्तं उद्दिश्य प्रकुप्यति, ध्रुवं स: तस्य अपगमे प्रसीदति। यस्य मन: अकारणद्वेषि (अस्ति) सः जन: तं कथं परितोषयिष्यति ।

भावार्थ: - य: मनुष्य: कारणवशात् क्रुद्ध: भवति स: तस्य कारणस्य निवारणेन सन्तुष्ट: भविष्यति। किन्तु य: कारणं विना क्रुद्ध: भवति, तं सन्तुष्टं कर्तुं कोऽपि न शक्नोति ।

**श्लोक: - 4**

**उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिता:।**
**अनुक्तमप्यूहति पण्डितो जन: परेङ्गितजानफला: हि बुद्धय:॥**

अन्वय: - पशुना अपि उदीरित: अर्थ: गृह्यते। हया: च नागा: च बोधिता: वहन्ति। पण्डित: जन: अनुक्तम् अपि ऊहति। परेङ्गितजानफला: हि बुद्धय: ।

भावार्थ: - उदीरितं अर्थं पशु: अपि जानाति। अश्वा: गजा: च मार्गदर्शनेन भारं वहन्ति। पण्डित: जन: अकथितं अर्थं अपि ऊहति। बुद्धिमान् जन: अन्येषां हृदयभावमपि जानाति ।

**श्लोक: - 5**

**क्रोधो हि शत्रु: प्रथमो नराणां देहस्थितो देहविनाशनाय ।**
**यथास्थित: काष्ठगतो हि वह्नि: स एव वह्निर्दहते शरीरम् ॥**

अन्वय: - नराणां देहविनाशनाय प्रथम: शत्रु: देहस्थित: क्रोध: हि। यथा काष्ठगत: स्थित: वह्नि: काष्ठं दहते (तथा) एव (शरीरस्थितः) स: (क्रोध:) शरीरं (दहते) ।

**श्लोक: - 6**

**मृगा: मृगै: सङ्गमनुव्रजन्ति, गावश्च गोभि: तुरगास्तुरङ्गै: ।**
**मूर्खाश्च मूर्खै: सुधिय: सुधीभि: ,समानशीलव्यसनेषु सख्यम् ।**

अन्वय: - मृगा: मृगै: सह, गावश्च गोभि: सह, तुरगा: तुरङ्गै:: सह, मूर्खा: च मूर्खै: सह, सुधिय: सुधीभि: सह, सङ्गं अनुव्रजन्ति । समानशील-व्यसनेषु सख्यं (भवति) ।

भावार्थ: - मृगा: मृगै: सह, गावश्च गोभि:, तुरगा: तुरङ्गै:, मूर्खा: च मूर्खै: सह, सुधिय: सुधीभि: सह मैत्रीं स्थापयन्ति । समानशीलव्यसनेषु मित्रता भवति ।

**श्लोक: - 7**

**सेवितव्यो महावृक्ष: फलच्छायासमन्वित:।**
**यदि दैवात् फलं नास्ति छाया केन निवार्यते।।**

अन्वय: - फलच्छायासमन्वित: महावृक्ष: सेवितव्य:। यदि दैवात् फलं नास्ति छाया केन निवार्यते।

भावार्थ: - फलेन छायया च सहित: महावृक्ष: आश्रययोग्य: अस्ति। दैवात् (भाग्यात्) फलं नास्ति चेत् अपि छाया केन निवारयितुं शक्यते।

**श्लोक: - 8**

**अमन्त्रमक्षरं नास्ति नास्ति मूलमनौषधम्।**

**अयोग्य: पुरुषो नास्ति योजकस्तत्र दुर्लभ:।।**

अन्वय: - अमन्त्रम् अक्षरं नास्ति, अनौषधं मूलं नास्ति, अयोग्य: पुरुष: नास्ति, योजक: तत्र दुर्लभ: (अस्ति) ।

भावार्थ: - मन्त्ररहितं अक्षरं नास्ति, औषधरहितं मूलमपि नास्ति अयोग्य: जन: अपि नस्ति। योजका: दुर्लभा: सन्ति ।

**श्लोक: - 9**

**सम्पत्तौ च विपत्तौ च महतामेकरूपता।**

**उदये सविता रक्त: रक्तश्चास्तमये तथा ॥**

अन्वय: - महतां सम्पत्तौ च विपत्तौ च एकरूपता। यथा सविता उदये रक्त: तथा अस्तमये च रक्त: (भवति) ।

भावार्थ: - यथा सूर्य: उदयसमये अरुण: अस्तसमये च अरुण: एव अस्ति तथा महाजनानां सम्पन्नतायां तथा विपन्नतायां समानरूपता वर्तते ।

**श्लोक: - 10**

**विचित्रे खलु संसारे नास्ति किंचिन्निरर्थकम्।**

**अश्वश्चेद् धावने वीर: भारस्य वहने खर: ॥**

अन्वय: - विचित्रे संसारे खलु किंचित् निरर्थकं नास्ति । अश्व: चेत् धावने वीर:, खर: भारस्य वहने (वीर: अस्ति) ।

भावार्थ: - अस्मिन् संसारे किमपि अर्थशून्यं नास्ति। अश्व: धावने उपयुक्त: अस्ति। गर्दभ: च भारवहने च उपयुक्त: अस्ति ।

## सप्तम: पाठ: - सौहार्द्रं प्रकृते: शोभा

**श्लोक: - 1**

**यो न रक्षति वित्रस्तान् पीड्यमानान् परै सदा ।**

**जन्तून् पर्थिवरूपेण स कृतान्तो न संशय:।।**

अन्वय: - य: परै: वित्रस्तान् पीड्यमानान् जन्तून् पर्थिवरूपेण न रक्षति, स कृतान्त:, संशय: न ।

भावार्थः - य: राजा शत्रुभि: पीडितान् भयाकुलान् जनान् न रक्षति, स: जनानां कृते यमराज: भवति ।

**श्लोक: - 2**

**काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो:।**
**वसन्तसमये प्राप्ते काक: काक: पिक: पिक:॥**

अन्वय: - काक: कृष्ण:, पिक: कृष्ण:, पिककाकयो: क: भेद:? वसन्तसमये प्राप्ते, काक: काक: (अस्ति) पिक: पिक: (अस्ति) ।

भावार्थ: - काक: कृष्णवर्ण: अस्ति। कोकिल: अपि कृष्णवर्ण: अस्ति। किन्तु वसन्तकाले काकस्य विशेषता नास्ति, किन्तु कोकिल: मधुरं गायति ।

**श्लोक: - 3**

**यदि न स्यात् नरपति: सम्यक् नेता तत: प्रजा ।**
**अकर्णधाराजलधौ विप्लवेतेह नौरिव ॥**

अन्वय: - यदि नरपति: सम्यक् नेता न स्यात्, तत: प्रजा अकर्णधारा नौः इव इह जलधौ विप्लवेत् ।

भावार्थ: - यदि राजा उत्तमः शासनकर्ता नास्ति तर्हि जना: , नाविकरहिता नौका इव समुद्रजले नश्यति ।

**श्लोक: - 4**

**स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम्।**
**उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति॥**

अन्वय: - स्वभावरौद्रं अत्युग्रं क्रूरं अप्रियवादिनम् उलूकं नृपतिं कृत्वा का नु सिद्धिः भविष्यति ?

भावार्थ: - स्वभवेन भयानकं दयाहीनं अप्रियवादिनं उलूकं राजानं कृत्वा का सफलता भविष्यति ?

**श्लोक: - 5**

**ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति।**
**भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम्॥**

अन्वय: - ददाति, प्रतिगृह्णाति ,गुह्यम् आख्याति, पृच्छति, भुङ्क्ते, भोजयते च षड्विधं एव प्रीतिलक्षणम् ।

भावार्थ: - ददाति, स्वीकरोति, रहस्यं वदति, पृच्छति, खादति भोजयते। एतानि षट् स्नेहस्य लक्षणानि भवन्ति ।

**श्लोक: - 6**

**प्रजासुखे सुखं राज्ञ: प्रजानां च हिते हितम्।**
**नात्मप्रियं हितं राज्ञ: प्रजानां तु प्रियं हितम्।।**

अन्वय: - प्रजासुखे राज्ञ: सुखं प्रजानां हिते च हितम्। आत्मप्रियं राज्ञ: हितं न, प्रजानां प्रियं तु हितम् ।

भावार्थ: - जनानां सुखे एव नृपस्य सुखं अस्ति। जनानां हिते एव नृपस्य हितम्। आत्मन: प्रियं नृपस्य हितकरं नास्ति। जनानां प्रियं एव नृपस्य हितकरम् ।

**श्लोक: - 7**

**अगाधजलसंचारी न गर्वं याति रोहित:।**
**अंगुष्ठोदकमात्रेण शफरी फुर्फुरायते।।**

अन्वय: - अगाधजलसंचारी रोहित: न गर्वं याति । अंगुष्ठोदकमात्रेण शफरी फुर्फुरायते ।

भावार्थः - गहने जले जीवमान: रोहितमत्स्य: गर्वित: नास्ति। किन्तु अंगुष्ठमात्रजले लघुमत्स्य: गर्वेण शब्दं करोति ।

**श्लोक: - 8**

**प्रणिनां जायते हानि: परस्परविवादत:।**
**अन्योन्यसहयोगेन लाभस्तेषां प्रजायते।।**

अन्वय: - परस्परविवादत: प्राणिनां हानि: जायते। अन्योन्यसहयोगेन तेषां लाभ: प्रजायते ।

भावार्थः - परस्परविवादेन जीविनां नाश: संभवति। अन्योन्य सहकरणेन सर्वेषां लाभ: भविष्यति।

---

# नवम: पाठ: – सूक्तय:

**श्लोक: - 1**

**पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिता अस्य किम् तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।**

अन्वय: - पिता बाल्ये पुत्राय महत् विद्याधनं यच्छति । अस्य पिता कि तप: तेपे इति उक्ति: तत्कृतज्ञता ।

भावार्थः - पिता बाल्यावस्थायां पुत्राय महत्त्वपूर्णं विद्याधनं यच्छति। अस्य पुत्रस्य पिता पुत्राय महतीं तपस्यां अकरोत्" इति वचनं अपि तत्कृतज्ञता भवति ।

**श्लोक: - 2**

**अवक्रता यथा चित्ते तथा वाचि भवेत् यदि ।**
**तदेवाहु: महात्मान: समत्वमिति तथ्यत:।।**

अन्वय: - यथा अवक्रता चित्ते तथा वाचि यदि भवेत् महात्मान: तदेव तथ्यत: समत्वं इति आहु: ।

भावार्थः - यथा मनसि अवक्रता वर्तते तथा वचने अपि अस्ति चेत् महाजना: तं समत्वं इति अकथयन् ।

**श्लोक: - 3**

**त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत्।**
**परित्यज्य फलम् पक्वं भुङ्क्तेऽपक्वं विमूढधी:।।**

अन्वय: - य: धर्मप्रदां वाचं त्यक्त्वा परुषां अभ्युदीरयेत् (स:) विमूढधी: पक्वं फलं परित्यज्य अपक्वं फलं भुङ्क्ते ।

भावार्थः - य: नर: धर्मसहितवचनानि परित्यज्य कठिनं वचनं वदति, स: मूर्ख: इव पक्वं फलं परित्यज्य अपक्वं फलं खादति ।

**श्लोक: - 4**

**विद्वांस: एव लोके अस्मिन् चक्षुष्मन्त: प्रकीर्तिता:।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते।।**

अन्वय: - अस्मिन् लोके विद्वांस: एव चक्षुष्मन्त: प्रकीर्तिता:। अन्येषां वदने ये ते तु चक्षुर्नामनी मते ।

भावार्थः - अस्मिन् लोके पण्डिता: जना: नेत्रसहिता: इति प्रकीर्तिता:। अन्येषां जनानां मुखे ये नेत्रे स्त: ते नाममात्रेण नेत्रे एव भवतः।।

**श्लोक: - 5**

**यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णय:।**
**कर्तुं शक्यो भवेद्येन स: विवेक: इतीरित:।।**

अन्वय: - येन केन अपि यत् प्रोक्तं तस्य तत्त्वार्थस्य निर्णय: येन कर्तुं शक्य: भवेत् स: विवेक: इति ईरित:।।

भावार्थः - येन केनापि यत् किमपि उक्तं तस्य यथार्थ-अर्थस्य निर्णय: येन क्रियते स: "विवेक:" इति कथ्यते।।

**श्लोक: - 6**

**वाक्पटुर्धैर्यवान् मन्त्री सभयामप्यकातर:।**
**स: केनापि प्रकारेण परैर्न परिभूयते।।**

अन्वय: - (य:) मन्त्री वाक्पटु: धैर्यवान् सभायां अपि अकातर: (अस्ति) स: परै: केन अपि प्रकारेण न परिभूयते ।

भावार्थः - य: मन्त्री भाषणे चतुरः, धैर्यशाली सभायां भयरहित: अस्ति स: अन्यै: पराजित: न भवति ।

**श्लोक: - 7**

**य: इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च।**
**न कुर्यदहितं कर्म स परेभ्य: कदापि च।।**

अन्वय: - य: आत्मन: श्रेय: प्रभूतानि सुखानि च इच्छति स: परेभ्यः अहितं कर्म कदापि न कुर्यात् ।

भावार्थः - य: मनुष्य: आत्मन: प्रगतिं तथा बहु सुखं च इच्छति स: अन्येभ्य: दूषितं कार्यं न कुर्यात् ।

**श्लोक: - 8**

**आचार: प्रथमो धर्म: इत्येतत् विदुषां वच:।**
**तस्मात् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत:।।**

अन्वय: - आचार: प्रथम: धर्म: इति एतत् विदुषां वच:। तस्मात् प्राणेभ्य: अपि सदाचारं विशेषत: रक्षेत् ।

भावार्थः - आचार: प्रथम: धर्म: अस्ति, एवं वदन्ति विद्वांसः जना: । अत: प्राणेभ्य: अपि विशेषरूपेण सदाचार: संरक्षणीय: ।

## द्वादशः पाठः - अन्योक्तयः

**श्लोकः - 1**

**एकेन राजहंसेन या शोभा सरसो भवेत्।**
**न सा बकसहस्रेण परितस्तीरवासिना।।**

अन्वयः - एकेन राजहंसेन सरसः या शोभा भवेत्, परितः तीरवासिना बकसहस्रेण सा (शोभा) न (भवति) ।।

भावार्थः - एकस्य राजहंसस्य सहवासेन तडागस्य (नद्याः) या शोभा भवेत्, सा शोभा तडागं परितः विद्यमानैः बकसहस्रेण संभवः नास्ति।

**श्लोकः - 2**

**भुक्ता मृणालपटली भवता निपीता**
**न्यम्बूनि यत्र नलिनानि निषेवितानि।**
**रे राजहंस! वद तस्य सरोवरस्य,**
**कृत्येन केन भवितासि कृतोपकारः।।**

अन्वयः - यत्र भवता मृणालपटली भुक्ता, अम्बूनि निपीतानि नलिनानि निषेवितानि, रे राजहंस! तस्य सरोवरस्य केन कृत्येन कृतोपकारः भविता असि, वद ।

भावार्थः - यत्र भवता कमलनालानां समूहं खादिता, जलं पीतं, कमलानि खादितानि, हे राजहंस! तस्य तडागस्य केन कर्मणा त्वं प्रत्युपकारं करिष्यसि, वद ।

**श्लोकः - 3**

**तोयैरल्पैरपि करुणया भीमभानौ निदाघे,**
**मालाकार! व्यरचि भवता या तरोरस्य पुष्टिः।**
**सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां,**
**धारासारानपि विकिरता विश्वतो वारिदेन।।**

अन्वयः - हे मालाकार! भीमभानौ निदाघे अल्पैः तोयैः अपि भवता करुणया अस्य तरोः या पुष्टिः व्यरचि, वारां प्रावृषेण्येन विश्वतः धारासारान् अपि विकिरता वारिदेन इह जनयितुं सा (पुष्टिः) किं शक्या।।

भावार्थः - हे उद्यानपालक! अतिग्रीष्मकाले अल्पेन जलेन अपि करुणया अस्य वृक्षस्य यत् पोषणं त्वया कृतम्, वर्षाकाले परितः जलानां प्रवर्षणेन जलधारान् अपि विकिरता तेन मेघेन अत्र सा पुष्टिः कर्तुं शक्या किम्?

**श्लोकः - 4**

**आपेदिरेऽम्बरपथं परितः पतङ्गाः,**
**भृङ्गा रसालमुकुलानि समाश्रयन्ते।**
**सङ्कोचमञ्चति सरस्त्वयि दीनदीनो,**
**मीनो नु हन्त कतमां गतिमभ्युपैतु॥**

अन्वयः - पतङ्गाः परितः अम्बरपदम् आपेदिरे, भृङ्गाः रसालमुकुलानि समाश्रयन्ते । हे सरः! त्वयि सङ्कोचम् अञ्चति, हन्त दीनदीनः मीनः नु कतमां गतिम् अभ्युपैतु ।

भावार्थः - पक्षिणः परितः आकाशमार्गं प्राप्तवन्तः सन्ति। भ्रमराः आम्रपुष्पाणि समाश्रितानि सन्ति । हे सरोवर! त्वं यदा शुष्कतां याति तदा निराश्रितः दीनः च मीनः कतमां गतिं प्राप्नोतु ?

**श्लोकः - 5**

**एक एव खगो मानी वने वसति चातकः।**
**पिपासितो वा म्रियते याचते वा पुरन्दरम्॥**

<u>अन्वयः</u> - एकः एव मानी खगः चातकः वने वसति, वा पिपासितः म्रियते पुरन्दरं याचते वा ।

<u>भावार्थः</u> - एकः एव स्वाभिमानी पक्षी चातकः वने वसति, यः पिपासितः सन् मरणं प्राप्नोति अथवा देवेन्द्रं वर्षाजलस्य याचनां करोति ।

**श्लोकः - 6**

**आश्वास्य पर्वतकुलं तपनोष्णतप्त**
**मुद्दामदावविधुराणि च काननानि।**
**नानानदीनदशतानि च पूरयित्वा,**
**रिक्तोऽसि जलद! सैव तवोत्तमा श्रीः॥**

<u>अन्वयः</u> - तपनोष्णतप्तं पर्वतकुलम् आश्वास्य उद्दामदावविधुराणि काननानि च (आश्वास्य) नानानदीनदशतानि पूरयित्वा च हे जलद! यत् रिक्तः असि तव सा एव उत्तमा श्रीः ।

<u>भावार्थः</u> - सूर्यतापेन तप्तं पर्वतानां समूहं आश्वास्य उन्नतवृक्षरहितानि वनानि आश्वास्य अनेक-नदीः तडागादीन् च जलैः पूरयित्वा च हे मेघ! त्वं रिक्तः जातः असि तस्याम् अवस्थायाम् अपि त्वं शोभते॥

**श्लोकः - 7**

**रे रे चातक! सावधानमनसा मित्र क्षणं श्रूयता-**
**मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः।**
**केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा,**
**यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः॥**

<u>अन्वयः</u> - रे रे मित्र चातक! सावधानमनसा क्षणं श्रूयताम्, गगने हि बहवः अम्भोदाः सन्ति, सर्वे अपि एतादृशाः न (सन्ति), केचित् धरणीं वृष्टिभिः आर्द्रयन्ति, केचित् वृथा गर्जन्ति, (त्वं) यं यं पश्यसि तस्य तस्य पुरतः दीनं वचः मा ब्रूहि॥

<u>भावार्थः</u> - हे हे मित्र चातक! सावहितमनसा क्षणं शृणुत, आकाशे निश्चयेन बहवः मेघाः सन्ति, सर्वे अपि ईदृशाः न सन्ति, केचित् भूमिं वृष्टिजलैः आर्द्रयन्ति, केचित् च वृथा शब्दघोषं कुर्वन्ति, त्वम् अपि यं यं पश्यसि तं तं स्वदीनकथां न श्रावय ॥

## <u>अन्वयलेखनस्य अभ्यासार्थं प्रश्नाः</u>

**प्रश्नः 1** **उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिताः ।**
**अनुक्तमप्यूहति पण्डितो जनः परेङ्गितजानफलाः हि बुद्धयः ॥**

<u>अन्वयः</u> - पशुना अपि .................. अर्थः गृह्यते। हयाः च .................. च बोधिताः वहन्ति। पण्डितः जनः ............ अपि ऊहति। परेङ्गितजानफलाः हि ......... ।

**प्रश्नः 2** **स्वभावरौद्रमत्युग्रं क्रूरमप्रियवादिनम्।**
**उलूकं नृपतिं कृत्वा का नु सिद्धिर्भविष्यति ॥**

अन्वयः - .................. अत्युग्रं क्रूरं .................. उलूकं नृपतिं .................. का नु सिद्धिः .................. ?

**प्रश्नः 3** **प्रणिनां जायते हानि: परस्परविवादत: ।**
**अन्योन्यसहयोगेन लाभस्तेषां प्रजायते ।।**

अन्वय: - परस्परविवादत: .................. हानि: ..................। अन्योन्यसहयोगेन .................. लाभ: .................. ।

**प्रश्नः 4** **पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।**
**पिता अस्य किम् तपस्तेपे इत्युक्तिस्तत्कृतज्ञता।।**

अन्वय: - पिता बाल्ये .................. महत् विद्याधनं .................. । अस्य .................. कि तप: तेपे इति उक्ति: .................. ।

**प्रश्नः 5** **विद्वांस: एव लोके अस्मिन् चक्षुष्मन्त: प्रकीर्तिता: ।**
**अन्येषां वदने ये तु ते चक्षुर्नामनी मते ।।**

अन्वय: - अस्मिन् लोके .................. एव चक्षुष्मन्त: ..................। अन्येषां ..................ये ते तु .................. मते ।

**प्रश्नः 6** **य: इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च ।**
**न कुर्यदहितं कर्म स परेभ्य: कदापि च ।।**

अन्वय: - य: आत्मन: .................. प्रभूतानि सुखानि च .................. स: परेभ्यः अहितं .................. कदापि न .................. ।

## भावार्थलेखनस्य अभ्यासार्थं प्रश्नाः

**प्रश्नः 1** **काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो: ।**
**वसन्तसमये प्राप्ते काक: काक: पिक: पिक: ।।**

| कृष्णवर्णः, वसन्तकाले, कोकिलः, काकः |
|---|

भावार्थ: - ............... कृष्णवर्ण: अस्ति। कोकिल: अपि ............... अस्ति। किन्तु ............... काकस्य विशेषता नास्ति, किन्तु ...............मधुरं गायति।।

**प्रश्नः 2 क्रोधो हि शत्रुः प्रथमो नराणां देहस्थितो देहविनाशनाय।**

**यथास्थितः काष्ठगतो हि वह्निः स एव वह्निर्दहते शरीरम् ॥**

| सुधियः, मृगैः, मित्रता, तुरगाः |
|---|

भावार्थः - मृगाः ............... सह, गावश्च गोभिः, ............... तुरङ्गैः, मूर्खाः च मूर्खैः सह, ............... सुधीभिः सह मैत्रीं स्थापयन्ति । समानशीलव्यसनेषु ............... भवति।

**प्रश्नः 3 यो न रक्षति वित्रस्तान् पीड्यमानान् परै सदा।**

**जन्तून् पर्थिवरूपेण स कृतान्तो न संशयः ॥**

| भयाकुलान्, रक्षति, राजा, यमराजः |
|---|

भावार्थः - यः ................ शत्रुभिः पीडितान् ................ जनान् न ................, सः जनानां कृते ................ भवति।

**प्रश्नः 4 प्रजासुखे सुखं राज्ञः प्रजानां च हिते हितम्।**

**नात्मप्रियं हितं राज्ञः प्रजानां तु प्रियं हितम् ॥**

| प्रियं, हितकरं, जनानां, नृपस्य |
|---|

भावार्थः - ................ सुखे एव नृपस्य सुखं अस्ति। जनानां हिते एव ................ हितम्। आत्मनः प्रियं नृपस्य ................ नास्ति। जनानां ................ एव नृपस्य हितकरम्॥

**प्रश्नः 5 आचारः प्रथमो धर्मः इत्येतत् विदुषां वचः।**

**तस्मात् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥**

| प्राणेभ्यः, विद्वांसः, सदाचारः, प्रथमः |
|---|

भावार्थः - आचारः ................. धर्मः अस्ति, एवं वदन्ति ................. जनाः। अतः ................. अपि विशेषरूपेण ................. संरक्षणीयः।

**प्रश्नः 6 वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातरः।**

**सः केनापि प्रकारेण परैर्न परिभूयते ।।**

| धैर्यवान्, पराजितः, मन्त्री, भयरहितः |
|---|

भावार्थः - यः ................. भाषणे चतुरः, ................. सभायां ................. च अस्ति

सः अन्यैः ................. न भवति।

## अभ्यासप्रश्नानाम् उत्तरकुञ्चिका

**अन्वयः -**

| | | | | |
|---|---|---|---|---|
| प्रश्नः 1 | 1) उदीरतः | 2) नागाः | 3) अनुक्तम् | 4) रक्तः |
| प्रश्नः 2 | 1) स्वभावरौद्रम् | 2) अप्रियवादिनम् | 3) कृत्वा | 4) भविष्यति |
| प्रश्नः 3 | 1) परस्परविवादतः | 2) प्राणिनाम् | 3) तेषाम् | 4) जायते |
| प्रश्नः 4 | 1) पुत्राय | 2) यच्छति | 3) पिता | 4) तत्कृतज्ञता |
| प्रश्नः 5 | 1) विद्वांसः | 2) प्रकीर्तिताः | 3) वदने | 4) चक्षुनामनी |
| प्रश्नः 6 | 1) श्रेयः | 2) इच्छति | 3) कर्म | 4) कुर्यात् |

**भावार्थः -**

| | | | | |
|---|---|---|---|---|
| प्रश्नः 1 | 1) काकः | 2) कृष्णः | 3) वसन्तकाले | 4) कोकिलः |
| प्रश्नः 2 | 1) मृगैः | 2) तुरगाः | 3) सुधियः | 4) मित्रता |
| प्रश्नः 3 | 1) राजा | 2) भयाकुलान् | 3) रक्षति | 4) यमराजः |
| प्रश्नः 4 | 1) जनानाम् | 2) नृपस्य | 3) प्रियम् | 4) हितकरम् |
| प्रश्नः 5 | 1) प्रथमः | 2) विद्वांसः | 3) प्राणेभ्यः | 4) सदाचारः |
| प्रश्नः 6 | 1) मन्त्री | 2) धैर्यवान् | 3) भयरहितः | 4) पराजितः |

# घटनाक्रमानुसारं कथालेखनम्

# कथाया: घटनाक्रम:

वाक्यानि घटनाक्रमानुसारं लेखनाय पाठानुसारम् अभ्यास: दत्त: ।

**द्वितीय: पाठ: - बुद्धिर्बलवती सदा**

1 राजसिंह: नाम राजपुत्र: वसति स्म ।

2 तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितृगृहं प्रति चलिता ।

3 मार्गे गहनकानने सा एकं व्याघ्रं ददर्श ।

4 सा पुत्रौ जगाद -“कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ: ?

5 व्याघ्रमारी काचित् इयं इति मत्वा व्याघ्रो व्याकुलचित्तो नष्ट: ।

6 धूर्त:श्रृगाल: हसन् आह- भवान् कुत: भयात् पलायित: ?’

7 जम्बूक त्वमपि किंचित् गूढप्रदेशं गच्छ ।

8 व्याघ्र त्वया महत् कौतुकम् आवेदितम् यन्मानुषादपि बिभेषि ?

9 यत्रास्ते सा धूर्ता तत्र गम्यताम् ।

10 श्रृगाल ,यदि त्वं मां मुक्त्वा यासि तदा वेला अपि अवेला स्यात् ।

11 यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् ।

12 पुनरायान्तम् व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती ।

13 जम्बुककृतोत्साहात् व्याघ्रात् कथम् मुच्यताम् ।

14 प्रत्युत्पन्नमति: सा जम्बुकं आक्षिपन्ती अंगुल्या तर्जयन्ती उवाच ।

15 भयंकरा व्याघ्रमारी तूर्णं धाविता ।

16 गलबद्धश्रृगालक: व्याध्रो अपि सहसा नष्ट: ।

17 एवं प्रकारेण बुद्धिमती व्याघ्रजात् भयात् पुनरपि मुक्ता अभवत् ।

18 अत: एव उच्यते- सर्वदा सर्वकार्येषु बुद्धि: बलवती ।

**चतुर्थ: पाठ: - शिशुलालनम्**

1. श्रीरामस्य सभायां लवकुशौ प्रविशत: ।

2. राम: कुशलप्रश्नेन सह कण्ठाश्लेषं करोति ।

3. राम: लवकुशौ आसने उपवेशयति ।

4. रामः लवकुशानां वंशकर्तारं अधिकृत्य पृच्छति।

5. सूर्यवंशः आत्मनः वंशः एव इति रामः चिन्तयति।

6. लवकुशौ यमलौ इति उक्त्वा स्वनामनी वदतः।

7. लवकुशौ स्वगुरोः नाम वाल्मीकिः इति सूचयति।

8. लवकुशौ स्वपितृनाम निरनुक्रोश इति वदति।

9. क्रोधेन वदति किम् इति विदूषकः पृच्छति।

10. बालचापल्यं दृष्ट्वा माता वदति इति बालकः वदति।

11.अस्मत् कारणात् एव माता पुत्रौ भर्त्सयति इति रामः चिन्तयति।

12.रामः पुत्रयोः मातुः नाम पृच्छति।

13.देवी इति लोकाः तथा वधूः इति वाल्मिकिः च आह्वयति इति तौ कथयतः।

14. बालकयोः च रूपसादृश्यं रामः अवगच्छति।

15.रामायणप्रस्तुत्यै उपाध्यायदूतः लवकुशौ त्वरयति।

16. रामायणश्रवणाय उत्सुकः रामः लक्ष्मणम् अपि आमन्त्रयति।

**पञ्चमः पाठः - जननी तुल्यवत्सला**

1. कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं करोति।
2. कृषकः दुर्बलं वृषभं नुद्यमानः आसीत्।
3. वृषभः भूमौ पतति।
4. सर्वधेनूनां माता सुरभिः दीनं पुत्रं दृष्ट्वा रोदिति।
5. दुःखितां सुरभिं इन्द्रः दुःखस्य कारणं पृच्छति।
6. स्वपुत्रस्य कष्टतां दृष्ट्वा एव रोदिति इति सुरभिः वदति।
7. दीनेषु पुत्रेषु माता कृपार्द्रहृदया भवति इति सा वदति।
8. इन्द्रः सर्वं अवगच्छति।
9. वृषभ रक्षायै अतिवृष्टिं पातयति
10. कृषकःकर्षण कार्यं त्यजति ,गृहं च गच्छति।

**सप्तम: पाठ: - सौहार्दं प्रकृते: शोभा**

1. वने एक: सिंह: सुखेन विश्राम्यते।

2. एक: वानर: सिंहस्य पुच्छं धुनाति।

3. सिंह: क्रुद्ध: भवति।

4. पक्षिण: हर्षमिश्रितं कलरवं कुर्वन्ति।

5. सिंह: वदति- अहं वनराज: अस्मि।

6. वानर: वदति - त्वं राजा भवितुम् अयोग्य: ।

7. वानर: वदति - राजा तु रक्षक: भवति परं त्वं तु भक्षक: ।

8. मयूर: वदति- मम शिरसि मुकुटं अस्ति अत: अहमेव योग्य: वनराजपदाय।

9. काक: - अहमेव राजा भवितुं योग्य: इति वदति।

10. काक: - नृत्यात् अतिरिच्य किं जानासि इति मयूरं पृच्छति।

11. पिक: वदति- काक: का का शब्देन वतावरणं आकुलीकरोति।

12. काक: मेध्यं अमेध्यं च भक्षयति इति पिक: वदति।

13. काक: - मम सत्यप्रियता सर्वे जानन्ति इति काक: वदति।

14. काकदृष्टि: एव आदर्शछात्रस्य लक्षणं भवति इति काक: स्मारयति।

15. पिक: वद्ति - काक: कृष्ण: पिक: कृष्ण: ।

16. काक: -अहं तव सन्ततिं न पालयामि कुत्र पिक:।

17. गज: प्रविशति- विशालकाय: ,पराक्रमी अह्मेव राजा भवितुं योग्य: ।

18. बक: प्रविशति- अविचल: ध्यानमग्न: अहमेव राजा भवितुं योग्य: ।

19. मयूर: साट्टहासं वदति - बक: पक्षिकुलम् अवमानिवान्।

20. विधात्रा एव अहं राजा कृत: इति मयूर: वदति।

21. काक: - नृत्यातिरिक्तं किं जानासि त्वम् इति मयूरं पृच्छति।

22. मयूर: वदति- मम नृत्यं प्रकृते: आराधना।

23. मयूर: स्वपिच्छान् उद्घाटयति।

24. व्याघ्रचित्रकौ प्रविश्य अवामेव योग्यौ वनराजपदाय इति कथयत: ।

25 सिंह: वदति - एते वन्यजीवा: भक्षकं राजपदाय योग्यं न मन्यन्ते।

26. बक: वदति - सिंह: बहुकालपर्यन्तं वनराजा आसीत् अधुना एक: पक्षी राजा भवतु।

27. सर्वे पक्षिण: स्वयमेव  वनराजा भवितुम् सजजा: भवन्ति ।

28. अन्ते उल्लूक: राजा भविष्यति इति खगै: निश्चित: ।

29. काक: वदति - भीकर: निशान्ध: उल्लूक: राजपदाय न योग्य: ।

30. अन्ते प्रकृतिमाता प्रविशति ।

31. प्रकृतिमाता वदति मिथ: कलह: अनावश्यक: ।

32. अहं प्रकृति माता एव सर्वेषां जननी ।

33. सर्वेषामेव महत्वं विद्यते यथासमयम् ।

34.  मिलित्वा एव जीवनं रसमयं कुर्वन्तु ।

35. प्रजानां सुखे श्रेष्ठराजस्य सुखम् ।

36. रोहितमत्स्य: गर्वं न याति ।

37. सर्वे प्रकृतिमातरं प्रणमन्ति । अन्योन्यसहयोगेन लाभ: प्रजायते ।

**अष्टम: पाठ: - विचित्र: साक्षी**

1. एक: निर्धन: जन: परिश्रमेण धनं आर्जितवान्।

2. तस्य पुत्र: महाविद्यालये प्रवेशं प्राप्तवान्

3. पुत्र: छात्रावासे वसति।

4. स: रोगी संजात:।

5. पिता धनाभावात् पादचारेण अगच्छत्।

6. रात्रौ निवासाय ग्रामे एकं गृहं प्राप्तवान्।

7. विचित्रं संभूतम्।

8. चोर: चोरार्थम्  गृहं प्रविष्ट:।

9. पदध्वनिना प्रबुद्ध: स: चौरम् अगृह्णात् ।

10. ग्रामवासिन: सम्मिलिता: ।

11. वस्तुत: आरक्षी चौररूपेण आगत:।

12. स: "चोर: अयं ,चोर: अयं" इति उच्चस्वरेण आक्रोशत्।

13. जना: वराकं अतिथिम् एव चोररूपेण ग्रहीतवन्त:।

14. रक्षापुरुष: तम् अतिथिं कारागृहे प्राक्षिपत्।

15. अग्रिमे दिने आरक्षी चौराभियोगे अतिथिं न्यायालयं नीतवान्।

16. न्यायाधीश: पृथक् विवरणम् अशृणोत्।

17. आरक्षी एव अपराधी इति न्यायाघीश: अवगच्छत्।

18. प्रमाणाभावात् अग्रिमे दिने आगन्तुम् आदिष्टवान्।

19. अग्रिमे दिने उभौ स्वपक्षं स्थपितवन्तौ।

20. तदा कर्मचारी आगत्य राजमार्गसमीपे मृतदेहं अस्तीति न्यवेदयत्।

21. न्यायाधीश: तं देहम् आनेतुम् आरक्षिणम् अभियुक्तं च प्रेषितवान्।

22. स्कन्धेन वहनावसरे बलिष्ठ: आरक्षी अनायासेन चलति।

23. किन्तु कृशकाय: भारवेदनतया क्रन्दति।

24. रोदनं श्रुत्वा आरक्षी अवदत् - " रे दुष्ट तद्दिने मञ्जूषाग्रहणात् त्वं मां वारितवान् ।"

25. "इदानीं तस्य फलम् खादतु" इति आरक्षी अवदत् ।

26. न्यायालयं प्राप्य पुन: विवरणं आरब्घम्।

27. तदा शवरूपेण स्थित: जन: उत्थाय आरक्षिणा कथितं चौरकार्यम् अवदत्।

28. सत्यं निश्चित्य न्यायाधीश: आरक्षिणे कारादण्डम् आदिष्टवान्।

## अभ्यासप्रश्ना:

अधोदत्तवाक्यानि घटनाक्रमेण लिख।

1. चोर: चोरार्थं गृहं प्रविष्ट:।
2. सत्यं निश्चित्य न्यायाधीश: आरक्षिणे कारादण्डं आदिष्टवान्।
3. प्रमाणाभावात् अग्रिमे दिने आगन्तुम् आदिष्टवान्।
4. पुत्र: छात्रावासे वसति।
5. न्यायाधीश: तं देहम् आनेतुम् आरक्षिणम् अभियुक्तं च प्रेषितवान्।
6. वस्तुत: आरक्षी चौररूपेण आगत:
7. पिता धनाभावात् पादचारेण अगच्छत्।
8. न्यायाधीश: पृथक् विवरणम् अशृणोत्।

**उत्तराणि - 4-7-1-6-8-3-5-2**

# प्रसङ्गानुकूलम्

# अर्थचयनम्

# ।। समुचितार्थचयनम् ।।

**प्रसङ्गानुसारं शब्दानां समुचितस्य अर्थस्य चयनम् ।**

एकस्मिन् वाक्ये एकं पदं रेखाङ्कितं स्यात्, तस्य पदस्य प्रासङ्गिकम् अर्थं चित्वा लेखनीयम् । अर्थात् तस्य पदस्य तस्मिन् वाक्ये कोऽर्थ: इति विचिन्त्य एवोत्तरं लेखनीयम् । रेखाङ्कितपदस्य अनेके अर्था: भवितुमर्हन्ति ; परं तस्मिन् वाक्ये तस्य पदस्य कोऽर्थ इत्येव द्रष्टव्यम् ।

अधुना एकैकं पाठं स्वीकृत्य अभ्यासं कुर्म: ।

**अधोलिखितेषु वाक्येषु रेखाङ्कितपदस्य प्रसङ्गानुकूलं समुचितार्थं चिनुत ।**

## प्रथम: पाठ: - शुचिपर्यावरणम्

1. अत्र जीवनं **दुर्वहम्** जातम् ।

(क) सुवहम् (ख) कठिनम् (ग) आनंदमयम् (घ) सुकरम्

2. वायुमण्डलं **भृशं** दूषितम् ।

(क) अत्यल्पम् (ख) अत्यधिकम् (ग) किंचित् (घ) दूषितम्

3. **जगति** बहु शुद्धीकरणं करणीयम् ।

(क) स्वर्गे (ख) पाताले (ग) संसारे (ग) बहि:

4. एकान्ते **कान्तारे** क्षणमपि मे संचरणम् स्यात् ।

(क) एकांते (ख) कानने (ग) निवासे (ग) गृहे

5. नवमालिका **रसालम्** मिलिता रुचिरं संगमनम् ।

(क) आम्रम् (ख) कुसुमम् ( ग) समीरं (घ) रुचिरम्

6. समीरचालिता **कुसुमावलि:** मे वरणीया स्यात् ।

(क) पुष्पपंक्ति: (ख) वायु: (ग) चालिता (घ) फलानि

7. हरित**तरूणां** माला रमणीया ।

(क) पुष्पाणाम् (ख) वृक्षाणाम् (ग) पंक्ति: (घ) हरितानाम्

8. अयि **बन्धो** ! खगकुलकलरव गुंजितवनदेशं चल ।

(क) वन (ख) मित्र ! (ग) शत्रो ! (घ) चल

9. निसर्गे **पाषाणी** सभ्यता समाविष्टा न स्यात् ।

(क) प्रस्तरी (ख) प्रकृति (ग) सभ्यता (घ) पाषाण:

10. **<u>मे</u>** संचरणं स्यात्।

(क) तव (ख) मम ( ग) अस्य (घ) संचरणम्

11. मानवाय जीवनं **<u>कामये</u>** नो जीवन्मरणम्।

(क) निसर्गे (ख) इच्छामि (ग) मानवे (घ) जीवने

12. कज्जलमलिनं धूमं **<u>मुञ्चति</u>** शतशकटीयानं।

(क) वञ्चयति (ख) त्यजति (ग) वहति (घ) धरति

13. यदि त्वं मां **<u>मुक्त्वा</u>** यासि तर्हि वेला अपि अवेला स्यात्।

(क) चिन्तयित्वा (ख) दृष्ट्वा (ग) परित्यज्य (घ) सर्वदा

14. प्रपश्यामि ग्रामान्ते निर्झर-नदी-**पयः**-पूरम्।

(क) अमृतम् (ख) जलम् (ग) पवित्रं (घ) नयनम्

## द्वितीयः पाठः - बुद्धिर्बलवती सदा

1. व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रः **<u>पलायितः</u>**।

(क) धावित: (ख) जम्बुकः (ग) खादित: (घ) बुद्धिमती

2. व्याघ्र: भयाकुलचित्त: **<u>नष्टः</u>**।

(क) भयापन्न: (ख) पलायित: (ग) जागृतः (घ) अन्त: प्रविष्ट:

3. पुत्रौ चपेटया प्रहृत्य **<u>जगाद</u>**।

(क) अकरोत् (ख) अकथयत् (ग) अपश्यत् (घ) अधावत्

4. व्याघ्रः तथा कृत्वा काननं **<u>ययौ</u>**।

(क) अनयत् (ख) अगच्छत् (ग) अभ्रमत् (घ) काननम्

5. गहन-**<u>कानने</u>** बुद्धिमती एकं व्याघ्रं ददर्श।

क) गृहे (ख) ग्रामे (ग) जले (घ) वने

6. गच्छ गच्छ **<u>जम्बुक</u>** !

क) सिंह (ख) मृग (ग) शुनक (घ) शृगाल

7. सा **<u>भामिनी</u>** निजबुद्ध्या व्याघ्रस्य भयाद् विमुक्ता।

क) सुन्दरी (ख) धनवती स्त्री (ग) आयुष्मती (घ) गृहिणी

8. तत्र गतस्य सा सम्मुखमपि **ईक्षते**।

क) पश्यति (ख) गच्छति (ग) उत्तिष्ठति (घ) खादति

9. त्वमपि किञ्चिद् **गूढप्रदेशं** गच्छ।

क) प्रसिद्धं प्रदेशम् (ख) रहस्यप्रदेशम् (ग) देवस्थानम् (घ) सर्वत्र

10. व्याघ्रमारी **तूर्णं** धाविता।

क) शीघ्रम् (ख) विलम्बेन (ग) यानेन (घ) विमानेन

## चतुर्थः पाठः - शिशुलालनम्

1. एतेन वचनेन **दारकौ** निर्भर्त्सयति।

(क) द्वौ (ख) पुत्रौ (ग) पितरौ (घ) मातरौ

2. **गिराम्** सन्दर्भोऽयं प्रथममवतीर्णो वसुमतीम्।

(क) वाणीनाम् (ख) कवीनाम् (ग) कथानाम् (घ) धरायाम्

3. भवति शिशुजनो **वयः** अनुरोधात्।

(क) आयुः (ख) वृद्धः (ग) बाल: (घ) युवा

4. आवां **यमलौ**।

(क) चन्द्र: सूर्य: च (ख) युगलपुत्रौ (ग) पुत्रौ (घ) पवनौ

5. किं कुपिता एवं **भणति**, उत प्रकृतिस्था ?

(क )गर्जति (ख) ताडयति (ग) कथयति (घ) हसति

6. ततः विदूषकेनोपदिश्यमानमार्गौ **तापसौ** कुशलवौ प्रविशतः।

(क) बालकौ (ख) तपस्विनौ (ग) प्रविशत: (घ) विदूषकेन

7. भवतो: किं वयमत्र कुशलप्रश्नस्य **भाजनम्** एव ?

(क) कुशलम् (ख) भजनम् (ग) पात्रम् (घ) एव

8. एतत् राजासनं खलु , अत्र अध्यासितुम् न **युक्तम्**।

(क) अनुचितम् (ख) अयोग्यम् (ग) उचितम् (घ) अध्यासितुम्

9. **सव्यवधानं** न चारित्रलोपाय।

(क) व्यवधानरहितम् (ख) व्यवधानसहितम् (ग) चारित्र्यम् (घ) सिंहासनम्

10. रामस्य **समीपम्** उपसृत्य प्रणमति।

(क) दूरम् (ख) पार्श्वम् (ग) अन्त: (घ) बहि:

11. भवति **शिशुजनो** वयः अनुरोधात् ।

(क) आयुः (ख) वृद्धः (ग) बाल: (घ) युवा

12. **गुणमहताम्** अपि लालनीय एव ।

(क) गुणीजनानाम् (ख) मूर्खाणाम् (ग) जनानाम् (घ) शिष्याणाम्

13. **अङ्कम्** उपवेशयति।

(क) मुखम् (ख) क्रोडम् (ग) पादम् (घ) हस्तम्

14. बालभावात् **हिमकरो** अपि व्रजति।

(क) सूर्य: (ख) चन्द्र: (ग) बाल: (घ) अपि

15. बालभावात् हिमकरोऽपि **पशुपति**मस्तककेतकच्छदत्वं व्रजति।

(क) शिव: (ख) सूर्य: (ग) चन्द्र: (घ) सिंह:

16. पशुपति-**मस्तक**-केतकच्छदत्वं व्रजति।

(क) मुखम् (ख) नेत्रम् (ग) शिर: (घ) पादम्

17. भगवन् **सहस्रदीधितिः**।

(क) शशि: (ख) सूर्य: (ग) भगवन् (घ) लव:

18. भ्रातरावावां **सोदर्यौ।**

(क) चंद्रसूर्यौ (ख) सहोदरौ (ग) उभौ (घ) सर्वे

19. अहो! उदात्तरम्यः **समुदाचारः**।

(क) मिथ्याचार: (ख) शिष्टाचार: (ग) कदाचार: (घ) समाचार:

20. **निरनुक्रोशो** नाम।

(क) दयावान् (ख) निर्दय: (ग) कुश: (घ) सहृदय:

21. प्रेष्यतामस्मदन्तिकं **सौमित्रिः** ।

(क) लक्ष्मण: (ख) राम: (ग) लव: (घ) कुश:

22. इयती वेला सञ्जाता रामायणगानस्य **नियोगः** कथं न विधीयते ?

(क) कर्तव्य: (ख) फलम् (ग) मार्ग: (घ) सुकार्यम्

23. कथा चेयं **श्लाघ्या** सरसिरुहनाभस्य नियतम् ।

(क) निन्दनीया (ख) अलौकिकी (ग) प्रशंसनीया (घ) उन्नता

## पञ्चमः पाठः - जननी तुल्यवत्सला

1. भो **वासव!** पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि।

(क) कृपण! (ख) यमराज! (ग) इन्द्र! (घ) विष्णो!

2. विनिपातः न वः कश्चित् दृश्यते **त्रिदशाधिप**!

(क) परमशिव ! (ख) सहायक ! (ग्र) इन्द्र ! (घ) कृषक

3. **अपत्येषु** च सर्वेषु जननी तुल्यवत्सला।

(क) सन्ततिषु (ख) मित्रेषु (ग) शत्रुषु (घ) जनेषु

4. सः **ऋषभः** हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात।

क) वृषभः (ख) धेनु: (ग) क्षेत्रम् (घ) पपात

5. तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः **जवेन** गन्तुमशक्तश्चासीत्।

क) वेगेन (ख) बलीवर्देण (ग) तेन (घ) एकेन

6. सुरभेरिमामवस्थां दृष्ट्वा **सुराधिपः** तामपृच्छत्।

(क) इन्द्र: (ख) लव: (ग) राम: (घ) सुरभि:

7. भो वासव! पुत्रस्य **दैन्यं** दृष्ट्वा अहं रोदिमि।

(क) मूर्खताम् (ख) दीनताम् (ग) अहम् (घ) सर्वे

8. ऋषभः हलमूढ्वा गन्तुम् **अशक्तः** क्षेत्रे पपात ।

क) समर्थ: (ख) असमर्थ: (ग) ऋषभ: (घ) हलम्

9. ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे **पपात**।

क) अपतत् (ख) अपठत् (ग) अधावत् (घ) अकथयत्

10. कृषकः तं दुर्बलं वृषभं **तोदनेन** नुद्यमानः आसीत्।

क) सुखप्रदानेन (ख) कष्टप्रदानेन (ग) धनप्रदानेन (घ) वात्सल्यप्रदानेन

11. **बहूनि** अपत्यानि मे सन्तीति सत्यम्।

क) न्यूनानि (ख) सन्ति (ग) अनेकानि (घ) पुत्रा:

12. पुत्रे दीने तु सा **माता** कृपार्द्रहृदया भवेत्॥

क) जननी (ख) कृपा (ग) सुत: (घ) मति:

13. सः **कृच्छ्रेण** भारमुद्वहति।

क) सारल्येन (ख) काठिन्येन (ग) भारेण (घ) उद्वहनेन

## षष्ठः पाठः - सुभाषितानि

1. आलस्यं हि **मनुष्याणां** शरीरस्थो महान् रिपुः।

क) रक्षसाम् (ख) नराणाम् (ग) देवानाम् (घ) बन्धूनाम्

2. आलस्यं हि मनुष्याणां शरीरस्थो महान् **रिपुः**।

क) मित्रम् (ख) शत्रु: (ग) बंधु: (घ) शिशु:

3. उद्यमसम: **बन्धुः** नास्ति।

क) मित्रम् (ख) शत्रु: (ग) बाल: (घ) शिशु:

4. गुणी गुणं **वेत्ति**।

क) वदति (ख) जानाति (ग) धावति (घ) गर्जति

5. **वायस**: वसन्तस्य गुणं न जानाति।

क) नर: (ख) गज: (ग) हय: (घ) काक:

6. **करी** सिंहस्य बलं जानाति।

क) काक: (ख) गज: (ग) हय: (घ) नर:

7. स: **निमित्तम्** उद्दिश्य प्रकुप्यति।

क) जलम् (ख) कारणम् (ग) अन्नम् घ) मिष्टान्नम्

8. मोहित: कारणस्य **अपगमे** प्रसीदति।

क) समाप्तौ (ख) आरम्भे (ग) मध्ये (घ) सर्वदा

9. मनुष्य: कारणस्य अपगमे **प्रसीदति**।

क) दुखितो भवति (ख) प्रसन्नो भवति (ग) लज्जितो भवति (घ) विषीदति

10. **उदीरितो** अर्थ: पशुनापि गृह्यते।

क) दृष्ट: (ख) कथित: (ग) गत: (घ) नष्ट:

11. **हया**: धावने वीरा: भवन्ति।

क) सर्पा: (ख) नागा: (ग) अश्वा: (घ) वीरा:

12. काष्ठगत: **वह्नि**: एव काष्ठं भस्मीकरोति।

क) जलम् (ख) रोटिका (ग) अग्नि: (घ) अन्नम्

13. समानशीलव्यसनेषु **सख्यम्** भवति।

क) लघुता (ख) शत्रुता (ग) कटुता (घ) मित्रता

14. सम्पत्तौ च विपत्तौ च **महताम्** एकरूपता।

क) सज्जनानाम् (ख) दुर्जनानाम् (ग) खलानाम् (घ) धीराणाम्

15. उदये **सविता** रक्तो भवति।

क) चन्द्रः (ख) सूर्यः (ग) वायुः (घ) सर्वे

## सप्तमः पाठः -सौहार्दं प्रकृतेः शोभा

1. एकः वानरः आगत्य तस्य पुच्छं **धुनोति।**

क) कर्षति (ख) हसति (ग) चलति (घ) लालयति

2. यो **वित्रस्तान्** न रक्षति।

क) भीतान् (ख) दुःखितान् (ग) आवाहितान् (घ) सर्वान्

3. अलम् अलम् **अतिविकत्थनेन**।

क) परप्रशंसया (ख) आत्मप्रशंसया (ग) मित्रप्रशंसया (घ) शत्रुप्रशंसया

4. **मेध्यम्** अमेध्यं च भक्षयति।

क) अशुद्धम् (ख) शुद्धम् (ग) पवित्रम् (घ) अन्नम्

5. वन्यपशून् तु **तुदन्तं** जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि।

क) रुदन्तम् (ख) गम्यमानम् (ग) आगम्यमानम् (घ) पीडयन्तम्

6. अहम् एव **करुणापरः** पक्षिसम्राट काकः।

क) दयालुः (ख) काकः (ग) राजा (घ) अहम्

7. **पक्षिणः** अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति।

क ) खगाः (ख) सिंहाः (ग) कुर्वन्ति (घ) दशाः

8. पक्षिणः अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं **कलरवं** कुर्वन्ति।

क) पशूनाम् क्रीडा (ख) पक्षिणां कूजनम् (ग) रोदनम् (घ) अपि

9. कथं **मिथः** कलहं कुर्वन्ति ?

क) सन्ततिः (ख) अन्यम् (ग) परस्परम् (घ) सर्वे

10. **कलहेन** समयं वृथा मा यापयन्तु।

क) स्नेहेन (ख) विवादेन (ग) प्रेम्णा (घ) रसेन

11. **अनृतं** वदसि चेत् काकः दशेत्।

क) अपि (ख) यदि (ग) कदा (घ) असत्यम्

12. अस्माकं **ऐक्यम्** विश्वप्रथितम्।

क) विविधता (ख) एकता (ग) अनेकता (घ) लघुः

13. अहं तव **सन्ततिं** पालयामि।

क) समानम् (ख ) पुत्रीम् (ग) सन्तानम् (घ) शत्रुम्

14. बकः क्रूरतया वराकान् **मीनान्** खादति।

क) मत्स्यान् (ख) बकान् (ग) वराकान् (घ) जन्तून्

15. **क्रुद्धः** सिंहः तं प्रहर्तुमिच्छति।

क) कुपितः (ख ) हर्षितः (ग) पुष्टः ( घ) नष्टः

## अष्टमः पाठः - विचित्रः साक्षी

1. निर्धनो जनः भूरि परिश्रम्य **वित्तम्** उपार्जितवान्।

क) जनः (ख ) धनम् (ग) भूरि (घ) न कोऽपि

2. पिता **तनूजस्य** रुग्णतामाकर्ण्य व्याकुलो जातः।

क) व्याकुलस्य (ख) पुत्रस्य (ग) दर्शनस्य (घ) जातस्य

3. काष्ठपटले निहितं पटाच्छादितं देहं स्कन्धेन वहन्तौ न्यायाधिकरणं प्रति **प्रस्थितौ**।

क) गतवन्तौ (ख) वहन्तौ (ग) निहितौ (घ) पिहितौ

4. **अर्थकार्श्येन** पीडितः निर्धनः जन: पदातिरेव अगच्छत्।

क) कृपणत्वेन (ख) धनस्य अभावेन (ग) धनाधिक्येन (घ) अन्नाभावेन

5. **विजने** प्रदेशे पदयात्रा न शुभावहा।

क) अनेकान्ते (ख) निर्जने (ग) प्रदेशे (घ) पदयात्रायाम्

6. सर्वम् **अवगत्य** सः तं निर्दोषम् अमन्यत।

क) गत्वा (ख) दृष्ट्वा (ग) ज्ञात्वा (घ) पीत्वा

7. एतेन आरक्षिणा **अध्वनि** यदुक्तं तद् कथयामि।

क) नागे (ख) गृहे (ग) मन्दिरे (घ) मार्गे

8. शव: **प्रावारकम्** अपसार्य न्यायाधीशमभिवाद्य निवेदितवान्।

क) हस्तम् (ख) पादम् (ग) कम्बलम् (घ) अन्योन्यम्

9. **दुष्कराणि** अपि कर्माणि मतिवैभवशालिनः।

क) कठिनानि (ख) सरलानि (ग) प्राक्तनानि (घ) आधुनिकानि

10. नीतिं युक्तिं समालम्ब्य लीलयैव **प्रकुर्वते**।

क) वदन्ति (ख) कुरुतः (ग) कुर्वन्ति (घ) सर्वे

## नवमः पाठः - सूक्तयः

1. पिता पुत्राय विद्याधनम् **यच्छति**।

क) नृत्यति (ख) ददाति (ग) लभते (घ) करोति

2. चित्ते वाचि च **अवक्रता** स्यात्।

क) सरलता (ख) विषमता (ग) वैमनस्यता (घ) उद्दण्डता

3. **चित्ते** वाचि च अवक्रता स्यात्।

क) स्वभावे (ख) मनसि (ग) दुर्गे (घ) वाचि

4. **परुषां** वाचं त्यक्त्वा धर्मप्रदां वाचं वदेत्।

क) कठोराम् (ख) परित्यज्य (ग) कथयेत् (घ) पुरुषम्

5. अस्मिन् लोके विद्वांसः **चक्षुष्मन्तः** प्रकीर्तिताः।

क) विद्वांसः (ख) नेत्रवन्तः (ग) प्रकीर्तिताः (घ) लोकाः

6. यः वाक्पटु: भवति स: कदापि परैः न **परिभूयते**।

क) पुरस्क्रियते (ख) पराजीयते (ग) क्रियते (घ) खाद्यते

7. यः आत्मनः **श्रेयः** इच्छति।

क) मरणम् (ख ) अकल्याणम् (ग) प्रेयः (घ) मङ्गलम्

8. **आचारः** प्रथमो धर्मः।

क) व्यवहार: (ख) कदाचारः (ग) धर्मः (घ) अधर्मः

9. आचारः प्रथमो धर्मः इति **विदुषाम्** वचः।

क) जनानाम् (ख) खलानाम् (ग) वचसाम् (घ) पण्डितानाम्

10. कदापि कस्यापि **अहितं** न कुर्यात्।

क) हितम् (ख) अनिष्टम् (ग) कुर्यात् (घ) न

## द्वादशः पाठः - अन्योक्तयः

1. यत्र भवता मृणालपटली **भुक्ता**।

क) खादिता (ख) मारिता (ग) उद्घाटिता (घ) लुण्ठिता

2. **नलिनानि** निषेवितानि।

क) पुष्पाणि (ख) फलानि (ग) निषेवितानि (घ) कमलानि

3. **निदाघे** भीमभानौ अल्पैः तोयैः अपि भवता करुणया अस्य तरोः पुष्टि: व्यरचि।

क) शीते (ख) ग्रीष्मे (ग) वर्षर्तौ (घ) हेमन्तर्तौ

4. प्रावृषेण्येन **वाराम्** ग्रीष्मे काले अस्मै तरवे पुष्टिर्जनिता।

क) जलानाम् (ख) अन्नस्य (ग) पुष्पाणाम् (घ) पत्राणाम्

5. पतङ्गाः परितः अम्बरपथम् **आपेदिरे**।

क) आगतवन्त: (ख) कृतवन्तः (ग) प्राप्तवन्त: (घ) दृष्टवन्तः

6. भृङ्गाः **रसालमुकुलानि** समाश्रयन्ते।

क) आम्रमञ्जर्य्यः (ख) पलाशपत्राणि (ग) जपापुष्पाणि (घ) बिल्वपत्राणि

7. चातकः **पुरन्दरं** याचते।

क) इन्द्रम् (ख) चातकम् (ख) खगम् (ग) आकाशम्

8. दीनहीनः मीनः कतमां गतिम् **अभ्युपैतु**।

क) पश्यतु (ख) समीपं गच्छतु (ग) गम्यताम् (घ) आश्वास्यताम्

9. मेघाः **उद्दामदावविधुराणि** काननानि जलम् ददति।

क) उन्नतकाष्ठरहितानि (ख) वनानि (ग) गृहाणि (घ) काननानि

10. अद्य गगने बहवः **अम्भोदाः** सन्ति।

क) मेघाः (ख) खगाः (ग) चातकाः (घ) वृक्षाः

## अभ्यासप्रश्नाः

1. वाष्पयानमाला **ध्वानम्** वितरन्ती संधावति।

क) भोजनम् (ख) कज्जलम् (ग) वाष्पम् (घ) शब्दम्

2. महानगरमध्ये **अनिशम्** कालायसचक्रम् चलति।

क) रात्रौ (ख) दिवसे (ग) अहर्निशम् (घ) निशम्य

3. **दुर्दान्तैः** दशनैः जनग्रसनम् न स्यात्।

क) दन्तैः (ख) भयङ्करैः (ग) जनैः (घ) सर्वैः

4. निजगले बद्ध्वा चल **सत्वरम्**।

क) शीघ्रम् (ख) विलम्बः (ग) मन्दम् (घ) सर्वदा

5. **परिष्वज्य** - अहो हृदयग्राही स्पर्शः।

क) स्पृष्ट्वा (ख) दृष्ट्वा (ग) आलिङ्ग्य (घ) उपविश्य

6. अहो! **उदात्तरम्यः** समुदाचारः।

क) अतिग्राही (ख) आचारः (ग) अतिरमणीयः (घ) धर्माचारः

7. **कृषकः** वृषभौ नीत्वा गृहमगात्।

क) कृषीवलः (ख) बलीवर्दः (ग) आरक्षी (घ) आखण्डलः

8. **भूमौ** पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन्।

क) सदने (ख) गगने (ग) क्षितौ (घ) स्थण्डिले

9. जनः कथं **परितोषयिष्यति** ?

क) सन्तोषयिष्यति (ख) अवशोषयिष्यति (ग) गमिष्यति (घ) करिष्यति

10. पण्डितः जनः अनुक्तम् अपि **ऊहति**।

क) परित्यजति (ख) निर्धारयति (ग) करोति (घ) पठति

11. मृगाः मृगैः सङ्गम् **अनुव्रजन्ति**।

क) निर्गच्छन्ति ( ख) अनुगच्छन्ति (ग) आगच्छन्ति (घ) कदापि न गच्छन्ति

12. भारस्य वहने **खरः** वीरः भवति।

क) गर्दभः (ख) विडालः (ग) गजः (घ) पर्वतः

13. यः उद्यमं न करोति सः **अवसीदति**।

(क) सुखी भवति (ख) मन्दीभवति (ग) क्षीणितो भवति (घ) निन्दति

14. निमित्तस्य अपगमे **ध्रुवं** प्रसीदति।

(क) निश्चयेन (ख) न कदाचित् (ग) यदा कदा (घ) एकदा

15. नास्ति मूलम् **अनौषधम्**।

(क) वनौषधम् (ख) लोकौषधम् (ग) न औषधम् (घ) अनेकौषधम्

16. अपितु मिलित्वा एव **मोदध्वं** जीवनं च रसमयं कुरुध्वम्।

(क) सन्तुष्यत (ख) रुद्यध्म् (ग) कुरुध्वम् (घ) वदत

17. अङ्गुष्ठोदकमात्रेण **शफरी** फुर्फुरायते।

(क) बृहत् मत्स्यः (ख) लघुमत्स्यः (ग) उभौ (घ) न कोऽपि

18. रोहितः गर्वं **याति**।

(क) गच्छति (ख) पठति (ग) नृत्यति (घ) उद्वहति

19. निशान्धकारे विजने प्रदेशे पदयात्रा न **शुभावहा**।

(क) कल्याणप्रदा (ख) अशुभदा (ग) जलदा (घ) पदयात्रा

20. तस्य क्रन्दनं श्रुत्वा **मुदितः** आरक्षी उवाच।

(क) दु:खित: (ख) प्रसन्नः (ग) सुखी (घ) आरक्षी

21. **विमूढधी:** पक्वं फलं परित्यज्य अपक्वं भुङ्क्ते।

(क) विद्वान् (ख) मानी (ग) चतुरः (घ) मूर्ख:

22. अन्येषां **वदने** ये तु ते चाक्षुर्नामनी मते।

(क) कानने (ख) मुखे (ग) उद्याने (ग) परिज्ञाने

23. धैर्यवान् सभायाम् अपि **अकातरः** भवति।

(क) वीरः (ख) विद्वान् (ग) मूर्खः (घ) भयरहित:

24. एकेन राजहंसेन **सरसः** या शोभा भवेत्।

(क) नद्याः ( ख) तडागस्य (ग) उद्यानस्य (घ) शोभायाः

25. सरः त्वयि सङ्कोचम् **अञ्चति**।

(क) गच्छति (ख) पठति (ग) नृत्यति (घ) उद्वहति

# समुचितार्थचयनम् – उत्तरकुञ्चिका

## प्रथम: पाठ: - शुचिपर्यावरणम्

1. कठिनम् 2. अत्यधिकम् 3. संसारे 4. कानने 5. आम्रम् 6. पुष्पपंक्ति: 7. वृक्षाणाम् 8. मित्र ! 9. प्रस्तरी 10. मम 11. इच्छामि 12. त्यजति 13. परित्यज्य 14. जलम्

## द्वितीय: पाठ: - बुद्धिर्बलवती सदा

1. धावित: 2. पलायित: 3. अकथयत् 4. अगच्छत् 5. वने 6. शृगाल 7. सुन्दरी 8. पश्यति 9. रहस्यप्रदेशम् 10. शीघ्रम्

## चतुर्थ: पाठ: - शिशुलालनम्

1. पुत्रौ 2. वाणीनाम् 3. आयुः 4. युगलपुत्रौ 5. कथयति 6. तपस्विनौ 7. पात्रम् 8. उचितम् 9. व्यवधानसहितम् 10. निकषा 11. बाल: 12. गुणीजनानाम् 13. क्रोडम् 14. चन्द्र: 15. शिव: 16. शिर: 17. सूर्य: 18. सहोदरौ 19. शिष्टाचार: 20. निर्दय: 21. लक्ष्मण: 22. कर्तव्य: 23. प्रशंसनीया

## पंचम: पाठ: - जननी तुल्यवत्सला

1. इन्द्र 2. इन्द्र: 3. सन्ततिषु 4. इन्द्र: 5. वृषभ: 6. इन्द्र: 7. दीनताम् 8. असमर्थ: 9. अपतत् 10. कष्टप्रदानेन 11. अनेकानि 12. जननी 13. काठिन्येन

## षष्ठ: पाठ: - सुभाषितानि

1. नराणाम् 2. शत्रु: 3. मित्रम् 4. जानाति 5. काक: 6. गज: 7. कारणम् 8. समाप्तौ 9. प्रसन्नो भवति 10. कथित: 11. अश्वा: 12. अग्नि: 13. मित्रता 14. सज्जनानाम् 15. सूर्य:

## सप्तम: पाठ: - सौहार्दं प्रकृते: शोभा

1. कर्षति 2. भीतान् 3. आत्मप्रशंसया 4. शुद्धम् 5. पीडयन्तम् 6. दयालु: 7. खगाः 8. पक्षिणां कूजनम् 9. परस्परम् 10. विवादेन 11. असत्यम् 12. एकता 13. सन्तानम् 14. मत्स्यान् 15. कुपितः

## अष्टमः पाठः - विचित्रः साक्षी

1. धनम्   2. पुत्रस्य   3. गतवन्तौ   4. धनस्य अभावेन   5. निर्जने   6. ज्ञात्वा   7. मार्गे   8. कम्बलम्   9. कठिनानि   10. कुर्वन्ति

## नवमः पाठः - सूक्तयः

1. ददाति   2. सरलता   3. मनसि   4. कठोराम्   5. नेत्रवन्तः   6. पराजीयते   7. कल्याणम्   8. व्यवहार:   9. पण्डितानाम्   10. अनिष्टम्

## द्वादशः पाठः - अन्योक्तयः

1. खादिता   2. कमलानि   3. ग्रीष्मे   4. जलानाम्   5. प्राप्तवन्तः   6. आम्रमञ्जर्य्यः   7. इन्द्रम्   8. समीपं गच्छतु   9. उन्नतकाष्ठरहितानि   10. मेघाः

## अभ्यासप्रश्नाः - उत्तरकुञ्चिका

1. शब्दम्   2. अहर्निशम्   3. भयङ्करैः   4. शीघ्रम्   5. आलिङ्ग्य   6. अतिरमणीयः   7. कृषीवलः   8. क्षितौ   9. सन्तोषयिष्यति   10. निर्धारयति   11. अनुगच्छन्ति   12. गर्दभः   13. क्षीणितो भवति   14. निश्चयेन   15. न औषधम्   16. सन्तुष्यत   17. ख) लघुमत्स्यः   18. गच्छति   19. कल्याणप्रदा   20. प्रसन्नः   21. मूर्खः   22. मुखे   23. भयरहित:   24. तडागस्य   25. गच्छति

# आदर्शप्रश्नपत्राणि

`

**5**

**प्रश्नपत्राणि**

**As per**

**CBSE**

**pattern**

# आदर्शप्रश्नपत्रम् - 1 (२०२२ - २३)

## SAMPLE QUESTION PAPER - 1 (2022 - 23)

## कक्षा – दशमी / CLASS-X

## संस्कृतम् (कोड् – 122) SANSKRIT( CODE - 122)

| | |
|---|---|
| **समय: - होरात्रयम्** | **सम्पूर्णाङ्का: - ८०** |
| **Time allowed - 3 Hours** | **TotalMarks - 80** |

**सामान्य निर्देशा:**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति ।
2. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय: ।
3. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया ।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि ।
5. प्रश्नानां निर्देशा: ध्यानेन पठनीया: ।

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।

| | | |
|---|---|---|
| **क खण्ड: - अपठित-अवबोधनम्** | **-** | **10 अङ्का:** |
| **ख खण्ड: - रचनात्मकं कार्यम्** | **-** | **15 अङ्का:** |
| **ग खण्ड: - अनुप्रयुक्तं व्याकरणम्** | **-** | **25 अङ्का:** |
| **घ खण्ड: - पठितावबोधनम्** | **-** | **30 अङ्का:** |

## क खण्डः - अपठित-अवबोधनम् - 10 अङ्काः

**1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (10)

कस्मिंश्चिद् देशे धर्मबुद्धिः पापबुद्धिश्च द्वे मित्रे निवसतः स्म। अथ कदाचित् पापबुद्धिना चिन्तितम् - अहं तावन्मूर्खो दरिद्रश्च। तदेनं धर्मबुद्धिम् आदाय देशान्तरं गत्वा अस्य आश्रयेण अर्थोपार्जनं कृत्वा एनमपि वञ्चयित्वा सुखी भवामि इति। अथ अन्यस्मिन् अहनि पापबुद्धिः धर्मबुद्धिम् प्राह - "भो मित्र! शास्त्रेषु एवं वर्णितं यद् येन देशान्तरेषु गत्वा बहुविधं भाषावेषादिकं न ज्ञातं तस्य जन्म धरणीपीठे निरर्थकम्। अतः आवां देशान्तरं गच्छावः" इति। देशान्तरं गत्वा तौ परिश्रमेण प्रभूतं धनं अर्जितवन्तौ। एकदा तौ अर्जितं धनं नीत्वा गृहं प्रति आगच्छताम्। गृहं प्राप्य पापबुद्धिः धर्मबुद्धिः च सम्पूर्णं धनम् एकस्य वृक्षस्य मूले निक्षिप्तवन्तौ। पुनः एकदा पापबुद्धिः निशायां गत्वा वृक्षस्य मूलं खानित्वा सर्वं धनं प्राप्तवान्। अतः उच्यते दुष्टैः सह मित्रता नोचिता इति।

**क) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

क ) धर्मबुद्धेः मित्रस्य किं नाम आसीत् ?

ख ) पापबुद्धिः धर्मबुद्धिः च वृक्षस्य मूले किं निक्षिप्तवन्तौ ?

ग ) कः मूर्खः दरिद्रश्च आसीत् ?

**ख) पूर्णवाक्येन उत्तरत (केवलं प्रश्न द्वयम् )** 2 x 2 = 4

क ) पापबुद्धि : कस्य आश्रयेण अर्थोपार्जनं कर्तुमिच्छति स्म ?

ख ) पुन : एकदा पापबुद्धिः किम् प्राप्तवान्?

ग ) गृहं प्राप्य धर्मबुद्धि : पापबुद्धिश्च किं कृतवन्तौ?

**ग) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत।** 1 x 1 = 1

**घ) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयम्)।** 1 x 3 = 3

क ) 'तौ परिश्रमेण प्रभूतं धनम् आर्जितवन्तौ' अत्र विशेषणपदं किम् ?

(अ) प्रभूतं (आ) धनम् (इ) आर्जितवन्तौ (ई) तौ

ख ) ' रात्रौ' अस्य पदस्य किम् पर्यायपदं गद्यांशे अस्ति ?

(अ) अहनि (आ) निशायाम् (इ) प्रातः (ई) प्रभाते

ग ) गद्यांशे "आवाम् " इति कर्तृपदस्य क्रियापदं किम् ?

(अ) देशान्तरं (आ) गच्छावः (इ) अतः (ई) इति

घ ) " अर्जितवन्तौ " इति क्रियापदस्य कर्तृपदं किम्?

(अ) तौ (आ) प्रभूतं (इ) धनं (ई) परिश्रमेण

## ख खण्ड: - रचनात्मकं कार्यम् - 15 अङ्का:

**2. भवान् सुदीप्तः , दिल्लीनगरस्य शाहादरा उपनगरे निवसति । भवत: क्षेत्रे इदानीं चौर्यकार्यं प्रवर्धितं वर्तते । तस्य निवारणाय स्वक्षेत्रस्य सुरक्षाधिकारिणम् प्रति लिखितं पत्रं मञ्जूषात: समुचितपदै: पूरयित्वा पुन: लिखत ।** ½ x 10=5

| | | | | |
|---|---|---|---|---|
| कारणात् , | निवारणाय , | दिल्लीत:, | सुदीप्तः , | चौर्यकार्यस्य , |
| विश्वास: , | निवेदनं , | चौर्यं , | भयभीता: , | दिवानिशम् |

10/120 बि , शाहदरा क्षेत्रम्

(1) _______________

दिनाङ्क: ___________

सेवायाम् ,

उपायुक्तमहोदय:

आरक्षकस्थानकम्

दिल्लीराज्यम्

विषय: - क्षेत्रे वर्धितस्य _______________ निवारणस्य व्यवस्थार्थं पत्रम् ।

महोदय !

सविनयं (3) __________ वर्तते यत् अहं भवत: क्षेत्रस्य निवासी अस्मि । सम्प्रति कस्माच्चित् (4) __________ अस्माकं क्षेत्रे चौर्यकार्यं प्रवर्धितम् अस्ति । चौरा: (5) ________ कदाचिदपि जनानां गृहेषु प्रविश्य (6) _______ कुर्वन्ति । ते कदाचिद् जनान् घ्नन्ति अपि । अत: सर्वत्र जनाः (7) ______ सन्ति । अत: अहं भवन्तं निवेदयामि यद् अस्य अपराधस्य (8) _______ समुचितं प्रयासं करोतु भवान् , येन क्षेत्रस्य निवासिषु सुरक्षां प्रति (9) __________ वर्धेत । अहं भवताम् आभारी भविष्यामि ।

निवेदक:

(10) __________

**3. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दसहायतया संस्कृते पञ्च वाक्यानि लिखत।**

1 x 5 = 5

मञ्जूषा - [ पिता, माता, हस्ते, रुग्ण :, चिकित्सक :, फलानि , जलपात्रं, औषधम् , पुत्र :, दुग्धपात्रं, निरीक्षणं, करोति ]



अथवा

**'चिकित्सालयस्य वर्णनम्' इति विषयमधिकृत्य मञ्जूषायां प्रदत्तपदसहायतया संस्कृते पञ्च वाक्यानि लिखत।**

**4. अधोलिखितवाक्यानि वाक्यानि संस्कृतभाषया अनूद्य लिखत।**

**( केवलं पञ्च वाक्यानि )** 1 x 5 = 5

क) छात्रजीवन मानवजीवन की आधारशिला हैं। Student life is the basis of human life.

ख) हम दोनों विद्यालय जायेंगे। We both will go to school.

ग) शिक्षा नम्रता देती हैं। Education gives humility.

घ) मोहन अब कहाँ जाएगा। Where will Mohan go now ?

ङ) मेरी माता अत्यन्त गरीब है। My mother is very poor.

च) अध्यापक सदा छात्रों का हित करते हैं। Teachers always do good to students.

छ) श्रीकृष्ण ने अर्जुन को गीता का ज्ञान दिया था। Srikrishna gave knowledge of Gita to Arjuna

## ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्काः

**5. अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिं/संधिविच्छेदं वा कुरुत।** 1 x 4 = 4

क) <u>**सत् + मित्रं**</u> पापात् निवारयति।

ख) <u>**सद्विद्या**</u> यदि किं धनैरपयशो यद्यस्ति।

ग) पुत्र: **<u>पितुरिच्छां</u>** जानाति।

घ) सः **<u>तपः + चर्यया</u>** विद्वान् भवितुम् इच्छति स्म।

**6. अधोलिखितवाक्येषु समुचितं समस्तपदं वा विग्रहवाक्यं वा चिनुत।** 1 x 4 = 4

क) <u>गृहे गृहे</u> संस्कृतभाषा विलसतु।

(अ) प्रतिगृहे (आ) प्रतिगृहस्य

(इ) अनुगृहम् (ई) प्रतिगृहम्

ख) <u>पीतम् अम्बरं यस्य सः</u> भगवान् कृष्णः मम प्रिय:।

(अ) पीतमम्बरं (आ) पीताम्बर:

(इ) पीताम्बरधारी (ई) पीतमम्बर:

ग) <u>रामलक्ष्मणौ</u> पितृवचनम् अनुसृत्य वनं गतौ।

(अ) रामा: च लक्ष्मणा: च (आ) राम: च लक्ष्मणः च

(इ) रामं च लक्ष्मणं च (ई) रामे लक्ष्मणे च

घ) रात्रौ तौ <u>नदीसमीपे</u> एकं भवनं अपश्यताम्।

(अ) नद्या: समीपे (आ) नदीं समीपे

(इ) नदौ समीपे (ई) नद्यै समीपे

**7. प्रकृतिप्रत्ययौ संयोज्य विभज्य वा कोष्ठकात् चित्वा लिखत।** 1 x 4 = 4

क) विद्याया: <u>महत्त्वम्</u> अनुपमम्।

(अ) महत्त्व + अम् (आ) महत् + त्व

(इ) महा + त्वं (ई )मह + त्वम्

ख) एषा बालिका अतीव <u>बुद्धि + मतुप्</u> अस्ति।

(अ) बुद्धिमान् (आ) बुद्धिमत्ता

(इ) बुद्धिमत् (ई) बुद्धिमती

ग) व्यापारेण जना: <u>आर्थिकम्</u> लाभं प्राप्नुवन्ति।

(अ) अर्थ + मतुप् (आ) अर्थ + ठक्

(इ) अर्थ + तल् (ई) अर्थ + टाप्

घ) इयं बालिका अतीव <u>सुन्दरी</u> अस्ति।

(अ) सुन्दर + तल्   (आ) सुन्दर + ङीप्

(इ) सुन्दर + टाप्   (ई) सुंदर + मतुप्

**8. वाच्यानुसारं कोष्ठकात् उचितपदानि चित्वा रिक्तस्थानानि पूरयत।** 1 x 3 = 3

क) सः इदानीं किं ________ ?

(अ) करोति   (आ) कुरुतः

(इ) क्रियते   (ई) क्रियन्ते

ख) ________ गीतापाठः क्रियते।

(अ) सः   (आ) तेन

(इ) ते   (ई) तस्मिन्

ग) सः कतमं ________ पठति ?

(अ) अध्यायः   (आ) अध्यायात्

(इ) अध्यायस्य   (ई) अध्यायम्

**9. उचितं समयवाचकपदं लिखित्वा वाक्यानि पूरयत।** 1 x 4 = 4

गुरुः शिष्यान् उपदिशति।

क) प्रातः (4.00) ________ वादने उत्थातव्यम्।

ख) ततः ( 5.30 ) ________ वादनपर्यन्तं ध्यानं करणीयम्।

ग) प्रातः (7.15) ________ वादने पादपानां सेचनं करणीयम्।

घ) मध्याह्ने (12:00) ________ वादने भोजनं करणीयम्।

**10. समुचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत।** 1 x 3 = 3

**( श्वः, इतस्ततः, शनैः )**

क) क्रीडाङ्गणे ________ बालकाः क्रीडन्ति।

ख) कच्छपाः ________ चलन्ति।

ग) मम पिता ________ दिल्लीतः आगमिष्यति।

**11. रेखाङ्कितं पदम् अशुद्धम् अस्ति। तस्य स्थाने कोष्ठकात् उचितं शुद्धं पदं चित्वा वाक्यानि पूरयत ।** 1 x 3 = 3

क) तडागे अनेकानि <u>कमलं</u> सन्ति।

(अ) कमले (आ) कमलानि

(इ) कमला: (ई) कमल:

ख) त्वं कदा संस्कृतं <u>पठति</u> ?

(अ) पठामि (आ) पठन्ति

(इ) पठसि (ई) पठथ

ग) ह्य: भानुवासर: <u>अस्ति</u>।

(अ) सन्ति (आ) अस्मि

(इ) आसन् (ई) आसीत्

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।**

विचित्रा दैवगतिः। तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौर: गृहाभ्यन्तरं प्रविष्टः। तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः। चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च, परं विचित्रमघटत। चौरः एव उच्चैः क्रोशितुमारभत -"चौरोऽयं चौरोऽयम्" इति। तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्रागच्छन्। वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्। यद्यपि ग्रामस्य आरक्षी एव चौरः आसीत्। तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्।

**1) एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् )** ½ x 2 = 1

क) तस्यामेव रात्रौ तस्मिन् गृहे कः गृहाभ्यन्तरं प्रविष्टः ?

ख) अतिथिः केन प्रबुद्धः ?

ग) " चौरोऽयं चौरोऽयम् " इति कः उच्चैः क्रोशितुमारभत ?

**2) एकवाक्येन उत्तरत। ( केवलं प्रश्नद्वयम् )** 1 x 2 = 2

क) चौरः किं कृत्वा पलायितः ?

ख) ग्रामवासिनः किं कृतवन्तः ?

ग) रक्षापुरुषः तम् अतिथिं कुत्र प्राक्षिपत् ?

**3) निर्देशानुसारम् उत्तरत । ( केवलं प्रश्नद्वयम् )** 1 x 2 =2

क) प्रविष्टः इति कर्तृपदस्य क्रियापदं किम् ?

ख) चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः - अत्र अतिथि: इति पदस्य विशेषणपदं किम् ?

ग) "नीचैः" इति पदस्य विलोमपदं किम् ?

**13. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत ।**

उदीरितोऽर्थः पशुनापि गृह्यते हयाश्च नागाश्च वहन्ति बोधिता: ।
अनुक्तमप्यूहति पण्डितो जनः परेङ्गितज्ञानफला हि बुद्धयः ॥

**1) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

क) कीदृशः अर्थः पशुनापि गृह्यते ?

ख) अनुक्तं कः ऊहति ?

ग) पारेङ्गितज्ञानफला कः?

**2) एकवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

क) पण्डितः जनः किं ऊहति ?

ख) के बोधिता: वहन्ति ?

ग) बुद्धयः कीदृश्यः भवन्ति ?

**3) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

क) उदीरितोऽर्थः पशुनापि गृह्यते - अत्र पशुना इति कर्तृपदस्य क्रियापदं किम् ?

ख) अनुक्तमप्यूहति पण्डितो जनः - अत्र 'पण्डितो जन:' इत्यत्र विशेष्यपदं किम् ?

ग) अश्वाः इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत ।**

पिकः - (उपहसन् ) कथं त्वं योग्यः वनराजः भवितुं , यत्र तत्र का - का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि । न रूपम् , न ध्वनिरस्ति । कृष्णवर्णम् मेध्यामेध्यमक्षकं त्वां कथं वनराजं मन्यामहे वयम् ?

काकः - अरे ! अरे! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ?
अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा - 'अनृतं वदसि चेत् काकः दशेत् ' - इति प्रकारेण । अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् । अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते ।

पिकः - अलम् अलम् अतिविकत्थनेन । किं विस्मर्यते यत् –

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
वसन्तसमये प्राप्ते काकः काकः पिकः पिकः ॥

काकः - रे परभृत् ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहम् एव करुणापरः पक्षिसम्राट् काकः ।

**1) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

क) काकः केन वातावरणमाकुलीकरोति ?

ख) कीदृशः विद्यार्थी आदर्शच्छात्रः मन्यते ?

ग) कदा काकः काकः पिकः पिकः ?

**2) एकवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

क) काकस्य सत्यप्रियता जनानां कृते केन प्रकारेण उदाहरणस्वरूपा भवति ?

ख) पिककाकयोः भेदः कदा भवति ?

ग) क: एव करुणापर: पक्षिसाम्राट् ?

**3) निर्देशानुसारम् उत्तरत । (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

क) त्वां कथं वनराजं मन्यामहे वयम् ?- अत्र मन्यामहे इति क्रियापदस्य कर्तृपदं किम् ?

ख) काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः -अत्र काकचेष्ट: इत्यस्य विशेष्यपदं किम् ?

ग) सत्यम् इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत ।** 1 x 4 = 4

क) अयं **अन्येभ्यो** दुर्बलः ।

ख)मयूरस्य नृत्यं **प्रकृतेः** आराधना ।

ग) वानरः आत्मानं **वनराजपदाय** योग्यं मन्यते ।

घ) उभौ शवं **चत्वरे** स्थापितवन्तौ ।

**16. अधोदत्तस्य श्लोकस्य अन्वयं कोष्ठकात् उचितैः पदैः पूरयित्वा पुनः लिखत ।** 1x4= 4

भुक्ता मृणालपटली भवता निपीतान्यम्बूनि यत्र नलिनानि निषेवितानि ।

रे राजहंस ! वद तस्य सरोवरस्य कृत्येन केन भवितासि कृतोपकारः ॥

**मञ्जूषा - ( नलिनानि, सरोवरस्य, असि, मृणालपटली )**

**अन्वयः -** रे राजहंसः ! यत्र भवता (1) ______ भुक्ता , अम्बूनि निपीतानि (2) ______ निषेवितानि, तस्य (3) _________ केन कृत्येन कृतोपकारः भविता (4) ________ ? वद ।

**अथवा**

**अधोलिखितं श्लोकं पठित्वा भावार्थं मञ्जूषायां प्रदत्तशब्दैः पूरयत ।**

निमित्तमुद्दिश्य हि यः प्रकुप्यति ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै कथं जनस्तं परितोषयिष्यति ॥

मञ्जूषा - ( **अपगमे परितोषयिष्यति निमित्तं अकारणद्वेषि** )

**भावार्थः -** यः (1) ........... उद्दिश्य प्रकुप्यति तस्य (2) ............... सः ध्रुवं प्रसीदति । यस्य मनः (3) ........... (अस्ति) जनः तं कथं (4) ............ ?

**17. अधोदत्तं कथाभागं समुचितक्रमेण उत्तरपुस्तिकायां पुनः लिखत ।** ½ x 8 = 4

क) तस्मिन् गृहे निहिताम् एकाम् मञ्जूषामादाय कश्चन चौरः पलायितः ।

ख) न्यायाधीशः आरक्षिणाम् अभियुक्तं च कञ्चन शवं न्यायालये आनेतुम् आदिष्टवान् ।

ग) परिश्रमेण उपार्जितेन वित्तेन स्वपुत्रम् महाविद्यालये प्रवेशं दापयितुं सफलो जातः ।

घ) रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्रक्षिपत् ।

ङ) तनूजस्य रुग्णतामाकर्ण्य अर्थकार्श्येन पीडितः पिता पदातिरेव प्राचलत् ।

च) प्रमाणेन न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान् ।

छ) न्यायाधीशः सर्वं वृत्तमवगत्य अतिथिं निर्दोषम् अमन्यत आरक्षिणां च दोषभाजनम् ।

ज) रात्रिनिवासं कर्तुं पार्श्वस्थिते ग्रामे कश्चन करुणापरो गृही तस्मै आश्रयं प्रयच्छत् ।

**18. प्रसङ्गानुकूलम् स्थूलपदस्य अर्थचयनम् कुरुत ।** 1 x 3 = 3

क) पिता **<u>तनूजस्य</u>** रुग्णतामाकर्ण्य व्याकुलो जातः ।

(अ) चौरस्य (आ) भ्रातुः (इ) पुत्रस्य (उ) पुत्र्याः

ख) शीघ्रमेव गजस्यापि पुच्छं **<u>विधूय</u>** वृक्षोपरि आरोहति ।

(अ) दृष्ट्वा (आ) आकृष्य (इ) दृष्ट्वा (उ) आनीय

ग) अङ्गव्यवहितं **<u>अध्यास्यतां</u>** सिंहासनम् ।

(अ) उपविश्यताम् (आ) गम्यताम् (इ) आश्लिष्यताम् (उ) क्रियताम्

# आदर्शप्रश्नपत्रम् - 2 (२०२२ - २३)

## SAMPLE QUESTION PAPER - 2 (2022 - 23)

## कक्षा – दशमी / CLASS-X

## संस्कृतम् (कोड् – 122) SANSKRIT( CODE - 122)

| | |
|---|---|
| **समय: - होरात्रयम्** | **सम्पूर्णाङ्का: - ८०** |
| **Time allowed - 3 Hours** | **TotalMarks - 80** |

**सामान्य निर्देशा:**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति।
2. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय:।
3. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि।
5. प्रश्नानां निर्देशा: ध्यानेन पठनीया:।

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

| | | |
|---|---|---|
| **क खण्ड: - अपठित-अवबोधनम्** | **-** | **10 अङ्का:** |
| **ख खण्ड: - रचनात्मकं कार्यम्** | **-** | **15 अङ्का:** |
| **ग खण्ड: - अनुप्रयुक्तं व्याकरणम्** | **-** | **25 अङ्का:** |
| **घ खण्ड: - पठितावबोधनम्** | **-** | **30 अङ्का:** |

## क खण्डः - अपठित-अवबोधनम् - 10 अङ्काः

**1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** (10)

किमिदम् अनुशासनम् इति । शासनपदस्य अर्थः ' आज्ञा ' इति । अनुशासनपदस्य अर्थः आज्ञापालनम् इति । आज्ञापालनम् , नियमपालनम् इत्यादयः गुणाः अनुशासने समायान्ति । वयं भारतीयाः स्वतन्त्रराष्ट्रस्य नागरिकाः स्मः । अस्माकम् एकं संविधानम् अस्ति । तत्र नागरिकैः अनुवर्तनीयाः बहवः नियमाः सन्ति । अनुशासितनागरिकस्य इदं कर्तव्यम् अस्ति यत् सः स्वसंविधाने स्वीकृतान् नियमान् पालयेत् । यदि सः तथा करोति तदा तस्य देश: समुन्नतिं प्राप्नुयात् , नागरिकजनानां जीवनं सुखमयं भवेत् च । तेन तस्यापि जीवनं सुखम् आवहति । यदा सः अनुशासनहीनतां प्रदर्शयति, यानि कार्याणि आरक्षिजनैः करणीयानि तानि सः स्वयमेव कर्तुम् उत्सहते, तदा राष्ट्रजीवनम् संकटोपपन्नं जायते । ईदृशम् अवसरम् प्रतीक्षमाणाः शत्रवः स्वपक्षे तस्य लाभं प्राप्नुवन्ति ।

**क) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

क) शासनपदस्य अर्थः कः ?

ख) तत्र नागरिकैः अनुवर्तनीयाः के सन्ति ?

ग) के स्वतन्त्रराष्ट्रस्य नागरिकाः सन्ति ?

**ख) पूर्णवाक्येन उत्तरत (केवलं प्रश्न द्वयम् )** 2 x 2 = 4

क) के गुणाः अनुशासने समायन्ति ?

ख) अनुशासितनागरिकस्य किम् कर्तव्यम् अस्ति ?

ग) अनुशासनपदस्य कः अर्थः अस्ति ?

**ग) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत ।** 1 x 1 = 1

**घ) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयम्) ।** 1 x 3 = 3

(i)'अवनतिम्' इति पदस्य अत्र किं विलोमपदं प्रयुक्तम्?

(क) प्रतीक्षमाणाः (ख) समुन्नतिम्

(ग) संकटोपपन्नं (घ) कर्तव्यम्

(ii)' प्राप्नुवन्ति 'इति क्रियापदस्य कर्तृपदम् अवचित्य लिखत ।

क) शत्रवः (ख) प्रतीक्षमाणाः

ग) स्वपक्षे (घ) अवसरम्

(iii) 'अवसरम् प्रतीक्षमाणाः शत्रवः' - अत्र शत्रव: इत्यस्य विशेषणपदं किम् ?

(क) अवसरम् (ख) प्रतीक्षामाणा:

(ग) शत्रव: (घ) अत्र

(iv) 'संकटग्रस्तम्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(क).स्वीकृतान् (ख) प्रतीक्षमाणाः

(ग) संकटोपपन्नम् (घ) प्राप्नुवन्ति

## ख खण्ड: - रचनात्मकं कार्यम् - 15 अङ्का:

**2. भवती जागृतिः शिक्षाशुल्क-आवासशुल्क-परीक्षाशुल्कादीनामर्थे धनप्रेषणार्थं स्वपितरं प्रति लिखितं पत्रं मञ्जूषायाः सहायतया पूरियत्वा पुनः लिखत।** ½ x 10 = 5

**मञ्जूषा**

**[ जागृतिः, प्रेषयतु, परीक्षाशुल्कम्, पठने, गुरुकुलस्य, सुखदः, स्वस्थाः, चिन्ता, रूप्यकाणि, वातावरणम् ]**

छात्रावास: (कन्यार्थम्)
कन्या गुरुकुल विद्यालय:
द्रौणस्थली ( उत्तराखण्ड:)
दिनाङ्क: _____________

प्रियपितृचरणाः,

सादरं प्रणाम: ।

आशास्यते यत् तत्र परिवारे सर्वे जना : (1) ________ भवन्ति। अहम् अपि अत्र स्वस्था अस्मि। अत्र (2) ________ अतीव शोभनं लाभप्रदं चास्ति। काचिदपि (3) ________ न करणीया। पितृचरणाः ! भवन्तः तु जानन्ति एव यत् अस्मिन् मासे (4) ________ सर्वे शुल्काः देयाः सन्ति। अतः छात्रावासस्य आवासशुल्कं (5) ________ च आहत्य पञ्चसहस्रम् (6) ________ दातव्यानि सन्ति। कृपया एते शुल्काः अस्मिन् मासे एव देयाः इति अवधार्य शीघ्रमेव रुप्यकाणि (7) ________ । येन मम (8) ________ व्यवधानम् न भवेत्। अत्र मम वास: (9 ) ________ भवति। किञ्चिदपि कष्टम् न अस्ति। स्वसमाचारं लिखतु भवान्।

भवदीया पुत्री

(10) ________

**3. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दसहायतया संस्कृते पञ्च वाक्यानि लिखत।**

1 x 5 = 5

मञ्जूषा - [ वृक्षाः, समुद्रतटः, तटे, जले, तरन्ति, नौकाः,आकाशः, कन्दुकम्, खगाः, क्रीडन्ति, सन्ति, मेघाः, नीलवर्णः, सूर्यः, सिकताः ]



**अथवा**

**विद्यालये स्वच्छता - इति विषयम् अधिकृत्य मञ्जूषातः पदानि चित्वा पञ्चवाक्येषु एकम् अनुच्छेदं लिखत।**

| |
|---|
| कर्गदपत्राणि , अवकरपात्रे , सुधाखण्डान् , क्षिपन्ति , भित्तिषु , लिखन्ति , अवकरम् , पातयन्ति , उद्याने , त्रोटयन्ति , पुष्पाणि कर्तव्यम् |

**4. अधोलिखितवाक्यानि वाक्यानि संस्कृतभाषया अनूद्य लिखत।**

**( केवलं पञ्च वाक्यानि )** 1 x 5 = 5

1. हम सब रामायण पढते हैं। / We all read ramayana.
2. स्वास्थ्य के लिए व्यायाम करना चाहिए। / We should do exercise for health.
3. वह फल लेकर घर गई। / She went to home by taking fruits.
4. तुम्हें भी पुस्तक पढनी चाहिए। / You also should read book.
5. हम दोनों गीत गाऐंगे। / We both will sing song.
6. कल राघव कहाँ था ? / Where was Raghav yesterday ?
7. विद्या के बिना जीवन व्यर्थ है। / Life is nothig without knowledge.

## ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्काः

**5. अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिं/संधिविच्छेदं वा कुरुत ।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

(i) **एतयोर्जननी** तेनावमानिता निर्वासिता ।

(ii) **तस्मादङ्क** व्यवहितमध्यास्तां सिंहासनम् ।

(iii) **व्याघ्रोऽपि** सहसा नष्ट गलबद्धश्रृगालकः ।

(iv) **बुद्धिः + बलवती** तन्वी सर्वकार्येषु सर्वदा ।

(v) भगवान् वाल्मीकिः **वधूः+ इति** ।

**6. अधोलिखितवाक्येषु समुचितं समस्तपदं वा विग्रहवाक्यं वा चिनुत ।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

(i) अत्र विविधा **भोजनाय सामग्री** अस्ति।

(क)भोजनस्साम्ग्री (ख) भोजनसामग्री

(ग) भोजसामग्री (घ) भोजनं सामग्री

(ii) बालक: **निर्भयं** गायति ।

(क) निराभय: (ख) भयस्य अभाव:

(ग) भय सहित: (घ) भयोपेत:

(iii) को भेदः **पिकः च काकः च तयोः** ।

(क) पिककाकयो : (ख) पिककाकौ

(ग) पिककाकम् (घ) काकौ

(iv) सर्वेषाम् महत्वं विद्यते **यथासमयम्** ।

(क) समयम् अनुसारम् (ख) समयम् अतिक्रम्य

(ग) समयम् अनतिक्रम्य (घ ) समयस्य योग्यम्

(v) ध्यानमग्नः **स्थिता प्रज्ञा यस्य स** इव तिष्ठामि ।

(क) स्थितप्रज्ञः (ख) स्थितप्रज्ञा

(ग) स्थितप्रज्ञम (घ) स्थित प्रज्ञाम्

**7. प्रकृतिप्रत्ययौ संयोज्य विभज्य वा कोष्ठकात् चित्वा लिखत।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

(i) पुत्र ! तव **कृशता** मां तुदति।

(क) कृश + तल् (ख) कृश + ता

(ग) कृश् + शत् (घ ) कृ + शता

(ii) **गुणवन्तः** जनाः यशः लभन्ते।

(क) गुण + क्तवतु (ख) गुण + टाप्

(ग) गुण + मतुप् (घ) गुण + शतृ

(iii) दीपिका क्रीडायाम् ( **कुशल** + **टाप्** ) अस्ति।

(क) कुशलता (ख) कुशलय

(ग) कुशला (घ) कुशलताम्

(iv) शिक्षायाः **महत्त्वं** तु अद्वितीयम् एव।

(क) महा + त्वं (ख) मह + त्व

(ग) महत् + त्वं (घ) महत् + त्व

(v) मानवः एकः **समाज + ठक्** प्राणी अस्ति।

(क) सामाजिकः (ख) सामाजिकम्

(ग) समाजः (घ) समाजिकः

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत।**

**( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

1. गायत्री - सन्ध्ये ! किं ---------- ओदनं पचसि ?

(क) त्वया (ख) तुभ्यम्

(ग) त्वम् ( घ) तव

2. सन्ध्या - आम् ! मया ओदनः ---------।

(क) पचसि (ख) पच्चेते

(ग) पच्यते (घ) पचति

गायत्री - तदनन्तरं त्वं किं करिष्यसि ?

3. सन्ध्या - तदनन्तरम् ---------- गीता पठिष्यते।

(क) अहम् (ख) मया

(ग) मम ( घ) माम्

4. गायत्री - ह्यः अहमपि गीताम् ----------- ।

(क) अपठत् (ख) अपठत

(ग) अपठम् (घ) अपठतम्

**9. संयावाचकशब्दैः अधोलिखितदिनचर्यां पूरयत। ( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

1. मम माता -------(4.15) वादने उत्तिष्ठति।

2. सा ------- (5.00) वादने योगाभ्यासं करोति।

3. तदनन्तरम् सा स्नात्वा -------- (6.45) वादने भोजनं पचति।

4. भोजनं गृहीत्वा अहं -------(7.30) वादने विद्यालयं गच्छामि।

5. अहम् -------(3.00) वादने विद्यालयात् आगच्छामि।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदै : अधोलिखितवाक्यानि पूरयत।**

**( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

**( शनैः , अद्य , उच्चैः , वृथा )**

1. वने सिंहा: ______ गर्हन्ति।

2. कच्छप: _______ चलति।

3. ________ गुरुवार: अस्ति।

4. समृद्रेषु वृष्टिः _______ ।

**11. रेखाङ्कितं पदम् अशुद्धम् अस्ति। तस्य स्थाने कोष्ठकात् उचितं शुद्धं पदं चित्वा वाक्यानि पूरयत । ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

1. अहं प्रतिदिनं मातापितरौ **प्रणमति**।

(क) प्रणमतः (ख) प्रणमन्ति

(ग) प्रणमामि (घ) प्रणमामः

2. **द्वे** बालकौ पठतः।

(क) द्वयम् (ख) द्वि

(ग) द्वौ ( घ) द्वयोः

3. भवान् सुखी **भवन्तु।**

(क) भव (ख) भवत

(ग)भवतु (घ) भवन्तु

4. अहम् **<u>स्वपितरम्</u>** सह विद्यालयं गच्छति ।

(क) स्वपितुः (ख) स्वपित्रा

(ग) स्वपितः (घ) स्वपिता

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

भूमौ पतिते स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् । सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् - "अयि शुभे! किमेवं रोदिषि? उच्यताम्" इति । "भो वासव ! पुत्रस्य दैन्यम् दृष्टवा अहं रोदिमि । सः दीनः इति जानन्नपि कृषकः तं बहुधा पीडयति । सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुम् न शक्नोति । एतत् भवान् पश्यति न ? " इति प्रत्यवोचत् ।

**1) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् )** ½ x 2 = 1

1. 'किम् एवं रोदिषि ?' इति कः अपृच्छत् ?
2. क: तं बहुधा पीडयति ?
3. सा पुत्रस्य किं दृष्ट्वा रोदिति ?

**2) एकवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् )** 1 x 2 = 2

1. माता सुरभिः किमर्थं अश्रूणि मुञ्चति स्म ?
2. सुरभिः इन्द्राय किं अवदत् ?
3. वृषभः कथं भारमुद्वहति ?

**3) निर्देशानुसारम् उत्तरत । ( केवलं प्रश्नद्वयम् )** 1 x 2 =2

1. 'क्षितौ' इत्यर्थे किम् पदम् गद्यांशे प्रयुक्तम् ?
2. 'सुराधिपः ताम् अपृच्छत्' अत्र कर्तृपदं किम् ?
3. अत्र 'काठिन्येन' इति पदस्य पर्यायपदं किं प्रयुक्तम् ?

**13. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत ।**

सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥

**1) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

1. कीदृशः वृक्षः सेवितव्यः ?
2. महावृक्षः कीदृशः भवति ?
3. दैवात् किं नास्ति ?

**2) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. महावृक्षेषु कस्मात् फलं नास्ति ?
2. क: सेवितव्य: ?
3. किं केनापि न निवार्यते ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. 'महान् वृक्षः' अत्र विशेष्यपदं किम् ?
2. 'भाग्यवशात्' इत्यर्थे किं पदं प्रयुक्तम् ?
3. 'रहित:' इति पदस्य विपर्ययपदं किम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।**

काक : - रे परभृत ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्युः पिकाः ? अतः अहं एव करुणापरः पक्षिसम्राट् काकः।

गज: - समीपतः एवागच्छन् अरे ! अरे ! सर्वां वार्तां शृण्वन्नेवाहम् अत्रागच्छम्। अहं विशालकाय: , बलशाली , पराक्रमी च। सिंहः वा स्यात् अथवा अन्यः कोऽपि, वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि। किमन्य: कोऽप्यस्ति एतादृशः पराक्रमी। अतः अहमेव योग्यः वनराजपदाय।

वानरः _ अरे ! अरे ! एवं वा ( शीघ्रमेव गजस्यापि पुच्छं विधूय वृक्षोपरि आरोहति। )

**1) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

1. काकः कस्य सन्ततिं पालयति ?
2. करुणापरः पक्षिसम्राट् कः ?
3. सर्वां वार्तां शृण्वन्नेव कः आगच्छत् ?

**2) एकवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. गज: आत्मन: विषये किं कथयति?
2. गजः कथं वन्यपशून् तुदन्तम् जन्तुम् मारयिष्यति ?
3. पिकस्य सन्ततिं कः पालयति ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. 'सर्वाम् वार्ताम्' अत्र विशेष्यपदं किं प्रयुक्तम् ?
2. 'अहमेव योग्यः वनराजपदाय' अत्र कर्तृपदं किम् ?
3. 'अहं तव सन्ततिं न पालयामि' अत्र क्रियापदं किम् ?

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4**

1. अहम् **एतस्य** नामधेयम् जानामि।
2. **सुराधिपः** ताम् अपृच्छत्।
3. एवमेव **भवन्तौ** गायताम्।
4. धैर्यवान् **लोके** परिभवं न प्राप्नोति।
5. उद्याने **पक्षिणां** कलरवं चेत: प्रसादयति।

**16. अधोदत्तस्य श्लोकस्य अन्वयं कोष्ठकात् उचितैः पदैः पूरयित्वा पुनः लिखत।** 1x4= 4

अवक्रता यथा चित्ते तथा वाचि भवेद् यदि।
तदेवाहुः महात्मानः समत्वमिति तथ्यतः॥

**मञ्जूषा - [ वाचि, तथ्यत:, अवक्रता, आहुः ]**

अन्वयः - (i) --------------------यथा चित्ते तथा यदि (ii) ------------------ भवेत्.
महात्मानः तदेव (iii) --------------- समत्वम् इति (iv) ---------------।

**अथवा**

**अधोलिखितं श्लोकं पठित्वा भावार्थं मञ्जूषायां प्रदत्तशब्दैः पूरयत।** 1x4= 4

एकेन राजहंसेन या शोभा सरसो भवेत्।
न सा बकसहस्रेण परितस्तीरवासिना॥

**मञ्जूषा - [ मूर्खसहस्रेण, शोभा, बकसहस्रेण, सज्जनेन ]**

भावार्थः - सरसः या (i) -------------- एकेन राजहंसेन भवति सा शोभा तस्य तीरे वसता (ii) ------------- अपि न भविष्यति। तथैव एकेनापि (iii) ------------- समाजस्य देशस्य वा या शोभा भवति सा तु (iv) ----------- कदापि न सम्भवति।

**17. अधोदत्तं कथाभागं समुचितक्रमेण उत्तरपुस्तिकायां पुनः लिखत।** ½ x 8 = 4

(क) सः पुत्रं द्रष्टुम् पदातिरेव प्राचलत्।
(ख) तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।
(ग) चौरः एव उच्चैः क्रोशितुम् आरभत।
(घ) कश्चन निर्धनः जनः वित्तम् उपार्जितवान्।
(ङ) एकदा तस्य पुत्रः रुग्णः जातः।
(च) चौरस्य पदध्वनिना अतिथिः प्रबुद्धः।
(छ) रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः।
(ज) ग्रामवासिनः वराकमतिथिमेव चौरं मत्वा अभर्त्सयन्।

**18. प्रसङ्गानुकूलम् स्थूलपदस्य अर्थचयनम् कुरुत। ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

1. अत्र जीवनं **दुर्वहं** जातम्।

(क) सरलम् (ख) कठिनम्

(ग) जटिलम् (घ) शुद्धम्

2. **अपत्येषु** च सर्वेषु जननी तुल्यवत्सला।

(क) सन्तानेषु (ख) पितृषु

(ग) सहोदरेषु (घ) शिष्येषु

3. **तौयैः** अल्पैः अपि तरोः पुष्टिः भवति।

(क) नदीभि: (ख) त्वग्भि

(ग) दुग्धैः (घ) जलै:

**4. अवक्रता** यथा चित्ते भवेत्।

(क) ऋजुता (ख) कठोरता

(ग) मृदुता (घ) सन्तुष्टता

# आदर्शप्रश्नपत्रम् - 3 (२०२२ - २३)

**SAMPLE QUESTION PAPER - 3 (2022 - 23)**

**कक्षा – दशमी / CLASS-X**

**संस्कृतम् (कोड् – 122) SANSKRIT( CODE - 122)**

| | |
|---|---|
| **समय: - होरात्रयम्** | **सम्पूर्णाङ्का: - ८०** |
| **Time allowed - 3 Hours** | **TotalMarks - 80** |

## सामान्य निर्देशा:

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति ।
2. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय: ।
3. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया ।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि ।
5. प्रश्नानां निर्देशा: ध्यानेन पठनीया: ।

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति ।

| | | |
|---|---|---|
| **क खण्ड: - अपठित-अवबोधनम्** | - | **10 अङ्का:** |
| **ख खण्ड: - रचनात्मकं कार्यम्** | - | **15 अङ्का:** |
| **ग खण्ड: - अनुप्रयुक्तं व्याकरणम्** | - | **25 अङ्का:** |
| **घ खण्ड: - पठितावबोधनम्** | - | **30 अङ्का:** |

## क खण्डः - अपठित-अवबोधनम् - 10 अङ्काः

**1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।** (10)

प्राचीनकालादपि मानवचर्यायाः अविभाज्यम् अङ्गम् अस्ति क्रीडा । नित्यजीवने विरसताजनितं खेदम् अपनेतुं मनोरञ्जनार्थं मानवेन क्रीडाः आश्रिताः । क्रीडा आनन्दं, ज्ञानं, शक्तिं च प्राधान्येन वर्धयति, मनसः खेदं च अपनयति इत्यतः आबालवृद्धं , आनिर्धनधनिकं, आपामरपण्डितं सर्वे क्रीडार्थम् अर्हाः एव भवन्ति । भारते ऋग्वेदकालात् अपि क्रीडानाम् उल्लेखः कृतः दृश्यते । द्यूतं, चतुरङ्गं, मृगया, अश्वारोहणखड्गचालनादयः युद्धक्रीडाः, अन्त्याक्षरी, समस्यापूर्तिप्रभृतयः भाषाक्रीडाः वीटादयः उत्साहवर्धिकाः क्रीडाः भारते प्रसिद्धा: आसन् । क्रीडया आत्मविश्वासः, निष्ठा, श्रमानुरक्तिः, अनुशासनप्रियता, शिष्टाचारः, सहयोगभावः, नेतृत्वजागरणं, कर्तव्यपालनं, समदुःख-सुखभावः, मानसिकदृढता इत्यादयः गुणाः विशेषतः वर्धन्ते ।

**क) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. प्राचीनकालादपि कस्याः अविभाज्यम् अङ्गम् अस्ति क्रीडा ?
2. भारते कस्मात् कालादपि क्रीडानाम् उल्लेखः कृतः दृश्यते ?
3. नित्यजीवने विरसताजनितं खेदम् अपनेतुं मनोरञ्जनार्थं केन क्रीडाः आश्रिताः ?

**ख) पूर्णवाक्येन उत्तरत (केवलं प्रश्न द्वयम् )** 2 x 2 = 4

1. क्रीडया के गुणाः विशेषतः वर्धन्ते ?
2. भारते प्रसिद्धाः क्रीडाः काः आसन् ?
3. क्रीडा किम् अपनयति ?

**ग) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत ।** 1 x 1 = 1

**घ) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयम्) ।** 1 x 3 = 3

1. उत्साहवर्धिताः क्रीडाः - अत्र विशेषणपदं किम् ?

    क) उत्साहवर्धिताः ख) क्रीडाः

    ग) उत्साहः घ) वर्धिता:

2. मानवेन क्रीडाः आश्रिताः - अत्र क्रियापदं किम् ?

    क) आश्रिताः ख) क्रीडाः

    ग) मानवेन घ) मानव:

3. अनुच्छेदे सदाचारः इत्यस्य किं समानार्थकपदं प्रयुक्तवान् ?

क) अनुरक्तिः  ख) शिष्टाचारः

ग) अनुशासनप्रियता  घ) विशेषत:

4. सरसता इत्यस्य विलोमपदं अनुच्छेदात् चित्वा लिखत ।

क) विरसता  ख) उत्साहः

ग) खिन्नता  घ) सुखभाव:

**ख खण्ड: - रचनात्मकं कार्यम् - 15 अङ्का:**

**2.** भवान् अरुण: । मित्रं सुरेशं प्रति लिखितं पत्रं मञ्जूषासहायेन पूरयित्वा पुनः लिखत । ½ x 10=5

**मञ्जूषा**

[ जनसंरक्षणप्रचारकार्ये, देशस्य, प्रयतमानाः, अपव्ययम्, चिन्तयति, जागरूकता, प्रयासः, जानीमः, जीवनम्, अस्तु ]

छात्रावासतः

दिनाङ्कः _________

प्रिय मित्र !

सप्रेम नमोनमः,

अत्र कुशलं तत्रापि तथा (i) ________ । भवतः पत्रं पठित्वा अतीव प्रसन्नताम् अनुभवामि यत् भवान् (ii) ________ रतोऽस्ति । एषः तु उत्तमः (iii) ________ अस्ति । वयं सर्वे एव (iv) ________ यत् जीवने जलस्य महत्त्वं तु अतुलनीयम् । जलम् विना (v) ________ कष्टमेव इति वयं सर्वे जानीमः । परं पुनरपि वयम् अस्य (vi) ________ कुर्मः । अनेन आगामिकाले कियान् भीषणजलसङ्कटः भवेत् इति कोऽपि न (vii) ________ । जलसंरक्षणार्थं (viii) ________ अनिवार्या एव । यदि जनाः अत्र ध्यानं न दास्यन्ति तदा अस्माकं (ix) ________ स्थितिरपि अफ्रीकादेशवत् भविष्यति । यथा ते जलबिन्दुप्राप्त्यर्थं (x) ________ सन्ति । तथा एव अस्माकं देशस्य अपि स्थितिः भविष्यति । अत: जलसंरक्षणार्थं जागरूकता अनिवार्या । शेषं सर्वं कुशलम् । पितृभ्यां चरणयोः चरणवन्दना ।

भवतः मित्रम्

अरुणः

**3. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दसहायतया संस्कृते पञ्च वाक्यानि लिखत।**

1 x 5 = 5

मञ्जूषा - [ कृषकः, वृषभौ, स्वेदपूर्णम्, परिश्रमकारणात्, अन्नदाता, मेघानां, प्रतीक्षाम् , सूर्यातपे, चालयति, कर्षतः, अन्नोत्पादने, हलम्, योगदानम् ]



**अथवा**

**पर्यावरणसंरक्षणम् इति विषयम् अधिकृत्य मञ्जूषासहायेन संस्कृते पञ्च वाक्यानि लिखत।**

**मञ्जूषा**

(पर्यावरणम्, जलप्रदूषणम्, वायुप्रदूषणम् , मनुष्याः, रूग्णाः भवन्ति, प्रकृत्याः हानिः, वृक्षारोपणं, पर्यावरणसंरक्षणम् , कर्तव्यम्)

**4. अधोलिखितवाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं पञ्च वाक्यानि)** 1x5=5

1. हम सब मिलकर गाएँगे। / We will Sing together.
2. तुम दोनों संस्कृत पढ़ो। / Both of you read Sanskrit.
3. वह कल आएगी। / She will come tomorrow.
4. भारत हमारा देश है। / India is our motherland.
5 पिताजी ने राम के लिए खिलौना लाया। / Father brought toy for Ram.
6. लडकियाँ नाचती हैं। / Girls are dancing.
7. वह कार्यालय गया। / He went to the office.

## ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्काः

**5. अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिं/संधिविच्छेदं वा कुरुत ।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

1. दारुणः + च = ____________________
2. तपस्तेपे = _________ + _________
3. पदातिरेव = _________ + _________
4. जगत् + ईशः = ____________________
5. कश्चन = _________ + _________

**6. अधोलिखितवाक्येषु समुचितं समस्तपदं वा विग्रहवाक्यं वा चिनुत ।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

1. <u>वनस्य राजा</u> उच्चैः गर्जति ।

क) वनराजः ख) वनराजानः

ग) वनेराजा घ) वनजः

2. <u>रामलक्ष्मणौ</u> मिथिलां अगच्छताम् ।

क) रामेण लक्ष्मण: च ख) रामौ लक्ष्मणौ च

ग) राम: च लक्ष्मण: च घ) रामाय लक्ष्मणं च

3. <u>कृताभ्यास:</u> जीवने उन्नतिं प्राप्नोति ।

क) कृतो अभ्यास: ख) कृता अभ्यासा

ग) कृत: अभ्यासेन घ) कृत: अभ्यास: येन स:

4. <u>दोषाणां अभावः</u> जीवेम भूमौ ।

क) अदोषम् ख) निर्दोषम्

ग) निशेष: घ) निरदोष:

5. सर्वथा समरूप: **<u>कुटुम्बवृत्तान्तः</u>** ।

क) कुटुम्बस्य वृत्तान्त: ख) कुटुम्बम् वृत्तान्तम्

ग) कुटुम्बेन वृतान्त: घ) कुटुम्ब: वृत्तान्त:

**7. प्रकृतिप्रत्ययौ संयोज्य विभज्य वा कोष्ठकात् चित्वा लिखत।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

1. बुद्धि + मतुप् नारी प्रशस्यते।

    क) बुद्धिमती ख) बुद्धिमताम्

    ग) बुद्धिमतो घ) बुद्धिमान्

2. सेना + ठक् देशं रक्षन्ति।

    क) सैन्यः ख) सैनिका:

    ग) सेनाधिपः घ) सेना

3. आकारस्य (लघु + त्व) कार्यबाधकः न भवेत्।

    क) लघ्वी ख) लघुत्वम्

    ग) लाघवम् घ) लघुता

4. कार्येषु दीर्घसूत्रता कदापि न कर्तव्या।

    क) दीर्घ + त्व ख) दीर्घसूत्र + तल्

    ग) दीर्घत + सूत्रता घ) दीर्घता + ठक्

5. मानव: एक: **समूह + ठक्** प्राणी अस्ति।

    (क) सामूहिक: (ख) सामूहिकौ

    (ग) सामूहिकाय (घ) समूहिक:

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत।**

**( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

1. _______ सत्यं कथ्यते।

    क) त्वम् ख) त्वाम्

    ग) त्वया घ) तव

2. काकः पिकस्य सन्ततिं ___________।

    क) पाल्यते ख) पालयति

    ग) पालयामि घ) पाल्यन्ते

3. पित्रा पुत्राय विद्याधनं _______।

    क) ददाति ख) दीयते

    ग) यच्छति घ) दीयन्ते

4. अहं पित्रा सह आपणं _______।

क) गच्छसि　　　　ख) गच्छति

ग) गच्छाव:　　　　घ) गच्छामि

**9. समयवाचकशब्दैः अधोलिखितदिनचर्यां पूरयत। ( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

1. बालकः _______ वादने उत्तिष्ठति। (6:00)
2. सः _______ वादने विद्यालयं गच्छति। (7:15)
3. _______ वादने विद्यालये अर्धावकाशः भवति। (11:30)
4. सः _______ वादने विद्यालयात् गृहम् गच्छति। (1:45)
5. पुनः बालक: सायं _______ वादने पठनाय उपविशति। (5:15)

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदै : अधोलिखितवाक्यानि पूरयत।**

**( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

**मञ्जूषा :-** ( भृशम्, यत्र, अत्र, सदा, बहिः)

1. इदानीं वायुमण्डलं ___________ प्रदूषितमस्ति।
2. ___________ जीवनं दुर्वहम् अस्ति।
3. ___________ समयस्य सदुपयोगः करणीयः।
4. भूकम्पितसमये ___________ गमनमेव उचितं भवति।
5. ___________ हरीतिमा तत्र शुचि पर्यावरणम्।

**11. रेखाङ्कितं पदम् अशुद्धम् अस्ति। तस्य स्थाने कोष्ठकात् उचितं शुद्धं पदं चित्वा वाक्यानि पूरयत । ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

1. <u>**त्वं**</u> नाम किम् अस्ति ?

(क) त्वया　　　　(ख) तुभ्यम्

(ग) तव　　　　(घ) त्वाम्

2. मम पिता श्व: विदेशं <u>**अगच्छत्**</u>।

(क) गच्छति　　　　(ख) गमिष्यति

(ग) गच्छसि　　　　( घ) गच्छाम

3. उद्याने <u>**त्रय:**</u> बालिका: क्रीडन्ति।

(क) त्रि　　　　(ख) त्रयम्

(ग) तिस्र:　　　　(घ) त्रीणि

4. हिमालयः <u>**उन्नतं**</u> पर्वतः विराजते।

(क) उन्नतः (ख) उन्नते

(ग) उन्नता (घ) उन्नतस्य

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।**

"बहुन्यपत्यानि मे सन्तीति सत्यम्। तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि। यतो हि अयमन्येभ्यो दुर्बलः। सर्वेष्वपत्येषु जननी तुल्यवत्सला एव। तथापि दुर्बले सुते मातुः अभ्यधिका कृपा सहजैव" इति। मुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्। स च तामेवमसान्त्वयत्- "गच्छ वत्से! सर्वं भद्रं जायेत।" अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत। पश्यतः एव सर्वत्र जलोपप्लवः सञ्जातः। कृषकः हर्षातिरेकेण कर्षणविमुखः सन् वृषभौ नीत्वा गृहमगात्।

**1) एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् )** ½ x 2 = 1

1. सर्वेष्वपत्येषु जननी कीदृशी भवति ?
2. कुत्र जलोपप्लवः सजातः ?
3. कीदृशे सुते मातुः अभ्यधिका कृपा सहजा एव ?

**2) एकवाक्येन उत्तरत। ( केवलं प्रश्नद्वयम् )** 1 x 2 = 2

1. कस्य वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्?
2. सः (आखण्डलः) ताम् कथम् असान्त्वयत् ?
3. कथं प्रवर्षः समजायत ?

**3) निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नद्वयम् )** 1 x 2 =2

1. तुल्यवत्सला जननी - इत्यत्र विशेष्यपदं किम् ?
2. गद्यांशे माता इत्यस्य किं समानार्थकपदं प्रयुक्तम् ?
3. चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत - अत्र क्रियापदं किम् ?

**13. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत।**

पिता यच्छति पुत्राय बाल्ये विद्याधनं महत्।
पितास्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता॥

**1) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

1. पिता पुत्राय विद्याधनं कदा यच्छति ?
2. पिता पुत्राय कीदृशं विद्याधनं यच्छति ?
3. क: तप: तेपे ?

**2) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. तत्कृतज्ञता का भवति ?
2. पिता पुत्राय किं यच्छति ?
3. क: विद्याधनं यच्छति ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. महत् विद्याधनं - इत्यत्र विशेषणपदं किम् ?

   क) विद्या   ख) धनम्

   ग) महत्   घ) विद्याधनम्

2. कृतघ्नता इत्यस्य किं विलोमपदं पद्ये प्रयुक्तम् ?

   क) कृतज्ञता   ख) यच्छति

   ग) विद्याधनम्   घ) इत्युक्ति:

3. यच्छति इति क्रियापदस्य कर्तृपदं किम् ?

   क) बाल्ये   ख) पुत्राय

   ग) पिता   घ) इत्युक्ति:

**14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।**

काकः - आम् ! सत्यं कथितं त्वया। वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

पिकः - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति। कृष्णवर्णं मेध्यामध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?

काकः - अरे! अरे! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा-'अनृतं वदसि चेत् काकः दशेत्'- इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

पिकः - अलम् अलम् अतिविकत्थनेन।

**1) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

(i) अनृतं वदसि चेत् कः दशेत् ?

(ii) क: वातावरणम् आकुली करोति ?

(iii) कस्य सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा ?

**2) एकवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

(i) काकः स्वविषये किं कथयति ?

(ii) केषां परिश्रम: ऐक्यं च विश्वप्रथितम् ?

(iii) काक: कथं वातावरणम् आकुलीकरोति ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

(i) काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः - अत्र विशेषणपदं किम् ?

(ii) 'असत्यम्' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

(iii) 'कथं वनराजं मन्यामहे वयम्? - अत्र मन्यामहे इति क्रियापदस्य कर्तृपदं किम् ?

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** 1 x 4 = 4

1. सर्वे **प्रकृतिमातरं** प्रणमन्ति।
2. **पुत्रं** द्रष्टुं सः प्रस्थितः।
3. **सुराधिपः** ताम् अपृच्छत्।
4. त्वं **मानुषात्** बिभेषि।
5. मयूरस्य नृत्यं **प्रकृतेः** आराधना।

**16. अधोदत्तस्य श्लोकस्य अन्वयं कोष्ठकात् उचितैः पदैः पूरयित्वा पुनः लिखत।** 1x4= 4

**मञ्जूषा-** (अयोग्यः, अनौषधम्, योजकः, अक्षरम् )

अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम्।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः ॥

**अन्वय:** - अमन्त्रम् (i) ________ नास्ति (ii) ________ मूलं नास्ति,
(iii) ________ पुरुषः नास्ति, तत्र (iv) ________ दुर्लभः।

**अथवा**

**श्लोकस्य भावार्थं पूरयत -**

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः॥

**मञ्जूषा-** ( विद्वांसः, विशेषतः, प्रथमः, सदाचारस्य )

**भावार्थः :-** अस्य भावोऽस्ति यत् सदाचार: जनानां (i) __________ धर्म: अस्ति, इति (ii) __________ कथयन्ति अतएव जनैः (iii) __________ रक्षा प्राणेभ्यः अपि (iv) __________ करणीया।

**17. अधोदत्तं कथाभागं समुचितक्रमेण उत्तरपुस्तिकायां पुनः लिखत।** ½ x 8 = 4

क) सः पुत्रं द्रष्टुम् पदातिरेव प्राचलत्।

(ख) तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

(ग) चौरः एव उच्चैः क्रोशितुमारभत।

(घ) कश्चन निर्धनः जनः वित्तम् उपार्जितवान्।

(ङ) रात्रिनिवासं कर्तुम् कञ्चिद् गृहस्थमुपागतः।

(च) एकदा तस्य पुत्रः ताणः जाता:।

(छ) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

(ज) ग्रामवासिनः वराकमतिथिमेव चौरं मत्वाऽभर्त्सयन्।

**18. प्रसङ्गानुकूलम् स्थूलपदस्य अर्थचयनम् कुरुत। ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

1. भृङ्गाः **<u>रसालमुकुलानि</u>** समाश्रयन्ते।

(क) आम्रमञ्जर्य्यः (ख) पलाशपत्राणि
(ग) जपापुष्पाणि (घ) बिल्वपत्राणि

2. यः आत्मनः **<u>श्रेयः</u>** इच्छति।

(क) कल्याणम् ( ख ) अकल्याणम्
(ग) प्रेयः (घ) सर्वे

3. एतेन आरक्षिणा **<u>अध्वनि</u>** यदुक्तं तद् कथयामि।

(क) मार्गे (ख) गृहे
(ग) मन्दिरे (घ) नगरे

4. कथं **<u>मिथः</u>** कलहं कुर्वन्ति।

क) सर्वे (ख) अन्यम्
(ग) सन्ततिः (घ) परस्परम्

# आदर्शप्रश्नपत्रम् - 4 (२०२२ - २३)

## SAMPLE QUESTION PAPER - 4 (2022 - 23)

## कक्षा – दशमी / CLASS-X

## संस्कृतम् (कोड् – 122) SANSKRIT( CODE - 122)

**समय: - होरात्रयम्** **सम्पूर्णाङ्का: - ८०**

**Time allowed - 3 Hours** **TotalMarks - 80**

**सामान्य निर्देशा:**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति।
2. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय:।
3. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि।
5. प्रश्नानां निर्देशा: ध्यानेन पठनीया:।

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

| | | |
|---|---|---|
| **क खण्ड: - अपठित-अवबोधनम्** | - | **10 अङ्का:** |
| **ख खण्ड: - रचनात्मकं कार्यम्** | - | **15 अङ्का:** |
| **ग खण्ड: - अनुप्रयुक्तं व्याकरणम्** | - | **25 अङ्का:** |
| **घ खण्ड: - पठितावबोधनम्** | - | **30 अङ्का:** |

## क खण्ड: - अपठित-अवबोधनम्  - 10 अङ्का:

**1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (10)

संहति: कार्यसाधिका इति वचनं जगति प्रसिद्धमस्ति। एकेन पुरुषेण किमपि महत्कार्यं न साध्यते। यत् किमपि साधयितुं नराणां संघ: परमावश्यक:। सर्वे जानन्ति यत् नैक: तन्तु: किमपि कर्तुं समर्थ:। परन्तु तै: रचिता रज्जु: हस्तिनं बद्धुमपि समर्था भवति। इत्थमेव एकेन तण्डुलेन नहि ओदनं पच्यते। गृहेषु मातर: पितर: भ्रातर: च एकीभूय गृहभारं वहन्त: सुखमनुभवन्ति। एवमेव मनुष्याणां समाजोऽपि देशं जातिञ्च उन्नतिपथं नेतुं समर्थ: भवति। यस्मिन् राष्ट्रे सर्वे मानवा: सर्वाणि राज्यानि च भेदभावं परित्यज्य एकतया व्यवहरन्ति तद्राष्टं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति। एकताया: प्रभावेण भारतीया: स्वदेशम् आंगलहस्तात् मोचयितुं समर्था: अभवन्। अत: सदा सर्वै: मानवै: संघे स्थित्वा स्वशक्ते: सञ्चय: कर्तव्य:। अधुनाऽपि यदि वयं संघीभूय स्थास्याम: तर्हि अवश्यमेव शत्रुसैनिकान् जेतुं समर्था: भविष्याम:।

**क) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

i) यत् किमपि साधयितुं केषां संघ: परमावश्यक: ?

ii) किं वचनं प्रसिद्धमस्ति ?

iii) रज्जु: कं बद्धुमपि समर्था भवति ?

**ख) पूर्णवाक्येन उत्तरत (केवलं प्रश्न द्वयम् )** 2 x 2 = 4

i) कस्या: प्रभावेण भारतीया: स्वदेशम् आंगलहस्तात् मोचयितुं समर्था: अभवन् ?

ii) राष्ट्रं कथं समुज्ज्वलं भवति ?

iii) वयं कथं शत्रुसैनिकान् जेतुं समर्था:: भविष्याम: ?

**ग) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत।** 1 x 1 = 1

**घ) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयम्)।** 1 x 3 = 3

i) सर्वे जानन्ति यत् नैक: तन्तु: किमपि कर्तुं समर्थ: -अत्र जानन्ति इति क्रियाया: कर्तृपदं किम्?

क) सर्वे ख) नैक:

ग) तन्तु: घ) समर्थ:

ii) एकेन पुरुषेण किमपि महत्कार्यं न साध्यते - अत्र पुरुषेण इति पदस्य विशेषणपदं किम् ?

क) किमपि ख) साध्यते

ग) महत्कार्यम् घ) एकेन

iii) गृहीत्वा इति पदस्य किं विलोमपदम् अनुच्छेदे प्रयुक्तम् ?

क) साध्यते　　　　　　　　ख) अधुना

ग) परित्यज्य　　　　　　　　घ) समर्थाः

iv) मनुष्यैः इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?

क) संहतिः　　　　　　　　ख) मानवैः

ग) वानरैः　　　　　　　　घ) सुखिभिः

**ख खण्डः - रचनात्मकं कार्यम् - 15 अङ्काः**

**2. भवान् / भवती सुरेशः। भवतः अनुजः जयपुरे छात्रावासे वसति। अनुजं प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तपदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत।** ½ x 10=5

**मञ्जूषा**

[ लेखिष्यति, जयपुरतः, सम्यक्, कुशली, अनुज,
आगमिष्यति, कुशलम्, अग्रजः, स्मरतः, आगन्तुम् ]

(i) ___________

तिथिः ___________

प्रिय (ii) ___________

शुभाशिषः।

अहमत्र (iii) ___________। त्वमपि तत्र कुशली असि इति मन्ये। मातापितरौ त्वां सर्वदा (iv) ________। अग्रजा आगामिसप्ताहे गृहम् (v) _______। त्वम् अपि यदि (vi) ________ इच्छसि तर्हि आगच्छ। एतद्विषये अग्रजा अपि पत्रं (vii) __________। तव अध्ययनं (viii) ___________ चलति इति वयं चिन्तयामः। अन्यत् सर्वं (ix) ___________। सर्वेभ्यः मित्रेभ्यः मदीयाः शुभकामनाः।

भवदीयः(x) ___________

सुरेशः

**3. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दसहायतया संस्कृते पञ्च वाक्यानि लिखत।**

1 x 5 = 5

**मञ्जूषा -** [ बालः, पश्यतः, बालः, वृक्षः, हरितः, पुष्पे, पादपाः, पत्राणि, पश्यन्ति, सूर्यः, हरीतिमा, खगाः, कुरुतः, व्यायामं, कुटीरे, वृक्षाः]



**अथवा**

**वृक्षाणां महत्वम् इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतभाषायां लिखत।**

**मञ्जूषा -** [फलानि, मित्राणि, औषधं, रक्षकाः, प्राणवायुं, छाया, काष्ठानि, पर्यावरणस्य, प्र कृतेः, यच्छन्ति, शोभा ]

**4. अधोलिखितवाक्यानि संस्कृतभाषया अनूद्य लिखत। (केवलं पञ्च वाक्यानि)** 1x5=5

१.अरुणाचल प्रदेश की राजधानी इटानगर है। Itanagar is the capital of Arunachal Pradesh.

२. तुम सब गेंद से खेलते हो। All of you are playing with ball.

३.पर्यावरण की रक्षा हमारा कर्तव्य है । Protection of Environment is our duty.

४. परिश्रमी सदा सफल होता है। Hardworking man is always succeeding.

५.विद्या के विना जीवन व्यर्थ है। Life is waste without knowledge.

६.लता नाचती है। Lata is dancing.

## ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्काः

**5. अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिं/संधिविच्छेदं वा कुरुत ।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

i) यानानां **पङ्क्तयो ह्यनन्ताः** सन्ति ।

(क) पङ्क्तयाः + ह्यनन्ताः (ख) पङ्क्तयः + ह्यनन्ताः

(ग) पङ्क्तया + अनन्ताः (घ) पङ्क्तया + ह्यनन्ताः

ii) **एतस्मात् + एव** पाठात् एकम् अनुच्छेदं पठ ।

(क) एतस्मादेव (ख) एतस्मातेव

(ग) एतस्माथेव (घ) एतस्माधेव

iii) **सम्यक् + नेता** राष्ट्रोन्नत्यै प्रयतते ।

(क) सम्यख् नेता (ख) सम्यघ्नेता

(ग) सम्यङ्नेता (घ) समयनेता

iv) सः कठिनं **तपस्तेपे ।**

(क) तपः + तेपे (ख) तपस्ते + पे

(ग) तप + तेपे (घ) तपः + अस्तेपे

v) चण्डवातेन **मेघरवैश्च** सह प्रवर्षः समजायत ।

(क) मेघरवैश + च (ख) मेघरवैः + सह

(ग) मेघरवैः + च (घ) मेघरवै + श्च

**6. अधोलिखितवाक्येषु समुचितं समस्तपदं वा विग्रहवाक्यं वा चिनुत ।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

i) जनाः **देशस्य भक्तं** पूजयति ।

(क) देशभक्ती (ख) देशभक्ताः

(ग) देशभक्तः (घ) देशभक्तम्

ii) **यथामति** कार्यं कुर्वन्तु ।

(क) मतिम् अतीत्य (ख) मतिम् अनतिक्रम्य

(ग) मतिम् अतिक्रम्य (घ) मतिम् अधीत्य

iii) पुरा रामो नाम **<u>दशरथपुत्रः</u>** आसीत्।

(क) दशरथस्य पुत्र: (ख) दाशरथेन पुत्र:

(ग) दशरथाय पुत्र: (घ) दशरथेन पुत्र:

iv) **<u>मातापितरौ</u>** पुत्रं रक्षत:।

(क) मातरौ (ख) माता च पिता च

(ग) भ्राता च पिता च (घ) पितृ मातृ

v) **<u>दीपावलिः</u>** भारतस्य उत्सवः अस्ति।

(क) दीपानाम् आवलि: (ख) दीपानाम् आबलम्

(ग) दीपेभ्य: आवलि: (घ) दीप आवलयः।

**7. प्रकृतिप्रत्ययौ संयोज्य विभज्य वा कोष्ठकात् चित्वा लिखत।**

**( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

i) आकारस्य **<u>लघु + त्व</u>** कार्यबाधकं न भवेत्।

(क) लघुत्ता (ख) लघुत्वम्

(ग) लघुत्वा (घ) लघुता

ii) जननी **<u>तुल्यवत्सला</u>** भवति।

(क) तुल्यवत्सल + टाप् (ख) तुल्यवत्सल + आप्

(ग) तुल्यवत्सल + ङीप् (घ) तुल्यवत्सल + आ

iii) **<u>बुद्धिमान्</u>** लोके मुच्यते महतो भयात्।

(क) बुद्धि + तल् (ख) बुद्धि + टाप्

(ग) बुद्धि + मतुप् (घ) बुद्धि + त्व

iv) मनुष्यः **<u>समाजः + ठक्</u>** प्राणी अस्ति।

क) सामाजिका ख) सामाजिकी

ग) सामाजिकम् घ) सामाजिक:

V) कथयति तु **<u>भवत्+ङीप्</u>** सर्वथा सम्यक्।

क) भवति ख) भवती

ग) भवन्ति घ)भवता

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत।**

**( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

i) मया फलं --------------------- ।

(क) खाद्यते (ख) खाद्यन्ते

(ग) खादामि (घ) खादसि

ii) अस्माभिः ----------------- स्मर्यते।

(क) पाठम् (ख) पाठाः

(ग) पाठान् (घ) पाठः

iii) -------------------- चित्राणि पश्यन्ति।

(क) छात्राः (ख) छात्रैः

(ग) छात्रः (घ) छात्रेण

iv) ------------------- गीतं गीयते।

(क) बालिका (ख) बालिकाः

(ग) बालिकया (घ) बालिकाम्

**9. समयवाचकशब्दैः अधोलिखितदिनचर्यां पूरयत। ( केवलं प्रश्नचतुष्टयम् )** 1 x 4 = 4

i) वार्षिकोत्सवस्य कार्यक्रमे सायं -------------- (4:00) वादने मुख्यातिथेः आगमनम्।

ii) कार्यक्रमस्य शुभारम्भः प्रार्थनया सह --------------- (4:15) वादने भवति।

iii) कार्यक्रमे प्राचार्यस्य स्वागतभाषणं --------------- (6:30) वादने भवति।

iv) संस्कृतिककार्यक्रमस्य आरम्भः ------------------ (6:45) वादने भवति।

v) रात्रौ ------------- (8:00 ) वादने कार्यक्रमस्य समाप्तिः भवति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदै : अधोलिखितवाक्यानि पूरयत।**

**( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

i) यत्र आस्ते सा धूर्त्ता ------------ गम्यताम्।

(क) तत्र (ख) अपि

(ग) अन्यत्र (घ) अत्र

ii) ------ शिक्षक: पाठयति तदा छात्रा: सावधानतया उपविशन्ति।

(क) न (ख) यत्र

(ग) यदा (घ) अपि

iii) अहं ------------ ग्रामम् अगच्छम्।

(क) ह्यः (ख) अद्य

(ग) श्वः (घ) सायं काले

iv) वने सिंह: -------- गर्जति।

(क) शनै: (ख) उच्चै:

(ग) यावत् (घ) तत्र

**11. रेखाङ्कितं पदम् अशुद्धम् अस्ति। तस्य स्थाने कोष्ठकात् उचितं शुद्धं पदं चित्वा वाक्यानि पूरयत । ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

i) ताः भोजनं **पचति।**

(क) पचति (ख) पचन्ति (ग) पचसि (घ) पचामि

ii) **एकः** कन्या उच्चैः श्लोकं वदति।

(क) एकम् (ख) एकस्यै (ग) एका (घ) एकस्याम्

iii) ते **बालक:** कुशलाः सन्ति।

(क) बालिकै: (ख) बालकाय (ग) बालकात् (घ) बालकाः

iv) गोः **दुग्ध:** पोषकम् अस्ति।

(क) दुग्धा (ख) दुग्ध (ग) दुग्धम् (घ) दुग्धानि

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।**

न्यायाधीशेन पुनस्तौ घटनाया: विषये वक्तुमादिष्टौ। आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यम् अघटत् स: शव: प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् - मान्यवर ! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि। त्वयाऽहं चोरिताया: मञ्जूषाया: ग्रहणाद्वारित:, अत: निजकृत्यस्य फलम् भुङ्क्ष्व। अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे इति। न्यायाधीश: आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान्।

**1) एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् )** ½ x 2 = 1

१.क: न्यायाधीशम् अभिवादयति स्म ?

२.न्यायाधीशेन पुनस्तौ कस्या: विषये वक्तुम् आदिष्टौ ?

३.क: निजपक्षं प्रस्तुतवति आश्चर्यम् अघटत् ?

**2) एकवाक्येन उत्तरत। ( केवलं प्रश्नद्वयम् )** 1 x 2 = 2

१. शव: किम् अपसार्य न्यायाधीशमभिवाद्य निवेदितवान् ?

२. न्यायाधीश: कथं न्यायम् अकरोत् ?

३. शव: न्यायाधीशमभिवाद्य किं निवेदितवान् ?

**3) निर्देशानुसारम् उत्तरत। ( केवलं प्रश्नद्वयम् )** 1 x 2 =2

i) शव: प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् - अत्र कर्तृपदं किम्?

ii) ' मार्गे ' इति पदस्य पर्यायपदं किं प्रयुक्तम्?

iii) आरक्षिणि निजपक्षं प्रस्तुतवति ' अत्र विशेषणपदं किम्?

**13. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत।**

मृगा: मृगै: सङ्गमनुव्रजन्ति
गावश्च गोभि: तुरगास्तुरङ्गै: ।
मूर्खाश्च मूर्खै: सुधिय: सुधीभि:
समानशीलव्यसनेषु सख्यम् ॥

**1) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

१. तुरगा: कै: सङ्गम् अनुव्रजन्ति ?

२. के मृगै: सङ्गम् अनुव्रजन्ति ?

३. गाव: काभि: सङ्गम् अनुव्रजन्ति ?

**2) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

१.मूर्खस्य सख्यं कै: सह भवति ?

२.सामान्यत: कीदृशेषु [केषु] सख्यं भवन्ति ?

३.सुधिय: काभि: सह सख्यं कुर्वन्ति ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

i) मृगा: मृगै: सङ्गमनुव्रजन्ति - अत्र 'अनुव्रजन्ति' इति क्रियापदस्य कर्ता कः?

ii) अश्वा: इत्यर्थे श्लोके किं पदं प्रयुक्तम् ?

iii) 'सुधीभिः' इति पदस्य किं विपरीतपदम् अत्र प्रयुक्तम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।**

काकः - आम् ! सत्यं कथितं त्वया। वस्तुतः वनराजः भवितुं तु अहमेव योग्यः।

पिकः - (उपहसन्) कथं त्वं योग्यः वनराजः भवितुं, यत्र तत्र का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोषि। न रूपं न ध्वनिरस्ति। कृष्णवर्णं मेध्यामध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्?

काकः - अरे! अरे! किं जल्पसि ? यदि अहं कृष्णवर्णः तर्हि त्वं किं गौराङ्गः ? अपि च विस्मर्यते किं यत् मम सत्यप्रियता तु जनानां कृते उदाहरणस्वरूपा-‘अनृतं वदसि चेत् काकः दशेत्’- इति प्रकारेण। अस्माकं परिश्रमः ऐक्यं च विश्वप्रथितम् अपि च काकचेष्टः विद्यार्थी एव आदर्शच्छात्रः मन्यते।

**1) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

१. कस्य न रूपं न ध्वनि: च अस्ति ?

२. कृष्णवर्णं ,मेध्यामेध्यभक्षकं त्वां कथं वनराजं मन्यामहे वयम्? इति क: वदति ?

३. कृष्णवर्ण: क: अस्ति ?

**2) एकवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

१.काक: कथं वातावरणम् आकुलीकरोति ?

२. कस्य सत्यप्रियता जनानां कृते उदाहरणस्वरूपा ?

३. कीदृश: विद्यार्थी आदर्शछात्र: मन्यते ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

i) अस्मिन् नाट्यांशे श्वेतवर्ण: इत्यस्य विपर्ययपदं किम् अस्ति?

ii) शब्द: इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?

iii) 'सत्यं कथितं त्वया' अत्र कर्तृपदं किम् ?

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** 1 x 4 = 4

i) सः ऋषभः हलमूढ्वा गन्तुमशक्तः **क्षेत्रे** पपात।

ii) त्वं **मानुषात्** बिभेषि।

iii) <u>**सुरभिः**</u> आसीत् धेनूनां माता।

iv) तपोवने <u>**तस्य**</u> नाम व्यवहरति।

v) <u>**आर्यस्य**</u> वन्दनायां लव इत्यात्मानं श्रावयमि।

vi) लवः कुशः च <u>**भ्रातरौ**</u> आस्ताम्।

**16. अधोदत्तस्य श्लोकस्य अन्वयं कोष्ठकात् उचितैः पदैः पूरयित्वा पुनः लिखत।** 1x4= 4

**मञ्जूषा-** ( इच्छति, श्रेयः, कुर्यात्, कर्म )

यः इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च।
न कुर्यदहितं कर्म स परेभ्यः कदापि च॥

**अन्वयः** - यः आत्मनः1) ................ प्रभूतानि सुखानि च 2) ............... सः परेभ्यः अहितं 3) ................ कदापि न 4) .................. ।

**अथवा**

**श्लोकस्य भावार्थं पूरयत -**

यत्प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णयः।
कर्तुं शक्यो भवेद्येन स विवेक इतीरितः॥

**मञ्जूषा-** ( विवेकः प्रोक्तस्य अर्थनिर्णयः भवेत् )

**भावार्थः :-** अस्य भावोऽस्ति यत् येन केनापि (i) ________ कार्यस्य वास्तविकः (ii) _______ येन कर्तुं शक्यो (iii) _________ सः एव (iv) __________ इति कथितः।

**17. अधोदत्तं कथाभागं समुचितक्रमेण उत्तरपुस्तिकायां पुनः लिखत।** ½ x 8 = 4

१. न्यायाधीशः आरक्षिणे कारादण्डं आदिश्य तं जनं ससंमानं मुक्तवान्।

२. कश्चन निर्धनः भूरि परिश्रम्य किञ्चित् वित्तं उपार्जितवान्।

३. न्यायाधीशः आरक्षिणम् अभियुक्तम् च तं शवं न्यायालये आनेतुं आदिष्टवान्।

४. तौ न्यायालये स्व-स्व पक्षं पुनः स्थापितवन्तौ।

५. रक्षापुरुषः तं अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्

६. सः पिता तनूजस्य रुग्णतां आकर्ण्य व्याकुलः जातः पुत्रं द्रष्टुम् च प्रस्थितः।

७.सः पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चित् गृहस्थं उपागताः।

८. उभौ शवम् आनीय एकस्मिन् चत्वरे स्थापितवन्तौ।

**18. प्रसङ्गानुकूलम् स्थूलपदस्य अर्थचयनम् कुरुत । ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

i) किं कुपिता एवं **भणति,** उत प्रकृतिस्था ।

(क) हसति (ख) कथयति

(ग) गर्जयति (घ) ताडयति

ii) भो **वासव!** पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि ।

(क) कृषक (ख) राम

(ग) ऋषभ (घ) इन्द्र

iii) एकान्ते **कान्तारे** क्षणमपि मे स्यात् सञ्चरणम्।

(क) ग्रामे (ख) नगरे

(ग) वने (घ) कृषकस्य गृहे

iv) व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो **नष्टः** ।

(क) खादितः (ख) दत्तः

(ग) कुतः (घ) पलायितः

# आदर्शप्रश्नपत्रम् - 5 (२०२२ - २३)

**SAMPLE QUESTION PAPER - 5 (2022 - 23)**

**कक्षा – दशमी / CLASS-X**

**संस्कृतम् (कोड् – 122) SANSKRIT( CODE - 122)**

| | |
|---|---|
| **समय: - होरात्रयम्** | **सम्पूर्णाङ्का: - ८०** |
| **Time allowed - 3 Hours** | **TotalMarks - 80** |

**सामान्य निर्देशा:**

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्ना: सन्ति।
2. उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्क: अवश्यं लेखनीय:।
3. प्रश्नसंख्या प्रश्नपत्रानुसारम् एव लेखनीया।
4. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृते एव लेखनीयानि।
5. प्रश्नानां निर्देशा: ध्यानेन पठनीया:।

अस्मिन् प्रश्नपत्रे चत्वार: खण्डा: सन्ति।

| | | |
|---|---|---|
| **क खण्ड: - अपठित-अवबोधनम्** | **-** | **10 अङ्का:** |
| **ख खण्ड: - रचनात्मकं कार्यम्** | **-** | **15 अङ्का:** |
| **ग खण्ड: - अनुप्रयुक्तं व्याकरणम्** | **-** | **25 अङ्का:** |
| **घ खण्ड: - पठितावबोधनम्** | **-** | **30 अङ्का:** |

## क खण्ड: - अपठित-अवबोधनम् - 10 अङ्का:

**1) अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत।** (10)

रष्या-युक्रैन देशयोर्मध्ये गतवर्षे युद्धम् अभवत् इति सर्वे जानन्ति खलु। रष्या युक्रैन् देशस्योपरि युद्धम् अकारोत्। अमेरिका-रष्यादेशयो: परस्परविरोध: एव अस्य युद्धस्य प्रमुखं कारणम् इति केचन वदन्ति। अस्मिन् अवसरे अस्माकं भारतदेशस्य विदेशनय: प्रशंसार्ह: अवर्तत। द्वयोरपि राष्ट्रयो: पक्षं न स्वीकृतं भारतेन। भारतदेश: सदैव युद्धस्य विरुद्धपक्षमेव अवलम्बते स्म। आर्षभारतसंस्कारस्य मूलमन्त्रम् भवति " अहिंसा परमो धर्म: " इति। युद्धं त्यजत मैत्रीं भजत इति खलु आप्तवाक्यम्। लोका: समस्ता सुखिनो भवन्तु, आत्मवत् सर्वभूतेषु य: पश्यति स: पण्डित:, वसुधैव कुटुम्बकम् इत्येतानि वचनानि भारतीय संस्कृते: आदर्शभूतानि भवन्ति।

**क) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

क) रष्या-युक्रैनदेशयोर्मध्ये युद्ध: कदा अभवत् ?

ख) कस्य विदेशनय: प्रशंसार्ह: अवर्तत ?

ग) लोका: समस्ता: कीदृशा: भवन्तु ?

**ख) पूर्णवाक्येन उत्तरत (केवलं प्रश्न द्वयम्)** 2 x 2 = 4

क) भारतदेश: सदैव कं पक्षम् अवलम्बते स्म ?

ख) आर्षभारतसंस्कारस्य मूलमन्त्रम् किं भवति ?

ग) अस्य युद्धस्य प्रमुखं कारणम् किमिति केचन वदन्ति ?

**ग) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत।** 1 x 1 = 1

**घ) निर्देशानुसारम् उत्तरत (केवलं प्रश्नत्रयम्)।** 1 x 3 = 3

क) " मैत्रीं भजत " अस्मिन् वाक्ये क्रियापदं किम् ?

क) भजत ख) मित्रता

ग) मैत्री घ) मैत्रीम्

ख) " प्रमुखं कारणम् " अत्र विशेषणपदं किम् ?

क) कारणम् ख) युद्ध:

ग) रष्या घ) प्रमुखम्

ग) " सज्जनोक्ति " अस्मिन् अर्थे अनुच्छेदे किम् पदं प्रयुक्तम् ?

क) वचनानि ख) सनातन

ग) आप्तवाक्यम् घ) अहिंसा

घ) भारतदेशस्य विदेशनय: प्रशंसार्ह: अवर्तत - अत्र क्रियापदं किम् ?

क) भारतदेशस्य ख) विदेशनय:

ग) प्रशंसार्ह: घ) अवर्तत

## ख खण्ड: - रचनात्मकं कार्यम् - 15 अङ्का:

**2. भवान् अनिरुद्ध: । ज्येष्ठं प्रति लीखिते पत्रं मञ्जूषायां प्रदत्तशब्दैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत ।** ½ x 10=5

**मञ्जूषा**

[ पत्रं दिल्लीत: अहम् कुशली ज्येष्ठ
आगमिष्यति मित्रेभ्य: अनुज: स्मरत: इच्छति ]

-------------- (1)

तिथि -----------

प्रिय -----------(2)

शुभाशिष: ।

अहमत्र---------- (3) भवानपि तत्र कुशली इति मन्ये । मातापितरौ त्वां सर्वदा ---------(4) । आवयो: अग्रजा आगामिसप्ताहे गृहम् ---------- (5) । भवान् अपि यदि आगन्तुम् --------(6) तर्हि आगच्छतु । अस्मिन् विषये सा अपि ----------(7) लेखिष्यति । तव अध्ययनं सम्यक् चलति इति -------(8) चिन्तयामि । अन्यत् सर्वं कुशलम् । तत्र भवत: सर्वेभ्य: ------ (9) मदीया: शुभकामना: ।

भवत: -------- (10)

अनिरुद्ध:

**3. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्त शब्दसहायतया संस्कृते पञ्च वाक्यानि लिखत ।** 1 x 5 = 5

**मञ्जूषा -** [ उद्यानस्य, वृक्षा:, क्रीडनकानि, छात्रा:, भवनानि, दूरे , अध:, वृक्षस्य ]



**अथवा**

**दीपावलि: इति विषयम् अधिकृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतभाषायां लिखत ।**

**मञ्जूषा -** [ दीपानाम् भारतस्य स्फ़ोटकान् जना: आनन्दस्य उत्सव: सर्वत्र प्रज्वालयन्ति समन्तत: आबालवृद्धं सर्वे ]

**4. अधोलिखितवाक्यानि संस्कृतभाषया अनूद्य लिखत । (केवलं पञ्च वाक्यानि)** 1x5=5

(i) बालक विद्यालय जाता है । (i) Boy is going to school.

(ii) माता कहानी बोलती है । (ii) Mother is telling a story.

(iii) पिता कार्यालय से आता है । (iii) Father is coming from the office.

(iv) मैं संस्कृत पढता हूं । (iv) I am studying Sanskrit.

(v) भारत हमारा देश है । (v) Bharath is our country.

(vi) राम उत्तम राजा था । ( vi) Rama was a great King.

**ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्काः**

**5. अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिं/संधिविच्छेदं वा कुरुत ।** 1 x 4 = 4

1. **कीटः + अपि** सुमनसङ्गात् सतां शिरः आरोहति ।
2. **पितुः + इच्छा** वर्तते ।
3. महत्कौतुकम् आवेदितं यत् **मानुषादपि** बिभेषि ।
4. **सरः + तीरे** हंसाः विहरन्ति ।
5. तत्र **कोऽपि** अस्ति ।

**6. अधोलिखितवाक्येषु समुचितं समस्तपदं वा विग्रहवाक्यं वा चिनुत।** 1 x 4 = 4

1.**यथाबलं** कर्म करोतु।

क) बलसहितम् ख) बलम् अनतिक्रम्य

ग) बलम् अतिक्रम्य घ) बलानुकूलाम्

2.**पीतम् अम्बरं यस्य स:** हरि: समुद्रे वसति।

क) पीताम्बर: ख) पीताम्बरी

ग) पीताम्बरस: घ) पीतमम्बर:

3.**लव: च कुश:** रामायणं पठत:।

क) लवकुशा: ख) लवौकुशौ

ग) लवकुशौ घ) लवकुशे

4.**पाणिपादं** प्रक्षाल्य भोजनं करणीयम्।

क) पाणी च पाद: च ख) पाणी च पादौ च तेषां समाहार:

ग) पाणि: पादं च घ) पाणिभ्यां च पादाभ्यां च

**7. प्रकृतिप्रत्ययौ संयोज्य विभज्य वा कोष्ठकात् चित्वा लिखत।** 1 x 4 = 4

1. पुरा गार्गी नाम **विदुषी** आसीत्।

क) विदुष् + ई ख) विद्वस् + ङीप्

ग) विद्वस् + टाप् घ) विद्वस् + तल्

2. मनुष्य: **समाज + ठक्** प्राणी।

क) सामाजिक: ख) समाजिका

ग) समाजिक: घ) समाज:

3. जननी **तुल्यवत्सला** भवति।

क) तुल्यवत्सल + तल् ख) तुल्यवत्सल + टाप्

ग) तुल्यवत्सल + त्व घ) तुल्यवत्सल + ठक्

4. सृष्टेः **रमणीयतां** पश्य।

क) रमणीय + तल् ख) रमणीय + त्व

ग) रमणीय + मतुप् घ) रमणीय + क्त्वा

**8. वाच्यानुसारम् उचितपदैः रिक्तस्थानानि पूरयत।** 1 x 3 = 3

1. ---------- नवघास: खाद्यते।

(क) हरिण: (ख) हरिणाय

(ग) हरिणेन (घ) हरिणात्

2. -------- किं क्रियते ?

(क) त्वम् (ख) तुभ्यम्

(ग) त्वत् (घ) त्वया

3. अहं सम्प्रति गीतां -----------।

(क) पठामि (ख) पठ्यते

(ग) पाठ्ये (घ) पठति

**9. समयवाचकशब्दैः अधोलिखितदिनचर्यां पूरयत।** 1 x 4 = 4

1. रमेश: प्रातः (4.30) ---------वादने उत्तिष्ठति।

2. स: प्रात: (6.15) ----------- वादने समाचारपत्रं पठति।

3. स: प्रात: (9.00)---------- वादने कार्यालयं गच्छति।

4. स: सायं (6.45 )---------- वादने कार्यालयात् गृहं प्रत्यागच्छति।

**10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदै : अधोलिखितवाक्यानि पूरयत।** 1 x 3 = 3

1. रात्रौ गृहात् ------- भ्रमणं न उचितम्।

(क) एवम् (ख) अत्र (ग) बहि: (घ) तथा

2. सत्यम् ------ जयते।

(क) यत्र (ख) तर्हि (ग) यथा (घ) एव

3. यत्र जलं अस्ति ----- पक्षिणः समायान्ति।

(क) एव (ख) अत्र (ग) तत्र (घ) अपि

**11. रेखाङ्कितं पदम् अशुद्धम् अस्ति। तस्य स्थाने कोष्ठकात् उचितं शुद्धं पदं चित्वा वाक्यानि पूरयत। ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

1. अहं कदापि असत्यं न **वदामः**। (वदाम-वदानि – वदामि )

(क) वदाम (ख) वदति (ग) वदामि (घ) वदसि

2. अहं **जनकं** सह आपणं गमिष्यामि। ( जनकस्य – जनकेन –जनके)

(क) जनकेन (ख) जनकात् (ग) जनके (घ) जनकाय

3. उद्याने **चत्वारः** बालिका: क्रीडन्ति। ( आपदां – आपत्ति-आपत्त्यां )

(क) चत्वारि (ख) चतस्र: (ग) चतुर् (घ) चतुरा:

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत ।**

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत् । एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः । परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत् ।

**1) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् )** ½ x 2 = 1

क) क: भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ?

ख) निर्धन: कं द्रष्टुं प्रस्थितः ?

ग) पुत्र: कुत्र प्रवेशं प्राप्त: ?

**2) एकवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् )** 1 x 2 = 2

क) निर्धनः तेन धनेन किम् अकरोत् ?

ख) सः निर्धनः किमर्थं व्याकुलो जातः ?

ग) स कस्मात् कारणात् बसयानं विहाय पदातिरेव प्राचलत् ?

**3) निर्देशानुसारम् उत्तरत । ( केवलं प्रश्नद्वयम् )** 1 x 2 =2

क) " निर्धनो जनः " अत्र विशेष्यपदं किम् ?

ख) " बसयानं विहाय पदातिरेव प्राचलत् " अत्र क्रियापदं किम् ?

ग) " पठने " इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

**13. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत ।**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली बलं वेत्ति न वेत्ति निर्बलः ।
पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः ॥

**1) एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

1. क: गुणं वेत्ति ?
2. निर्बलः किं न वेत्ति ?
3. क: वसन्तस्य गुणं वेत्ति ?

**2) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. पिक: किं वेत्ति ?

2. करी कस्य बलं वेत्ति ?

3. वायस: किं न वेत्ति ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. " गुणी गुणं वेत्ति " अत्र क्रियापदं किम् ?

2. " काक: " इत्यर्थे अत्र किम् पदं प्रयुक्तम् ?

3. " गुणवान् " इत्यस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

**14. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत।**

( सिंहासनस्थ: राम:। तत: प्रविशत: विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ।)

विदूषक: - इत इत आर्यौ !

कुशलवौ - ( रामम् उपसृत्य प्रणम्य च ) अपि कुशलं महाराजस्य ?

राम: - युष्मद्दर्शनात् कुशलमिव। भवतो: वयमत्र कुशलप्रश्नस्य भाजनमेव, न पुनरतिथिजनसमुचितस्य कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्श:।

( आसनार्धमुपवेशयति )

उभौ - राजासनं खल्वेतत् , न युक्तमध्यासितुम्।

राम: - सव्यवाधानं न चारित्रलोपाय। तस्मादङ्कव्यवहितम् अध्यास्यताम् सिंहासनम्।

**1) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्)** ½ x 2 = 1

1. क: सिंहासनस्थ: ?

2. राजभवने कौ प्रविशत: ?

3. कीदृश: स्पर्श: ?

**2) एकवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. कुशलवौ रामम् उपसृत्य किं पृच्छति ?

2. कुत्र अध्यासितुं न युक्तमिति कुशलवौ कथयत: ?

3. सिंहासनं कथम् अध्यास्यताम् इति राम: वदति ?

**3) निर्देशानुसारम् उत्तरत। (केवलं प्रश्नद्वयम्)** 1 x 2 = 2

1. " समीपं गत्वा " इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?
2. ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ - अत्र क्रियापदं किम् ?
3. अत्र उपवेष्टुम् इत्यर्थे किं पदं प्रयुक्तम् ?

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** 1 x 4 = 4

क) उभौ शवं **चत्वरे** स्थापित्वन्तौ।

ख) न्यायाधीशः **बंकिमचन्द्रः** आसीत्।

ग) जनकेन **सुताय** शैशवे विद्याधनं दीयते।

घ) **मयूरस्य** नृत्यं प्रकृतेः आराधना।

ङ) **गुणी** गुणं वेत्ति।

**16. अधोदत्तस्य श्लोकस्य अन्वयं कोष्ठकात् उचितैः पदैः पूरयित्वा पुनः लिखत।** 1x4= 4

**मञ्जूषा-** ( बन्धुः शरीरस्थः अवसीदति आलस्यम् )

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपुः।
नास्त्युद्यमसमो बन्धुः कृत्वा यं नावसीदति॥

**अन्वयः** - मनुष्याणां (1) --------- महान् रिपुः (2) ---------- हि (अस्ति)। उद्यमसमः (3) ------- नास्ति। यं कृत्वा (मानवः) न (4) ------------।

**अथवा**

**श्लोकस्य भावार्थं पूरयत -**

विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकं।
अश्वश्चेत् धावने वीरः भारस्य वहने खरः॥

**मञ्जूषा -** ( संसारे , अश्वस्य , कार्यं , निरर्थकम् )

**भावार्थः -** अस्मिन् विचित्रे (1) --------- किञ्चिदपि वस्तु (2) ---------- नास्ति। यदा धावनस्य कार्यं भवति तदा (3) --------- प्रयोगः क्रियते। परन्तु यदा भारवहनस्य (4) -------- क्रियते तदा खरः उपयोगी भवति।

**17. अधोदत्तं कथाभागं समुचितक्रमेण उत्तरपुस्तिकायां पुन: लिखत ।** ½ x 8 = 4

1) एक: कृषक: आसीत् ।

2) कृषक: तं दुर्बलं वृषभं तोदनेन नुद्यमान: अवर्तत ।

3) स: कृषक: एकदा बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत् ।

4) कृषीवल: क्रुद्ध: अभवत् ।

5) सः जवेन गन्तुम् अशक्त: च आसीत् ।

6) तमुत्थापयितुं बहुवारं यत्नमकरोत् तथापि सः नोत्थितः ।

7) सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात ।

8) तयो: बलीवर्दयो: एक: शरिरेण दुर्बल: आसीत् ।

**18. प्रसङ्गानुकूलम् स्थूलपदस्य अर्थचयनम् कुरुत । ( केवलं प्रश्नत्रयम् )** 1 x 3 = 3

i) 1. **अनृतं** मा वद ।

(क) सत्यम् (ख) असत्यम्

(ग) कथाम् (घ) कविताम्

ii) महानगरमध्ये **अनिशं** कालायसचक्रं चलति ।

(क) निरन्तरम् (ख) सर्वथा

(ग) बहुविधम् (घ) निराशा

iii) उदये **सविता** रक्त: भवति ।

(क) चन्द्र: (ख) तारकम्

(ग) सूर्य: (घ) राजा

iv) व्याघ्रमारी काचिदियमिति **मत्वा** व्याघ्रो भयाकुलचित्तो नष्टः ।

(क) प्रार्थनां कृत्वा (ख) खादित्वा

(ग) चिन्तयित्वा (घ) दृष्ट्वा


आदर्शप्रश्नपत्राणि
उत्तरकुञ्चिका

# आदर्शप्रश्नपत्रम् - 1 ( उत्तरकुञ्चिका )

## क खण्डः - अपठित-अवबोधनम् - 10 अङ्काः

**1. एकपदेन उत्तरत ।** क) पापबुद्धिः ख ) सम्पूर्णं धनम् ग ) पापबुद्धिः

**पूर्णवाक्येन उत्तरत** क) पापबुद्धि : धर्मबुद्धेः आश्रयेण अर्थोपार्जनं कर्तुमिच्छति स्म ।

ख ) पुन : एकदा पापबुद्धि: सर्वं धनं प्राप्तवान् ।

ग ) गृहं प्राप्य धर्मबुद्धि: पापबुद्धिश्च सम्पूर्णं धनम् एकस्य वृक्षस्य मूले निक्षिप्तवन्तौ ।

**शीर्षकं लिखत -** धर्मबुद्धि: पापबुद्धिश्च (उचितं शीर्षकम्)

**भाषिकं कार्यम्** क ) प्रभूतं ख ) निशायां ग ) गच्छाव घ ) तौ

**रचनाकार्यम् । ख खंडः । 15 अङ्काः ।**

**2. पत्रलेखनम् -** 1) दिल्लीराज्यं 2) चौर्यकार्यस्य 3) निवेदनम् 4) कारणात् 5) दिवानिशम् 6) चौर्यं 7) भयभीता: 8) निवारणाय 9) विश्वास: 10) सुदीप्त:

**3. चित्रवर्णानम् ( परीक्षायां केवलं पञ्च वाक्यानि एव लेखनीयानि )**

1) इदम् आतुरालयस्य / चिकित्सालयस्य चित्रं अस्ति ।
2) अस्मिन् चित्रे कश्चन रुग्णः अस्ति ।
3) चिकित्सकः रुग्णस्य निरीक्षणं करोति ।
4) रुग्णस्य समीपे माता उपविशति ।
5) पिता अपि तस्य समीपे तिष्ठति ।
6) चित्रे पीटिकायां औषधं , जलपात्रं , दुग्धपात्रं , फलानि च दृश्यन्ते ।
7) इदम् चित्रं दु:खदम् अस्ति ।

**सरलवाक्यानि**

1. इदम् आतुरालयस्य चित्रम् अस्ति । 2. अस्मिन् चित्रे चिकित्सकः अस्ति ।
3. अस्मिन् चित्रे रुग्णः बालः अस्ति । 4. चित्रे बालस्य माता अस्ति ।
5. चित्रे बालस्य पिता अस्ति । 6. चित्रे औषधम् अस्ति ।
7. चित्रे जलपात्रं अस्ति । 8. चित्रे दुग्धपात्रं अस्ति ।
9. चित्रे फलानि सन्ति । 10. इदम् चित्रं दु:खदम् अस्ति ।

**( छात्राः स्वेच्छया अपि वाक्यानि निर्मातुं शक्नुवन्ति । )**

**4. हिन्दी भाषातः संस्कृतेन अनुवादः**

क ) छात्रजीवनं मानवजीवनस्य आधारशिला भवति / अस्ति ।
ख ) आवां विद्यालयं गमिष्यावः ।
ग) शिक्षा विनयं ददाति ।
घ ) मोहन: अधुना कुत्र गामिष्यति ?

ङ ) मम माता अतीव निर्धना अस्ति।

च ) श्रेष्ठाः अध्यापकाः सदा छात्राणां हितं कुर्वन्ति।

छ ) श्रीकृष्णः अर्जुनाय गीतायाः ज्ञानम् अयच्छत्।

## ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्काः

**5.** (1)सन्मित्रम्   (2) सत् + विद्या   (3) पितुः + इच्छाम्   (4) तपश्चर्यया

**6.** (1)प्रतिगृहम्   (2) पीताम्बरः   (3) रामः च लक्ष्मणः च   (4) नद्याः समीपे

**7.** (1 )महत् + त्व   (2) बुद्धिमती   (3) आर्थिकम्   (4) सुन्दर + ङीप्

**8.** (1) करोति   (2) तेन   (3) अध्यायम्

**9.** (1)चतुर्वादने   (2) सार्धपञ्चवादने   (3) सपादसप्तवादने   (4) द्वादशवादने

**10.** (1) इतस्ततः   (2) शनैः   (3) श्वः

**11.** (1) कमलानि   (2) पठसि   (3) आसीत्

## घ खण्डः - पठितावबोधनम् - 30 अङ्का

**12. क) एकपदेन उत्तरत।**   (1) कश्चन चौरः   (2) पादध्वनिना   (3) चौरः

**ख) एकवाक्येन लिखत।**

(1) चौरः तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः।

(2) ग्रामवासिनः स्वगृहात् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वाऽभर्त्सयन्।

(3) रक्षापुरुषः तम् अतिथिं कारागृहे प्राक्षिपत्।

**ग) भाषिककार्यम्।**   (1) चौरः   (2) प्रबुद्धम्   (3) उच्चैः

**13. क) एकपदेन उत्तरत।**   (1) उदीरितः   (2) पण्डितो जनः   (3) बुद्धयः

**ख) एकवाक्येन लिखत।** (1) पण्डितो जनः अनुक्तमपि ऊहति।

(2) हयाश्च नागाश्च बोधिताः वहन्ति।

(3) बुद्धयः परेङ्गितज्ञानफलाः भवन्ति।

**ग) निर्देशानुसारम् उत्तरत।**   (1) गृह्यते   (2) जनः   (3) हयाः

**14. एकपदेन उत्तरत।**   (1) कर्कशध्वनिना   (2) काकचेष्टः   (3) वसन्तसमये

**एकवाक्येन लिखत।**   (1) काकस्य सत्यप्रियता तु - 'अनृतं वदसि चेत् काकः दशेत्' - इति प्रकारेण जनानां कृते उदाहरणस्वरूपा भवति।

(2) वसन्तसमये प्राप्ते पिककाकयोः भेदः भवति।

(3) काकः एव करुणापरः पक्षिसाम्राट्।

**भाषिककार्यम्** (1) वयम् (2) विद्यार्थी (3) अनृतम्

**15.** (1) केभ्यः (2) कस्याः (3) किमर्थम् / कस्मै (4) कुत्र / कस्मिन्

**16.** **अन्वयः -** 1. मृणालपटली 2. नलिनानि 3. सरोवरस्य 4. असि

**भावार्थः -** 1. निमित्तम् 2. अपगमे 3. अकारणद्वेषि 4. परितोषयिष्यति

**17. घटनाक्रमः -**

1) परिश्रमेण उपार्ज्जितेन वित्तेन स्वपुत्रम् महाविद्यालये प्रवेशं दापयितुं सफलो जातः।
2) तनूजस्य रुग्णतामाकर्ण्य अर्थकार्श्येन पीडितः पिता पादातिरेव प्राचलत्।
3) रात्रिनिवासं कर्तुं पार्श्वस्थिते ग्रामे कश्चन करुणापरो गृही तस्मै आश्रयं प्रयच्छत्।
4) तस्मिन् गृहे निहितां एकाम् मञ्जूषामादाय कश्चन चौरः पलायितः।
5) रक्षापुरुषः तं अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्रक्षिपत्।
6) न्यायाधीशः सर्वं वृत्तमवगत्य अतिथिं निर्दोषम् अमन्यत आरक्षिणं च दोषभाजनम्।
7) न्यायाधीशः आरक्षिणम् अभियुक्तं च कंचन शवं न्यायालये आनेतुं आदिष्टवान्।
8) प्रमाणेन न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससंमानं मुक्तवान्।

**18.** (1) पुत्रस्य (2) आकृष्य (3) उपविश्यताम्

## आदर्शप्रश्नपत्रम् - 2

### क खण्डः - अपठित-अवबोधनम् - 10 अङ्काः

**1) क) एकपदेन उत्तरत। -** क) आज्ञा ख) नियमाः ग) भारतीयाः

**ख) पूर्णवाक्येन उत्तरत।**

क) आज्ञापालनम् , नियमपालनम् इत्यादयः गुणाः अनुशासने समायान्ति।

ख) अनुशासितनागरिकस्य इदं कर्तव्यम् अस्ति यत् सः स्वसंविधाने स्वीकृतान् नियमान् पालयेत्।

ग) अनुशासनपदस्य अर्थः आज्ञापालनम् इति।

**ग)** अनुशासनम् ( किमपि अन्यत् उचितं शीर्षकम् )

**घ) भाषिककार्यम्** (i) समुन्नतिम् (ii) शत्रवः (iii) प्रतीक्षमाणा: (iv) संकटोपपन्नम्

### ख खण्डः - रचनात्मकं कार्यम् - 15 अङ्काः

**2.** 1. स्वस्थाः 2. वातावरणम् 3. चिन्ता 4. गुरुकुलस्य 5. परीक्षाशुल्कम्
6. रूप्यकाणि 7. प्रेषयतु 8. पठने 9. सुखदः 10. जागृतिः

**3. अधोदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दसहायतया संस्कृते पञ्च वाक्यानि लिखत।**

1. एतत् समुद्रतटस्य चित्रम् अस्ति। 2. अत्र बालका: बालिका: च क्रीडन्ति।

3. आकाश: नीलवर्ण: अस्ति। 4. आकाशे खगा: उत्पतन्ति।

5. एतत् सुन्दरं चित्रम् अस्ति। ( एतानि वाक्यानि केवलम् उदाहरणमात्राणि )

**अथवा**

1. विद्यालयस्य स्वच्छता अस्माकं कर्तव्यम् अस्ति।
2. सर्वे छात्रा: अवकाराणि अवकरपात्रे क्षिपन्ति।
3. कोऽपि छात्र: भित्तिषु न लिखन्ति।
4. कर्गदपत्राणि च अवकारपात्रे एव क्षिपन्ति।
5. एवं वयं विद्यालयस्य स्वच्छतां कुर्म:।

**4.** 1. वयम् सर्वे रामायणं पठाम:। 2.स्वास्थ्यार्थं व्यायाम: करणीय:।
3.सा फलं गृहीत्वा गृहम् अगच्छत्। 4.त्वम् अपि पुस्तकं पठ।
5.आवां गीतम् गायाव:। 6.ह्य: राघव: कुत्र आसीत् ?
7.विद्यां विना जीवनं व्यर्थं भवति।

## ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्काः

**5.** 1. एतयो: + जननी 2. तस्मात् + अङ्ग 3. व्याघ्र: + अपि 4. बुद्धिर्बलवती 5. वधूरिति

**6.** 1. भोजनसामग्री 2. भयस्य अभाव: 3. पिककाकयो: 4. समयम् अनतिक्रम्य 5. स्थितप्रज्ञः

**7.** (i) कृश + तल् (ii) गुण + मतुप् (iii) कुशला (iv) महत् + त्व (v) सामाजिक:

**8.** 1. त्वम् 2. पच्यते 3. मया 4. अपठम्

**9.** 1. सपादचतुर्वादने 2. पञ्चवादने 3. पादोनसप्तवादने 4. सार्धसप्तवादने 5. त्रिवादने

**10.** 1. उच्चै: 2. शनै: 3. अद्य 4. वृथा

**11.** 1. प्रणमामि 2. द्वौ 3. भवतु 4. स्वपित्रा

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2. 1) एकपदेन उत्तरत।** 1. सुराधिप: 2. कृषक: 3. दैन्यम्

**2) एकवाक्येन उत्तरत।**

1. भूमौ पतिते स्वपुत्रं दृष्ट्वा माता सुरभिः अश्रूणि मुञ्चति स्म।
2. सुरभिः इन्द्रं 'भो वासव ! पुत्रस्य दैन्यम् दृष्टवा अहं रोदिमि' इति अवदत्।
3. वृषभः कृच्छ्रेण भारमुद्वहति।

**3) निर्देशानुसारम् उत्तरत।** 1. भूमौ 2. सुराधिप: 3. कृच्छ्रेण

**13. 1) एकपदेन उत्तरत** 1. फलच्छायासमन्वितः/महावृक्ष: 2.फलच्छायासमन्वितः 3. फलम्

**2) पूर्णवाक्येन उत्तरत।** 1. महावृक्षेषु दैवात् फलं नास्ति।
2. फलच्छायासमन्वितः महावृक्ष: सेवितव्य:।
3. छाया केनापि न निवार्यते।

**3) निर्देशानुसारम् उत्तरत ।** 1. वृक्षः 2. दैवात् 3. समन्वित:

**14. 1) एकपदेन उत्तरत ।** 1. पिकस्य 2. काक: 3. गज:

**2) एकवाक्येन उत्तरत ।**

1. गज: आत्मन: विषये 'अहं विशालकाय:, बलशाली, पराक्रमी च' इति कथयति ।
2. गजः स्वशुण्डेन पोथयित्वा वन्यपशून् तुदन्तम् जन्तुम् मारिष्यति ।
3. पिकस्य सन्ततिं काकः पालयति ।

**3) निर्देशानुसारम् उत्तरत ।** 1. वार्ताम् 2. अहम् 3. पालयामि

**15.** 1. अहम् <u>**कस्य**</u> नामधेयम् जानामि । 2. <u>**क:**</u> ताम् अपृच्छत् ।
3. एवमेव <u>**कौ**</u> गायताम् । 4. धैर्यवान् <u>**कुत्र / कस्मिन्**</u> परिभवं न प्राप्नोति ।
5. उद्याने <u>**केषां**</u> कलरवं चेत: प्रसादयति ।

**16.** 1. अवक्रता 2. वाचि 3. तथ्यतः 4. आहु

**अथवा**

1. शोभा 2. बकसहस्रेण 3. सज्जनेन 4. मूर्खसहस्रेण

**17.** (क) कश्चन निर्धनः जनः वित्तम् उपार्जितवान् ।
(ख) एकदा तस्य पुत्रः रुग्णः जातः ।
(ग) सः पुत्रं द्रष्टुम् पदातिरेव प्राचलत् ।
(घ) रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः ।
(ङ) तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः ।
(च) चौरस्य पदध्वनिना अतिथिः प्रबुद्धः ।
(छ) चौरः एव उच्चैः क्रोशितुम् आरभत ।
(ज) ग्रामवासिनः वराकमतिथिमेव चौरं मत्वा अभर्त्सयन् ।

**18.** 1. कठिनम् 2. सन्तानेषु 3. जलै: 4. ऋजुता

## आदर्शप्रश्नपत्रम् - 3

**1. क) एकपदेन उत्तरत -** 1.मानवचर्यायाः 2. ऋग्वेदकालात् 3. मानवेन

**ख) पूर्णवाक्येन उत्तरत**

1. क्रीडया आत्मविश्वासः, निष्ठा, श्रमानुरक्तिः, अनुशासनप्रियता, शिष्टाचारः, सहयोगभावः, नेतृत्वजागरणं, कर्तव्यपालनं, समदुःखसुखभावः, मानसिकदृढता इत्यादयः गुणाः विशेषतः वर्धन्ते ।

2. द्यूतं, चतुरङ्गं, मृगया, अश्वारोहण-खड्गचालनादयः युद्धक्रीडाः, अन्त्याक्षरी, समस्या-पूर्तिप्रभृतयः भाषाक्रीडाः वीटादयःउत्साहवर्धिकाः क्रीडाः भारते प्रसिद्धा आसन्।

3. क्रीडा मनसः खेदं अपनयति।

**ग)** क्रीडा / क्रीडाया: महत्त्वम्

**घ)** 1. उत्साहवर्धिताः 2. आश्रिता: 3. शिष्टाचारः 4. विरसता

**ख खण्ड: - रचनात्मकं कार्यम् - 15 अङ्का:**

**2.** (i) अस्तु (ii) जनसंरक्षणप्रचारकार्ये (iii) प्रयासः (iv) जानीमः (v) जीवनम् (vi) अपव्ययम् (vii) चिन्तयति (viii) जागरूकता (ix) देशस्य (x) प्रयतमाना:

**3. चित्रवर्णनम् ।**

1. इदम् एकं क्षेत्रस्य चित्रम् अस्ति।
2. कृषक: हलेन वृषभौ चालयति।
3. सः मेघानाम् प्रतीक्षा करोति।
4. कृषकस्य शरीरम् स्वेदपूर्णम् भवति।
5. कृषक: अस्माकं अन्नदाता भवति।

**अथवा**

**पर्यावरणसंरक्षणम्**

1. पर्यावरणसंरक्षणम् अस्माकं दायित्वम् अस्ति।
2. मनुष्या: अधुना जलप्रदूषणं कुर्वन्ति।
3. ते वायुप्रदूषणम् अपि कुर्वन्ति।
4. अत एव मानवा: रुग्णा: भवन्ति।
5. सुखजीवनाय पर्यावरणस्य सुरक्षा कर्तव्या।

**4.** 1. वयं मिलित्वा गास्यामः। 2. युवां संस्कृतं पठतम्। 3. सा श्वः आगमिष्यति। 4 भारतम् अस्माकं देश:। 5. पिता रामाय क्रीडनकं आनीतवान्। 6. बालिकाः नृत्यन्ति 7. सः कार्यालयं अगच्छत् ।

**ग खण्ड: - अनुप्रयुक्तं व्याकरणम् - 25 अङ्का:**

**5.** 1. दारुणाश्च 2. तपः + तेपे 3. पदाति: + एव 4. जगदीशः 5. क: + चन

**6.** 1.वनराजः 2.राम: च लक्ष्मण: च 3.कृत: अभ्यास: येन स: 4.निर्दोषम् 5. कुटुम्बस्य वृत्तान्त:

**7.** 1. बुद्धिमती 2. सैनिका: 3. लघुत्वम् 4. दीर्घसूत्र + तल् 5. समूहिक:

**8.** 1. त्वया 2. पालयति 3. दीयते 4. गच्छामि

**9.** 1. षट् वादने 2. सपादसप्तवादने 3. सार्ध-एकादशवादने
4. पादोनद्विवादने 5.सपादपञ्चवादने

**10.** 1. भृशम् 2. अत्र 3. सदा 4. बहिः 5. यत्र

**11.** 1. तव 2. गमिष्यति 3. तिस्र: 4. उन्नत:

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2. 1) एकपदेन उत्तरत** 1. तुल्यवत्सला 2. सर्वत्र 3. दुर्बले

**2) एकवाक्येन उत्तरत।**

1. सुरभेः वचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।
2. आखण्डल: तामेवमसान्त्वयत्-"गच्छ वत्से! सर्व भद्रं जायेत।
3. चण्डवातेन मेघरवैश्च सह प्रवर्षः समजायत।

**3) निर्देशानुसारम् उत्तरत।** 1. जननी 2. जननी 3. समजायत

**13. 1) एकपदेन उत्तरत।** 1. बाल्ये 2. महत् 3. पिता

**2) पूर्णवाक्येन उत्तरत।** 1. पितास्य किं तप: तेपे इत्युक्ति: तत्कृतज्ञता
2. पिता पुत्राय महत् विद्याधनं यच्छति।
3. पिता विद्याधनं यच्छति।

**3) निर्देशानुसारम् उत्तरत।** 1. महत् 2. कृतज्ञता 3. पिता

**14. 1) एकपदेन उत्तरत।** (I ) काकः (ii) काक: (iii) काकस्य

**2) एकवाक्येन उत्तरत।**(i) काकः स्वविषये कथयति यत् अस्माकम् परिश्रम: ऐक्यं च विश्वप्रथितम् अपि च काकचेष्ट: विद्यार्थी एव आदर्शच्छात्रः मन्यते।
(ii) काकानाम् परिश्रमः ऐक्यं च विश्वप्रथितम्।
(iii) काक: का-का इति कर्कशध्वनिना वातावरणमाकुलीकरोति।

**3) निर्देशानुसारम् उत्तरत।** (i) काकचेष्टः (ii) अनृतम् (iii) वयम्

**15.** 1. सर्वे **<u>कां</u>** प्रणमन्ति ? 2. **<u>कं</u>** द्रष्टुं सः प्रस्थितः ? 3. **<u>क:</u>** ताम् अपृच्छत् ?
4. त्वं **<u>कस्मात्</u>** बिभेषि ? 5. मयूरस्य नृत्यं **<u>कस्या:</u>**आराधना ?

**16.** (i) अक्षरम् (ii) अनौषधम् (iii) अयोग्य: (iv) योजक:

**अथवा**

(i). प्रथम: (ii) विद्वांस: (iii) सदाचारस्य (iv) विशेषत:

**17.** (क) कश्चन निर्धनः जनः वित्तम् उपार्जितवान्।

(ख) एकदा तस्य पुत्रः रुग्णः जातः।

(ग) सः पुत्रं द्रष्टुम् पदातिरेव प्राचलत्।

(घ) रात्रिनिवासं कर्तुम् कञ्चिद् गृहस्थमुपागतः।

(ङ) तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः।

(च) चौरस्य पादध्वनिना अतिथिः प्रबुद्धः।

(छ) चौरः एव उच्चैः क्रोशितुमारभत।

(ज) ग्रामवासिनः वराकमतिथिमेव चौरं मत्वाऽभर्त्सयन्।

**18.** 1. आम्रमञ्जर्य्यः 2. कल्याणम् 3. मार्गे 4. परस्परम्

## आदर्शप्रश्नपत्रम् - 4

### क खण्डः - अपठित-अवबोधनम् - 10 अङ्काः

**1) क) एकपदेन उत्तरत ।** 1. नराणाम् 2. संहति: कार्यसाधिका 3. हस्तिनम्

**ख) पूर्णवाक्येन उत्तरत**

i) एकताया: प्रभावेण भारतीया: स्वदेशम् आंगलहस्तात् मोचयितुं समर्था: अभवन् ।

ii) राष्ट्रं जनशक्त्या संसारस्य मुकुटमणिरिव समुज्ज्वलं भवति ।

iii) यदि वयं संघीभूय स्थास्याम: तर्हि शत्रुसैनिकान् जेतुं समर्था: भविष्याम: ।

**ग)** संहति: कार्यसाधिका

**घ) निर्देशानुसारम् उत्तरत -** i) सर्वे ii) एकेन iii) परित्यज्य iv) मानवै:

### ख खण्डः - रचनात्मकं कार्यम् - 15 अङ्काः

**2.** 1. जयपुरत: 2. अनुज 3. कुशली 4. स्मरत: 5. आगमिष्यति 6. आगन्तुम् 7. लेखिष्यति 8. सम्यक् 9. कुशलम् 10. अग्रज:

**3.** 1. एतत् उद्यानस्य दृश्यम् अस्ति । 2. अत्र छात्रा: क्रीडन्ति ।

3. अत्र अनेके वृक्षा: सन्ति । 4. दूरे सूर्य: उदेति ।

5. एतत् सुन्दरं दृश्यम् अस्ति । **( एतानि वाक्यानि केवलम् उदाहरणमात्राणि एव )**

**अथवा**

1. वृक्षा: सज्जना: इव भवन्ति । 2. वृक्षा: अस्मभ्यं प्राणवायुं ददति । 3. वृक्षाणां फलानि वयम् खादाम: । 4. वृक्षा: पर्यावरणस्य रक्षां कुर्वन्ति । 5. वृक्षाणां रक्षणं सर्वेषां दायित्वम् अस्ति ।

**( एतानि वाक्यानि केवलम् उदाहरणमात्राणि एव )**

**4.** १]अरुणाचलप्रदेशस्य राजधानी ईटानगरम् अस्ति । २] यूयं कन्दुकेन क्रीडथ । ३] पर्यावरणरक्षा अस्माकं कर्तव्यम् अस्ति । ४] परिश्रमी सदा सफल: भवति । ५] विद्यां विना जीवनं व्यर्थम् अस्ति । ६] लता नृत्यति ।

## ग खण्डः - अनुप्रयुक्तं व्याकरणम् - 25 अङ्का:

**5.** i.पङ्क्तय: + ह्यनन्ताः ii.एतस्मादेव iii) सम्यङ्नेता iv. तपः + तेपे v. मेघरवैः + च

**6.** i) देशभक्तम् ii) मतिम् अनतिक्रम्य iii) दशरथस्य पुत्रः iv) माता च पिता च v)दीपानाम् आवलिः

**7.** i. लघुत्वम् ii. तुल्यवत्सल + टाप् iii. बुद्धिः + मतुप् iv. सामाजिकः v. भवती

**8.** i. खाद्यते ii. पाठः iii .छात्राः iv. बालिकया

**9.** i. चतुर्वादने ii. सपादचतुर्वादने iii. सार्धषड्वादने iv. पादोनसप्तवादने v. अष्टवादने

**10.** i. तत्र ii. यदा iii. ह्यः iv. उच्चैः

**11.** i. पचन्ति ii. एका iii. बालकाः iv. दुग्धम्

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2.** **अ] एकपदेन उत्तरत** । १. शव: २. घटनाया: ३. आरक्षिणि

**आ] पूर्णवाक्येन उत्तरत ।**

१. शव: प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् ।

२.न्यायाधीश: आरक्षिणे कारादण्डमादिश्य तं जनं ससंमानं मुक्तवान् ।

३. शव: निवेदितवान् - मान्यवर ! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि । त्वयाऽहं चोरिताया: मञ्जूषाया: ग्रहणाद्वारित: ,अत: निजकृत्यस्य फलम् भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे इति ।

**इ] निर्देशानुसारम्, उत्तरत-** i. सः शवः ii. अध्वनि iii. प्रस्तुतवति

**13.** **अ] एकपदेन उत्तरत** - १. तुरङ्गै: २. मृगा: ३. गोभि:

**आ] पूर्ण वाक्येन उत्तरत**

१.मूर्खस्य सख्यं मूर्खैः सह भवति।

२.सामान्यत: समानशीलव्यसनेषु सख्यं भवति।

३.सुधिय: सुधीभि: सह सख्यं कुर्वन्ति।

**इ] निर्देशानुसारं उत्तरत -** i. मृगाः ii. तुरगा: / तुरङ्गा: iii. मूर्खैः

**14.** **अ] एकपदेन उत्तरत** | १ काकस्य २. पिक: ३. काक: / काक:

**आ] पूर्णवाक्येन उत्तरत** |

१. का-का इति कर्कश ध्वनिना काक: वातावरणमाकुलीकरोति।

२. काकस्य सत्यप्रियता जनानां कृते उदाहरणस्वरूपा।

३. काकचेष्ट: विद्यार्थी एव आदर्शछात्र: मन्यते।

**इ] निर्देशानुसारम् उत्तरत-** i. कृष्णवर्ण: ii. ध्वनि: iii. त्वया

**15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत। (केवलं प्रश्नचतुष्टयम्)** 1 x 4 = 4

i) सः ऋषभः हलमूढ्वा गन्तुमशक्तः **कुत्र / कस्मिन्** पपात

ii) त्वं **कस्मात्** बिभेषि।

iii) **का** आसीत् धेनूनां माता।

iv) तपोवने **कस्य** नाम व्यवहरति।

v) **कस्य** वन्दनायां लव इत्यात्मानं श्रावयमि।

vi) लवः कुशः च **कौ / कीदृशौ** आस्ताम्।

**16.** i. श्रेयः ii. इच्छति iii. कर्म iv. कुर्यात्

**अथवा**

i . प्रोक्तस्य ii. अर्थनिर्णय: iii. भवेत् iv. विवेक:

**17.** १.कश्चन निर्धन: भूरि परिश्रम्य किञ्चित् वित्तं उपार्जितवान्।

२.स: पिता तनूजस्य रुग्णतां आकर्ण्य व्याकुल: जात: पुत्रं द्रष्टुम् च प्रस्थित:।

३.स: पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चित् गृहस्थं उपागता:।

४.रक्षापुरुष: तं अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्राक्षिपत्॥

५.तौ न्यायालये स्व-स्व पक्षं पुन: स्थापितवन्तौ।

६.न्यायाधीश: आरक्षिणम् अभियुक्तम् च तं शवं न्यायालये आनेतुं आदिष्टवान्।

७.उभौ शवं आनीय एकस्मिन् चत्वरे स्थापितवन्तौ।

८. न्यायाधीश: आरक्षिणे कारादण्डं आदिश्य तं जनं ससम्मानं मुक्तवान्।

**18.** i. कथयति ii. इन्द्र iii. वने iv. पलायितः

# आदर्शप्रश्नपत्रम् - 5

## क खण्ड: - अपठित-अवबोधनम् - 10 अङ्का:

**1)क) एकपदेन उत्तरत।** क) गतवर्षे ख) भारतस्य ग) सुखिन:

**ख) पूर्णवाक्येन उत्तरत -** क) भारतदेश: सदैव युद्धस्य विरुद्धपक्षमेव अवलम्बते स्म।

ख) आर्षभारतसंस्कारस्य मूलमन्त्रम् "अहिंसा परमो धर्म:" इति भवति।

ग) अमेरिका-रष्यादेशयो: परस्परविरोध: एव अस्य युद्धस्य प्रमुखं कारणमिति केचन वदन्ति।

**ग)** रष्या-युक्रैन् युद्धम्

**घ) निर्देशानुसारम् उत्तरत -** क) भजत ख) प्रमुखम् ग) आप्तवाक्यम् घ) अवर्तत

## ख खण्ड: - रचनात्मकं कार्यम् - 15 अङ्का:

**2.** 1. दिल्लीत: 2. ज्येष्ठ 3. कुशली 4. स्मरत: 5. आगमिष्यति 6. इच्छति 7. पत्रम् 8. अहम् 9. मित्रेभ्य: 10. अनुज:

**3.** 1. एतत् उद्यानस्य दृश्यम् अस्ति। 2. उद्याने बालका: बालिका: च क्रीडन्ति।
3. उद्याने बहव: वृक्षा: सन्ति। 4. दूरे अनेकानिभवनानि दृश्यन्ते।
5. एक: बालक: अत्र कन्दुकेन क्रीडति।

**अथवा**

1. दीपावली: भारतस्य प्रमुखं पर्व अस्ति।
2. अस्मिन् अवसरे सर्वे दीपप्रज्ज्वालानां कुर्वन्ति।
3. दीपावलीदिनेबालका: स्फ़ोटकान् स्फ़ोटयन्ति।
4. आबालवृद्धं जना: अस्मिन् उत्सवे भागं स्वीकुर्वन्ति।
5. अयम् उत्सव: आनन्दस्य सौहार्दस्य च प्रतीको वर्तते।

**4.** (i) बालक: विद्यालयं गच्छति। (ii) माता कथां कथयति।
(iii) पिता कार्यालयात् आगच्छति। (iv) अहं संस्कृतं पठामि।
(v) भारतम् अस्माकं देश: अस्ति। (vi) राम: उत्तम: राजा आसीत्।

## ग खण्ड: - अनुप्रयुक्तं व्याकरणम् - 25 अङ्का:

**5.** 1. कीटोऽपि 2. पितुरिच्छा 3. मानुषात् + अपि 4. सरस्तीरे 5. क: + अपि

**6.** 1. बलम् अनतिक्रम्य 2. पीताम्बर: 3. लवकुशौ 4. पाणी च पादौ च तेषां समाहार:

**7.** 1. विद्वस् + ङीप् 2. सामाजिक: 3. तुल्यवत्सल + टाप् 4. रमणीय + तल्

**8.** 1. हरिणेन 2. त्वया 3. पठामि

**9.** 1. सार्धचतुर्वादने 2. सपादषड्वादने 3. नववादने 4. पादोनसप्तवादने

**10.** 1. बहि:    2. एव    3. तत्र

**11.** 1. वदामि    2. जनकेन    3. चतस्र:

## घ खण्डः - पठितावबोधनम् - 30 अङ्काः

**I2.1) एकपदेन उत्तरत** - 1. निर्धनो जन:    2. पुत्रम्    3. महाविद्यालये

**2) एकवाक्येन उत्तरत -**

क) निर्धनः तेन धनेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः।

ख) सः निर्धनः तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः।

ग) अर्थकार्श्येन पीडितः स: बसयानं विहाय पदातिरेव प्राचलत्।

**3) निर्देशानुसारम् उत्तरत -**    क) जन:    ख) प्राचलत्    ग) अध्ययने

**13. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत।**

गुणी गुणं वेत्ति न वेत्ति निर्गुणो बली बलं वेत्ति न वेत्ति निर्बलः।
पिको वसन्तस्य गुणं न वायसः करी च सिंहस्य बलं न मूषकः॥

**1) एकपदेन उत्तरत** - 1. गुणी    2. बलम्    3. पिक:

**2) पूर्णवाक्येन उत्तरत -** 1. पिक: वसन्तस्य गुणं वेत्ति।    2. करी सिंहस्य बलं वेत्ति।
3. वायस: वसन्तस्य गुणं न वेत्ति।

**3) निर्देशानुसारम् उत्तरत -** 1. वेत्ति    2. वायस:    3. गुणी

**14. 1) एकपदेन उत्तरत** - 1. राम: 2. कुशलवौ    3. हृदयग्राही

**2) एकवाक्येन उत्तरत -** 1.कुशलवौ रामम् उपसृत्य अपि कुशलं महाराजस्य इति पृच्छति।
2. सिंहासनम् अध्यासितुं न युक्तमिति कुशलवौ कथयत:।
3. सिंहासनं अङ्कव्यवहितम् अध्यास्यताम् इति राम: वदति।

**3) निर्देशानुसारम् उत्तरत -** 1. उपसृत्य    2. प्राविशत:    3. अध्यासितुम्

**15.** क) उभौ शवं **कुत्र / कस्मिन्** स्थापित्वन्तौ ?

ख) न्यायाधीशः **क:** आसीत् ?

ग) जनकेन **कस्मै** शैशवे विद्याधनं दीयते ?

घ) **कस्य** नृत्यं प्रकृतेः आराधना ?

ङ) **क:** गुणं वेत्ति ?

**16.** 1. शरीरस्थ:    2. आलस्यम्    3. बन्धु:    4. अवसीदति

**अथवा**

1. संस्सरे    2. निरर्थकम्    3. अश्वस्य    4. कार्यम्

**17.** 1) एक: कृषक: आसीत्।

2) स: कृषक: एकदा बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन् आसीत्।

3) तयो: बलीवर्दयो: एक: शरिरेण दुर्बल: आसीत्।

4) सः जवेन गन्तुम् अशक्तः च आसीत्।

5) कृषक: तं दुर्बलं वृषभं तोदनेन नुद्यमान: अवर्तत।

6) सः ऋषभः हलमूढ्वा गन्तुम् अशक्तः क्षेत्रे पपात।

7) कृषीवल: क्रुद्ध: अभवत्।

8) तमुत्थापयितुं बहुवारंयत्नमकरोत् तथापि सः नोत्थितः।

**18.** 1. असत्यम् 2. निरन्तरम् 3. सूर्य: 4. चिन्तयित्वा

**************************** **शुभम्** ********************************

# धन्यवादाः